कौटिलीय अर्थशास्त्रं[1]

01.1.02 तस्यायं प्रकरणाधिकरणसमुद्देशः

01.1.03a विद्यासमुद्देशः, वृद्धसमुद्देशः, इन्द्रियजयः, अमात्य उत्पत्तिः, मन्त्रिपुरोहित उत्पत्तिः, उपधाभिः शौचाशौचज्ञानं अमात्यानां, -

01.1.03b गूढपुरुषप्रणिधिः, स्वविषये कृत्याकृत्यपक्षरक्षणं, परविषये कृत्याकृत्यपक्ष उपग्रहः,

01.1.03ch मन्त्राधिकारः, दूतप्रणिधिः, राजपुत्ररक्षणं, अपरुद्धवृत्तं, अपरुद्धे वृत्तिः, राजप्रणिधिः, निशान्तप्रणिधिः, आत्मरक्षितकं, , इति विनयाधिकारिकं प्रथमं अधिकरणम्

01.1.04a जनपदनिवेशः, भूमिच्छिद्रापिधानं, दुर्गविधानं, दुर्गनिवेशः, सन्निधातृनिचयकर्म, समाहर्तृसमुदयप्रस्थापनं, अक्षपटले गाणनिक्याधिकारः,

01.1.04b समुदयस्य युक्तापहृतस्य प्रत्यानयनं, उपयुक्तपरीक्षा, शासनाधिकारः, कोशप्रवेश्यरत्नपरीक्षा, आकरकर्मान्तप्रवर्तनं, अक्षशालायां सुवर्णाध्यक्षः

01.1.04ch विशिखायां सौवर्णिकप्रचारः, कोष्ठागाराध्यक्षः, पण्याध्यक्षः, कुप्याध्यक्षः, आयुधाध्यक्षः, तुलामानपौतवं,

01.1.04d देशकालमानं, शुल्काध्यक्षः, सूत्राध्यक्षः, सीताध्यक्षः, सुराऽध्यक्षः, सूनाध्यक्षः, गणिकाऽध्यक्षः,

01.1.04e नाव्ऽध्यक्षः, गोऽध्यक्षः, अश्वाध्यक्षः, हस्त्य्ऽध्यक्षः, रथाध्यक्षः, पत्त्य्ऽध्यक्षः, सेनापतिप्रचारः, मुद्राऽध्यक्षः, विवीताध्यक्षः, समाहर्तृप्रचारः,

01.1.04f गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः, नागरिकप्रणिधिः इत्यध्यक्षप्रचारो द्वितीयं अधिकरणम्

01.1.05a व्यवहारस्थापना, विवादपदनिबन्धः, विवाहसम्युक्तं, दायविभागः, वास्तुकं, समयस्य अनपाकर्म, ऋणादानं, औपनिधिकं, दासकर्मकरकल्पः,

01.1.05b सम्भूय समुत्थानं, विक्रीतक्रीतानुशयः, दत्तस्य अनपाकर्म, अस्वामिविक्रयः, स्वस्वामिसम्बन्धः, साहसं, वाक्पारुष्यं, दण्डपारुष्यं, द्यूतसमाह्वयं, प्रकीर्णकं - इति, धर्मस्थीयं तृतीयं अधिकरणम्

[1] Courtesy: http://sanskritdocuments.org/all_sa/artha_sa.html

01.1.06a कारुकरक्षणं, वैदेहकरक्षणं, उपनिपातप्रतीकारः, गूढाजीविनां रक्षा, सिद्धव्यञ्जनैर्माणवप्रकाशनं, शङ्कारूपकर्माभिग्रहः,

01.1.06b आशुमृतकपरीक्षा, वाक्यकर्मानुयोगः, सर्वाधिकरणरक्षणं

01.1.06ch एकाङ्गवधनिष्क्रयः, शुद्धश्चित्रश्च दण्ड कल्पः, कन्याप्रकर्म, अतिचारदण्डाः - इति कण्टकशोधनं चतुर्थं अधिकरणम्

01.1.07 दाण्डकर्मिकं, कोशाभिसंहरणं, भृत्यभरणीयं, अनुजीविवृत्तं, समयाचारिकं, राज्यप्रतिसन्धानं, एकाइश्वर्यं - इति योगवृत्तं पञ्चमं अधिकरणम्

01.1.08 प्रकृतिसम्पदः, शमव्यायामिकं - इति मण्डलयोनिः षष्ठं अधिकरणम्

01.1.09a षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयः, संश्रयवृत्तिः, समहीनज्यायसां गुणाभिनिवेशः, हीनसन्धयः, विगृह्य आसनं, सन्धाय आसनं, विगृह्य यानं, सन्धाय यानं,

01.1.09b सम्भूय प्रयाणं, यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविरागहेतवः प्रकृतीनां, सामवायिकविपरिमर्शः,

01.1.09ch संहित प्रयाणिकं, परिपणितापरिपणितापसृताः सन्धयः, द्वैधीभाविकाः सन्धिविक्रमाः, यातव्यवृत्तिः, अनुग्राह्यमित्रविशेषाः,

01.1.09d मित्रहिरण्यभूमिकर्मसन्धयः, पार्ष्ण्यिग्राहचिन्ता, हीनशक्तिपूरणं, बलवता विगृह्य उपरोधहेतवः, दण्ड उपनतवृत्तं,

01.1.09e दण्ड उपनायिवृत्तं, सन्धिकर्म, समाधिमोक्षः, मध्यमचरितं, उदासीनचरितं, मण्डलचरितं - इति षाड्गुण्यं सप्तमं अधिकरणम्

01.1.10 प्रकृतिव्यसनवर्गः, राजराज्ययोर्व्यसनचिन्ता, पुरुषव्यसनवर्गः, पीडनवर्गः, स्तम्भवर्गः, कोशसङ्गवर्गः, मित्रव्यसनवर्गः - इति व्यसनाधिकारिकं अष्टमं अधिकरणम्

01.1.11a शक्तिदेशकालबलाबलज्ञानं, यात्राकालाः, बल उपादानकालाः, सम्नाहगुणाः, प्रतिबलकर्म, पश्चात् कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकाराः

01.1.11b क्षयव्ययलाभविपरिमर्शः, बाह्याभ्यन्तराश्चापदः, दुष्यशत्रुसम्युक्ताः, अर्थानर्थसंशययुक्ताः, तासां उपायविकल्पजाः सिद्धयः - इत्यभियास्यत् कर्म नवमं अधिकरणम्

01.1.12 स्कन्धावारनिवेशः, स्कन्धावारप्रयाणं, बलव्यसनावस्कन्दकालरक्षणं, कूटयुद्धविकल्पाः, स्वसैन्य उत्साहनं, स्वबलान्यबलव्यायोगः, युद्धभूमयः, पत्त्यऽश्वरथहस्तिकर्माणि, पक्षकक्ष उरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबलविभागः, पत्त्यऽश्वरथहस्तियुद्धानि, दण्डभोगमण्डलासंहतव्यूहव्यूहनं, तस्य प्रतिव्यूहस्थापनं - इति साङ्ग्रामिकं दशमं अधिकरणम्

01.1.13 भेद उपादानानि, उपांशुदण्डाः - इति सङ्घवृत्तं एकादशं अधिकरणम्

01.1.14 दूतकर्म, मन्त्रयुद्धं, सेनामुख्यवधः, मण्डलप्रोत्साहनं, शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधः, योगातिसन्धानं, दण्डातिसन्धानं, एकविजयः - इत्याबलीयसं द्वादशं अधिकरणम्

01.1.15 उपजापः, योगवामनं, अपसर्पप्रणिधिः, पर्युपासनकर्म, अवमर्दः, लब्धप्रशमनं - इति दुर्गलम्भ उपायः त्रयोदशं अधिकरणम्

01.1.16 परबलघातप्रयोगः, प्रलम्भनं, स्वबल उपघातप्रतीकारः - इत्यौपनिषदिकं चतुर्दशं अधिकरणम्

01.1.17 तन्त्रयुक्तयः - इति तन्त्रयुक्तिः पञ्चदशं अधिकरणम्

01.1.18 शास्त्रसमुद्देशः पञ्चदशाधिकरणानि स-अशीतिप्रकरणशतं स-पञ्चाशद्ऽध्यायशतं षट्श्लोकसहस्राणि इति

01.1.19ab सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।

01.1.19chd कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् (इति)

Chapt | Section.1: Enumeration of the sciences

i) Establishing (the necessity of) philosophय्

01.2.01 आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च इति विद्याः

01.2.02 त्रयी वार्त्ता दण्ड नीतिश्च इति मानवाः

01.2.03 त्रयी विशेषो ह्यान्वीक्षिकी इति

01.2.04 वार्त्ता दण्डनीतिश्च इति बार्हस्पत्याः

01.2.05 संवरणमात्रं हि त्रयी लोकयात्राविद इति

01.2.06 दण्डनीतिरेका विद्या इत्यौशनसाः

01.2.07 तस्यां हि सर्वविद्याऽऽरम्भाः प्रतिबद्धा इति

01.2.08 चतस्र एव विद्या इति कौटिल्यः

01.2.09 ताभिर्धर्मार्थौ यद् विद्यात् तद् विद्यानां विद्यात्वम्

01.2.10 साङ्ख्यं योगो लोकायतं च इत्यान्वीक्षिकी

01.2.11 धर्माधर्मौ त्रय्यां अर्थानर्थौ वार्त्तायां नयानयौ दण्डनीत्यां बलाबले च एतासां हेतुभिरन्वीक्षमाणा लोकस्य उपकरोति व्यसनेऽभ्युदये च बुद्धिं अवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोति

01.2.12ab प्रदीपः सर्वविद्यानां उपायः सर्वकर्मणाम् ।

01.2.12chd आश्रयः सर्वधर्माणां शश्वद् आन्वीक्षिकी मता (इति)

Chapt | Section.1, (ii) Establishing (the necessity of) the Vedic Lore

01.3.01 साम.ऋग्यजुर्वेदाः त्रयः त्रयी

01.3.02 अथर्ववेद इतिहासवेदौ च वेदाः

01.3.03 शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषं इति चाङ्गानि

01.3.04 एष त्रयीधर्मश्चतुर्णां वर्णानां आश्रमाणां च स्वधर्मस्थापनाद् औपकारिकः

01.3.05 स्वधर्मो ब्राह्मणस्य अध्ययनं अध्यापनं यजनं याजनं दानं प्रतिग्रहश्च

01.3.06 क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च

01.3.07 वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च

01.3.08 शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च

01.3.09 गृहस्थस्य स्वधर्माजीवः तुल्यैरसमान.ऋषिभिर्वैवाह्यं ऋतुगामित्वं देवपित्र्ऽतिथिपूजा भृत्येषु त्यागः शेषभोजनं च

01.3.10 ब्रह्मचारिणः स्वाध्यायो अग्निकार्याभिषेकौ भैक्षव्रतित्वं आचार्ये प्राणान्तिकी वृत्तिः तद्ऽभावे गुरुपुत्रे स-ब्रह्मचारिणि वा

01.3.11 वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणं अग्निहोत्राभिषेकौ देवतापित्र्ऽतिथिपूजा वन्यश्चाहारः

01.3.12 परिव्राजकस्य जित इन्द्रियत्वं अनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षव्रतं अनेकत्रारण्ये च वासो बाह्याभ्यन्तरं च शौचम्

01.3.13 सर्वेषां अहिंसा सत्यं शौचं अनसूय आनृशंस्यं क्षमा च

01.3.14 स्वधर्मः स्वर्गायानन्त्याय च

01.3.15 तस्यातिक्रमे लोकः सङ्करात् उच्छिद्येत

01.3.16ab तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत् ।

01.3.16chd स्वधर्मं सन्दधानो हि प्रेत्य च इह च नन्दति

01.3.17ab व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।

01.3.17chd त्रय्याऽभिरक्षितो लोकः प्रसीदति न सीदति (इति)

Chapt | iii) Establishing (the necessity of) Economics, and (iv) the Science of Politics

01.4.01 कृषिपाशुपाल्ये वणिज्या च वार्ता, धान्यपशुहिरण्यकुप्यविष्टिप्रदानाद् औपकारिकी

01.4.02 तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्

01.4.03 आन्वीक्षिकी त्रयी वार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्ड नीतिः, अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धनी वृद्धस्य तीर्थे प्रतिपादनी च

01.4.04 तस्यां आयत्ता लोकयात्रा

01.4.05 तस्माल्लोकयात्राऽर्थी नित्यं उद्यतदण्डः स्यात्

01.4.06 न ह्येवंविधं वश उपनयनं अस्ति भूतानां यथा दण्डः । इत्याचार्याः

01.4.07 न इति कौटिल्यः

01.4.08 तीक्ष्णदण्डो हि भूतानां उद्वेजनीयो भवति

01.4.09 मृदुदण्डः परिभूयते

01.4.10 यथाऽर्हदण्डः पूज्यते

01.4.11 सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति

01.4.12 दुष्प्रणीतः कामक्रोधाभ्यां अवज्ञानाद् वा वानप्रस्थपरिव्राजकान् अपि कोपयति, किंऽङ्ग पुनर्गृहस्थान्

01.4.13 अप्रणीतः तु मात्स्यन्यायं उद्भावयति

01.4.14 बलीयान् अबलं हि ग्रसते दण्डधराभावे

01.4.15 स तेन गुप्तः प्रभवति इति

01.4.16ab चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।

01.4.16chd स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु (इति)

Chapt | Section.2: Association with elders

01.5.01 तस्माद् दण्डमूलाः तिस्रो विद्याः

01.5.02 विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः

01.5.03 कृतकः स्वाभाविकश्च विनयः

01.5.04 क्रिया हि द्रव्यं विनयति नाद्रव्यम्

01.5.05 शुश्रूषा श्रवणग्रहणधारणविज्ञान ऊहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति न इतरम्

01.5.06 विद्यानां तु यथास्वं आचार्यप्रामाण्याद् विनयो नियमश्च

01.5.07 वृत्तचौलकर्मा लिपिं सङ्ख्यानं च उपयुञ्जीत

01.5.08 वृत्त उपनयनः त्रयीं आन्वीक्षिकीं च शिष्टेभ्यो वार्तां अध्यक्षेभ्यो दण्डनीतिं वक्तृप्रयोक्तृभ्यः

01.5.09 ब्रह्मचर्यं च षोडशाद् वर्षात्

01.5.10 अतो गोदानं दारकर्म चास्य

01.5.11 नित्यश्च विद्यावृद्धसम्योगो विनयवृद्ध्यsर्थं, तन्मूलत्वाद् विनयस्य

01.5.12 पूर्वं अह्नभागं हस्त्यsश्वरथप्रहरणविद्यासु विनयं गच्छेत् ।

01.5.13 पश्चिमं इतिहासश्रवणे

01.5.14 पुराणं इतिवृत्तं आख्यायिक उदाहरणं धर्मशास्त्रं अर्थशास्त्रं च इति इतिहासः

01.5.15 शेषं अहोरात्रभागं अपूर्वग्रहणं गृहीतपरिचयं च कुर्यात्, अगृहीतानां आभीक्ष्ण्यश्रवणं च

01.5.16 श्रुताद्ध् हि प्रज्ञा उपजायते प्रज्ञाया योगो योगाद् आत्मवत्ता इति विद्यानां सामर्थ्यम्

01.5.17ab विद्याविनीतो राजा हि प्रजानां विनये रतः ।

01.5.17chd अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः (इति)

Chapt | Section.3: Control over the senses, (i) Casting out the group of six enemies

01.6.01 विद्या विनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः

01.6.02 कर्णत्वग्ऽक्षिजिह्वाघ्राण इन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः, शास्त्रानुष्ठानं वा

01.6.03 कृत्स्नं हि शास्त्रं इदं इन्द्रियजयः

01.6.04 तद् विरुद्धवृत्तिरवश्य इन्द्रियश्चातुरन्तो अपि राजा सद्यो विनश्यति

01.6.05 यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यां अभिमन्यमानः स-बन्धुराष्ट्रो विननाश, करालश्च वैदेहः

01.6.06 कोपाज् जनमेजयो ब्राह्मणेषु विक्रान्तः, तालजङ्घश्च भृगुषु

01.6.07 लोभाद् ऐलश्चातुर्वर्ण्यं अत्याहारयमाणः, सौवीरश्चाजबिन्दुः ।

01.6.08 मानाद् रावणः परदारान् अप्रयच्छन्, दुर्योधनो राज्याद् अंशं च

01.6.09 मदाद् दम्भोद्भवो भूतावमानी, हैहयश्चार्जुनः

01.6.10 हर्षाद् वातापिरगस्त्यं अत्यासादयन्, वृष्णिसङ्घश्च द्वैपायनं इति

01.6.11ab एते चान्ये च बहवः शत्रुषड्वर्गं आश्रिताः ।

01.6.11chd स-बन्धुराष्ट्रा राजानो विनेशुरजित इन्द्रियाः

01.6.12ab शत्रुषड्वर्गं उत्सृज्य जामदग्न्यो जित इन्द्रियः ।

01.6.12chd अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् (इति)

Chapt | ii) The life of a sage-like king

01.7.01 तस्माद् अरिषड्वर्गत्यागेन इन्द्रियजयं कुर्वीत, वृद्धसम्योगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्या उपदेशेन, लोकप्रियत्वं अर्थसम्योगेन वृत्तिम्

01.7.02 एवं वश्य इन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत्, स्वप्नं लौल्यं अनृतं उद्धतवेषत्वं अनर्थ्यसम्योगं अधर्मसम्युक्तं अनर्थसम्युक्तं च व्यवहारम्

01.7.03 धर्मार्थाविरोधेन कामं सेवेत, न निहसुखः स्यात्

01.7.04 समं वा त्रिवर्गं अन्योन्यानुबद्धम्

01.7.05 एको ह्यत्यासेवितो धर्मार्थकामानां आत्मानं इतरौ च पीडयति

01.7.06 अर्थ एव प्रधान इति कौटिल्यः

01.7.07 अर्थमूलौ हि धर्मकामाविति

01.7.08 मर्यादां स्थापयेद् आचार्यान् अमात्यान् वा, य एनं अपाय स्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तं अभितुदेयुः

01.7.09ab सहायसाध्यं राजत्वं चक्रं एकं न वर्तते ।

01.7.09chd कुर्वीत सचिवांः तस्मात् तेषां च शृणुयान् मतम् (इति)

Chapt | Appointment of ministers

01.8.01 सहाध्यायिनो अमात्यान् कुर्वीत, दृष्टशौचसामर्थ्यत्वात् इति भारद्वाजः

01.8.02 ते ह्यस्य विश्वास्या भवन्ति इति

01.8.03 न इति विशालाक्षः

01.8.04 सहक्रीडितत्वात् परिभवन्त्येनम्

01.8.05 ये ह्यस्य गुह्यसधर्माणः तान् अमात्यान् कुर्वीत, समानशीलव्यसनत्वात्

01.8.06 ते ह्यस्य मर्मज्ञभयान्नापराध्यन्ति इति

01.8.07 साधारण एष दोषः इति पाराशराः

01.8.08 तेषां अपि मर्मज्ञभयात् कृताकृतान्यनुवर्तेत

01.8.09ab यावद्भ्यो गुह्यं आचष्टे जनेभ्यः पुरुषाधिपः ।

01.8.09chd अवशः कर्मणा तेन वश्यो भवति तावताम्

01.8.10 य एनं आपत्सु प्राणाबाधयुक्तास्वनुगृह्णीयुः तान् अमात्यान् कुर्वीत, दृष्टानुरागत्वात् इति

01.8.11 न इति पिशुनः

01.8.12 भक्तिरेषा न बुद्धिगुणः

01.8.13 सङ्ख्यातार्थेषु कर्मसु नियुक्ता ये यथाऽऽदिष्टं अर्थं सविशेषं वा कुर्युः तान् अमात्यान् कुर्वीत, दृष्टगुणत्वात् इति

01.8.14 न इति कौणपदन्तः

01.8.15 अन्यैरमात्यगुणैरयुक्ता ह्येते

01.8.16 पितृपैतामहान् अमात्यान् कुर्वीत, दृष्टावदानत्वात्

01.8.17 ते ह्येनं अपचरन्तं अपि न त्यजन्ति, सगन्धत्वात्

01.8.18 अमानुषेष्वपि च एतद् दृश्यते

01.8.19 गावो ह्यसगन्धं गोगणं अतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते इति

01.8.20 न इति वातव्याधिः

01.8.21 ते ह्यस्य सर्वं अवगृह्य स्वामिवत् प्रचरन्ति

01.8.22 तस्मान्नीतिविदो नवान् अमात्यान् कुर्वीत

01.8.23 नवाः तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्ति इति

01.8.24 न इति बाहुदन्ती पुत्रः

01.8.25 शास्त्रविद् अदृष्टकर्मा कर्मसु विषादं गच्छेत्

01.8.26 तस्माद् अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तान् अमात्यान् कुर्वीत, गुणप्राधान्यात् इति

01.8.27 सर्वं उपपन्नं इति कौटिल्यः

01.8.28 कार्यसामर्थ्याद्ध् हि पुरुषसामर्थ्यं कल्प्यते

01.8.29ab सामर्थ्यश्च विभज्यामात्यविभवं देशकालौ च कर्म च ।

01.8.29chd अमात्याः सर्व एव एते कार्याः स्युर्न तु मन्त्रिणः (इति)

Chapt | Appointment of counsellors and chaplain

01.9.01 जानपदो अभिजातः स्ववग्रहः कृतशिल्पश्चक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान् उत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वयुक्तः स्तम्भचापलहीनः सम्प्रियो वैराणां अकर्ता इत्यमात्यसम्पत्

01.9.02 अतः पादार्घगुणहीनौ मध्यमावरौ

01.9.03 तेषां जनपदऽभिजनं अवग्रहं चाप्तः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च, कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च, कथायोगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च, संवासिभ्यः शीलबलारोग्यसत्त्वयोगं अस्तम्भं अचापलं च, प्रत्यक्षतः सम्प्रियत्वं अवैरत्वं च

01.9.04 प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः

01.9.05 स्वयं द्रष्टं प्रत्यक्षम्

01.9.06 पर उपदिष्टं परोक्षम्

01.9.07 कर्मसु कृतेनाकृतावेक्षणं अनुमेयम्

01.9.08 यौगपद्यात् तु कर्मणां अनेकत्वाद् अनेकस्थत्वाच्च देशकालात्ययो मा भूद् इति परोक्षं अमात्यैः कारयेत् इत्यमात्यकर्म ।

01.9.09 पुरोहितं उदित उदितकुलशीलं स-अङ्गे वेदे दैवे निमित्ते दण्डनीत्यां चाभिविनीतं आपदां दैवमानुषीणां अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत

01.9.10 तं आचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनं इव चानुवर्तेत

01.9.11ab ब्राह्मणेन एधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।

01.9.11chd जयत्यजितं अत्यन्तं शास्त्रानुगमशस्त्रितम् (इति)

Chapt | Ascertainment of the integrity or the absence of integrity of ministerbymeans of secret tests

01.10.01 मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वाऽमात्यान् उपधाभिः शोधयेत्

01.10.02 पुरोहितं अयाज्ययाजनाध्यापने नियुक्तं अमृष्यमाणं राजाऽवक्षिपेत्

01.10.03 स सत्रिभिः शपथपूर्वं एकैकं अमात्यं उपजापयेत् - अधार्मिको अयं राजा, साधु धार्मिकं अन्यं अस्य तत्कुलीनं अपरुद्धं कुल्यं एकप्रग्रहं सामन्तं आटविकं औपपादिकं वा प्रतिपादयामः, सर्वेषां एतद् रोचते, कथं वा तव इति

01.10.04 प्रत्याख्याने शुचिः । इति धर्म उपधा

01.10.05 सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्रिभिरेकैकं अमात्यं उपजापयेत् लोभनीयेनार्थेन राजविनाशाय, सर्वेषां एतद् रोचते, कथं वा तव इति

01.10.06 प्रत्याख्याने शुचिः । इत्यर्थ उपधा

01.10.07 परिव्राजिका लब्धविश्वासाऽन्तःपुरे कृतसत्कारा महामात्रं एकैकं उपजपेत् - राजमहिषी त्वां कामयते कृतसमागम उपाया, महान् अर्थश्च ते भविष्यति इति

01.10.08 प्रत्याख्याने शुचिः । इति काम उपधा

01.10.09 प्रहवणनिमित्तं एको अमात्यः सर्वान् अमात्यान् आवाहयेत्

01.10.10 तेन उद्वेगेन राजा तान् अवरुन्ध्यात्

01.10.11 कापटिकश्चात्र पूर्वावरुद्धः तेषां अर्थमानावक्षिप्तं एकैकं अमात्यं उपजपेत् - असत् प्रवृत्तो अयं राजा, साध्वेनं हत्वाऽन्यं प्रतिपादयामः, सर्वेषां एतद् रोचते, कथं वा तव इति

01.10.12 प्रत्याख्याने शुचिः । इति भय उपधा

01.10.13 तत्र धर्म उपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु कर्मसु स्थापयेत्, अर्थ उपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, काम उपधा शुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भय उपधाशुद्धान् आसन्नकार्येषु राज्ञः

01.10.14 सर्व उपधाशुद्धान् मन्त्रिणः कुर्यात्

01.10.15 सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषु उपयोजयेत्

01.10.16ab त्रिवर्गभयसंशुद्धान् अमात्यान् स्वेषु कर्मसु ।

01.10.16chd अधिकुर्याद् यथा शौचं इत्याचार्या व्यवस्थिताः

01.10.17ab न त्वेव कुर्याद् आत्मानं देवीं वा लक्ष्यं ईश्वरः ।

01.10.17chd शौचहेतोरमात्यानां एतत् कौटिल्यदर्शनम्

01.10.18ab न दूषणं अदुष्टस्य विषेण इवाम्भसश्चरेत् ।

01.10.18chd कदाचिद्द् हि प्रदुष्टस्य नाधिगम्येत भेषजम्

01.10.19ab कृता च कलुषाबुद्धिरुपधाभिश्चतुर्विधा ।

01.10.19chd नागत्वाऽन्तं निवर्तेत स्थिता सत्त्ववतां धृतौ

01.10.20ab तस्माद् बाह्यं अधिष्ठानं कृत्वा कार्ये चतुर्विधे ।

01.10.20chd शौचाशौचं अमात्यानां राजा मार्गेत सत्त्रिभिः (इति)

Chapt | Appointment of persons in secret service

01.11.01 उपधाभिः शुद्धामात्यवर्गो गूढपुरुषान् उत्पादयेत् कापटिक उदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् सत्त्रितीष्क्णरसदभिक्षुकीश्च

01.11.02 परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः

01.11.03 तं अर्थमानाभ्यां प्रोत्साह्य मन्त्री ब्रूयात् - राजानं मां च प्रमाणं कृत्वा यस्य यद् अकुशलं पश्यसि तत् तदानीं एव प्रत्यादिश इति

01.11.04 प्रव्रज्या प्रत्यवसितः प्रज्ञाशौचयुक्त उदास्थितः

01.11.05 स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्

01.11.06 कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान् प्रतिविदध्यात्

01.11.07 वृत्तिकामांश्च उपजपेत् - एतेन एव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले च उपस्थातव्यम् इति

01.11.08 सर्वप्रव्रजिताश्च स्वं स्वं वर्गं एवं उपजपेयुः

01.11.09 कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः

01.11.10 स कृषिकर्मप्रदिष्टायां भूमौ - इति समानं पूर्वेण

01.11.11 वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः

01.11.12 स वणिक्कर्मप्रदिष्टायां भूमौ - इति समानं पूर्वेण

01.11.13 मुण्डो जटिलो वा वृत्तिकामः तापसव्यञ्जनः

01.11.14 स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवमुष्टिं वा मासद्विमासान्तरं प्रकाशं अश्नीयात्, गूढं इष्टं आहारम्

01.11.15 वैदेहकान्तेवासिनश्च एनं समिद्धयोगैरर्चयेयुः

01.11.16 शिष्याश्चास्यावेदयेयुः - असौ सिद्धः सामेधिकः इति

01.11.17 समेधाशास्तिभिश्चाभिगतानां अङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजने अवसितान्यादिशेत् - अल्पलाभं अग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानं, इदं अद्य श्वो वा भविष्यति, इदं वा राजा करिष्यति इति

01.11.18 तद् अस्य गूढाः सत्त्रिणश्च सम्पादयेयुः

01.11.19 सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां राजभाग्यं अनुव्याहरेत्, मन्त्रिसम्योगं च ब्रूयात्

01.11.20 मन्त्री च एषां वृत्तिकर्मभ्यां वियतेत

01.11.21 ये च कारणाद् अभिक्रुद्धाः तान् अर्थमानाभ्यां शमयेत्, अकारणक्रुद्धांः तूष्णीं दण्डेन, राजद्विष्टकारिणश्च

01.11.22ab पूजिताश्चार्थमानाभ्यां राज्ञा राज उपजीविनाम् ।

01.11.22chd जानीयुः शौचं इत्येताः पञ्चसंस्थाः प्रकीर्तिताः (इति)

Chapt | Appointment of roving spies Rules for secret servants

01.12.01 ये चाप्यस्मबन्धिनो अवश्यभर्तव्याः ते लक्षणं अङ्गविद्यां जम्भकविद्यां मायागतं आश्रमधर्मं निमित्तं अन्तरचक्रं इत्यधीयानाः सत्त्रिणः, संसर्गविद्यां च

01.12.02 ये जनपदे शूराः त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुः ते तीक्ष्णाः

01.12.03 ये बन्धुषु निहस्नेहाः क्रूरा अलसाश्च ते रसदाः

01.12.04 परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यभिगच्छेत्

01.12.05 एतया मुण्डा वृषल्यो व्याख्याताः इति सञ्चाराः ।

01.12.06 तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृ समाहर्तृसम्निधातृप्रदेष्टृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषद्ऽध्यक्षदण्ड दुर्गान्तपालाटविकेषु श्रद्धेयदेशवेषशिल्पभाषाऽभिजनापदेशान् भक्तितः सामर्थ्ययोगाच्चापसर्पयेत्

01.12.07 तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहन उपग्राहिणः तीक्ष्णा विद्युः

01.12.08 तं सत्त्रिणः संस्थास्वर्पयेयुः

01.12.09 सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधक उदकपरिचारका रसदाः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः

01.12.10 तं भिक्षुक्यः संस्थास्वप्रयेयुः

01.12.11 संस्थानां अन्तेवासिनः संज्ञालिपिभिश्चारसञ्चारं कुर्युः

01.12.12 न चान्योन्यं संस्थाः ते वा विद्युः

01.12.13 भिक्षुकीप्रतिषेधे द्वाहस्थपरम्परा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा चारं निर्हरेयुः

01.12.14 दीर्घरोग उन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम्

01.12.15 त्रयाणां एकवाक्ये सम्प्रत्ययः

01.12.16 तेषां अभीक्ष्णविनिपाते तूष्णीन्दण्डः प्रतिषेधः

01.12.17 कण्टकशोधन उक्ताश्चापसर्पाः परेषु कृतवेतना वसेयुरसम्पातिनश्चारार्थम्

01.12.18 त उभयवेतनाः

01.12.19ab गृहीतपुत्रदारांश्च कुर्याद् उभयवेतनान् ।

01.12.19chd तांश्चारिप्रहितान् विद्यात् तेषां शौचं च तद्विधैः

01.12.20ab एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान् ।

01.12.20chd उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि

01.12.21ab अन्तर्गृहचराः तेषां कुब्जवामनपण्डकाः ।

01.12.21chd शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः

01.12.22ab दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः ।

01.12.22chd कर्षक उदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः

01.12.23ab वने वनचराः कार्याः श्रमणाटविकादयः ।

01.12.23chd परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः

01.12.24ab परस्य च एते बोद्धव्याः तादृशैरेव तादृशाः ।

01.12.24chd चारसञ्चारिणः संस्था गूढाश्चागूढसंज्ञिताः

01.12.25ab अकृत्यान् कृत्यपक्षीयैर्दर्शितान् कार्यहेतुभिः ।

01.12.25chd परापसर्पज्ञानार्थं मुख्यान् अन्तेषु वासयेत् (इति)

Chapt | keeping a watch over the seducible and non-seducible parties in ones own territorय्

01.13.01 कृतमहामात्रापसर्पः पौरजानपदान् अपसर्पयेत्

01.13.02 सत्त्रिणो द्वन्द्विनः तीर्थसभापूगजनसमवायेषु विवादं कुर्युः

01.13.03 सर्वगुणसम्पन्नश्चायं राजा श्रूयते, न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति

01.13.04 तत्र येऽनुप्रशंसेयुः तान् इतरः तं च प्रतिषेधयेत्

01.13.05 मात्स्यन्याया‌भिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे

01.13.06 धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयाम्-आसुः

01.13.07 तेन भृता राजानः प्रजानां योगक्षेमावहाः

01.13.08 तेषां किल्बिषं अदण्डकरा हरन्त्ययोगक्षेमावहाश्च प्रजानाम्

01.13.09 तस्माद् उञ्छषड्भागं आरण्यकाऽपि निर्वपन्ति - तस्य एतद् भागधेयं योऽस्मान् गोपायति इति

01.13.10 इन्द्रयमस्थानं एतद् राजानः प्रत्यक्षहेडप्रसादाः

01.13.11 तान् अवमन्यमानान् दैवोऽपि दण्डः स्पृशति

01.13.12 तस्माद् राजानो नावमन्तव्याः

01.13.13 इत्येवं क्षुद्रकान् प्रतिषेधयेत्

01.13.14 किंवदन्तीं च विद्युः

01.13.15 ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसनेऽभ्युदये वा, कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रं आटविकं वा प्रतिषेधयन्ति, तेषां मुण्डजटिलव्यञ्जनाः तुष्टातुष्टत्वं विद्युः

01.13.16 तुष्टान् भूयोऽर्थमानाभ्यां पूजयेत्

01.13.17 अतुष्टांः तुष्टिहेतोः त्यागेन साम्ना च प्रसादयेत्

01.13.18 परस्पराद् वा भेदयेद् एनान्, सामन्ताटविकतत्कुलीनापरुद्धेभ्यश्च

01.13.19 तथाऽप्यतुष्यतो दण्डकरसाधनाधिकारेण जनपदविद्वेषं ग्राहयेत्

01.13.20 विविष्टान् उपांशुदण्डेन जनपदकोपेन वा साधयेत्

01.13.21 गुप्तपुत्रदारान् आकरकर्मान्तेषु वा वासयेत् परेषां आस्पदभयात्

01.13.22 क्रुद्धलुब्धभीतमानिनः तु परेषां कृत्याः

01.13.23 तेषां कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धं अमित्राटविकसम्बन्धं वा विद्युः

01.13.24 तुष्टान् अर्थमानाभ्यां पूजयेत् ।

01.13.25 अतुष्टान् सामदानभेददण्डैः साधयेत्

01.13.26ab एवं स्वविषये कृत्यान् अकृत्यांश्च विचक्षणः ।

01.13.26chd पर उपजापात् सम्रक्षेत् प्रधानान् क्षुद्रकान् अपि (इति)

Chapt | Winning over the seducible and non-seducible parties in the enemy territor्य्

01.14.01 कृत्याकृत्यपक्ष उपग्रहः स्वविषये व्याख्यातः, परविषये वाच्यः

01.14.02 संश्रुत्यार्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वा उपकारे वा विमानितः, वल्लभावरुद्धः,

समाहूय पराजितः, प्रवास उपतप्तः, कृत्वा व्ययं अलब्धकार्यः, स्वधर्माद् दायाद्याद् वा उपरुद्धः,

मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः,

पर उक्तदण्डितः, मिथ्याऽऽचारवारितः, सर्वस्वं आहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुः

इति क्रुद्धवर्गः

01.14.03 स्वयं उपहतः, विप्रकृतः, पापकर्माभिख्यातः, तुल्यदोषदण्डेन उद्विग्नः, पर्याप्तभूमिः, दण्डेन उपनतः, सर्वाधिकरणस्थः, सहसा उपचितार्थः, तत्कुलीन उपाशंसुः, प्रद्विष्टो राज्ञा, राजद्वेषी च - इति भीतवर्गः

01.14.04 परिक्षीणः, अन्यात्तस्वः, कदर्यः, व्यसनी, अत्याहितव्यवहारश्च - इति लुब्धवर्गः

01.14.05 आत्मसम्भावितः, मानकामः, शत्रुपूजाऽमर्षितः, नीचैरुपहितः, तीक्ष्णः, साहसिकः, भोगेनासन्तुष्टः - इति मानिवर्गः

01.14.06 तेषां मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयः तं तेन उपजापयेत्

01.14.07 यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद् यद् आसादयति तत् सर्वं प्रमृद्नाति, एवं अयं अशास्त्रचक्षुरन्धो राजा पौरजानपदवधायाभ्युत्थितः, शक्यं अस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुं, अमर्षः क्रियताम् इति क्रुद्धवर्गं उपजापयेत्

01.14.08 यथा लीनः सर्पो यस्माद् भयं पश्यति तत्र विषं उत्सृजति, एवं अयं राजा जातदोषाशङ्कः त्वयि पुरा क्रोधविषं उत्सृजति, अन्यत्र गम्यताम् इति भीतवर्गं.उपजापयेत्

01.14.09 यथा श्वगणिनां धेनुः श्वभ्यो दुह्यते न ब्राह्मणेभ्यः, एवं अयं राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुह्यते नात्मगुणसम्पन्नेभ्यः, असौ राजा पुरुषविशेषज्ञः, तत्र गम्यताम् इति लुब्धवर्गं.उपजापयेत्

01.14.10 यथा चण्डाल उदपानश्चण्डालानां एव उपभोग्यो नान्येषां, एवं अयं राजा नीचो नीचानां एव उपभोग्यो न त्वद्विधानां आर्याणां, असौ राजा पुरुषविशेषज्ञः, तत्र गम्यताम् इति मानिवर्गं उपजापयेत्

01.14.11ab तथा इति प्रतिपन्नांः तान् संहितान् पणकर्मणा ।

01.14.11chd योजयेत यथाशक्ति स-अपसर्पान् स्वकर्मसु

01.14.12ab लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु ।

01.14.12chd अकृत्यान् भेददण्डाभ्यां परदोषांश्च दर्शयन् (इति)

Chapt | The topic of counsel

01.15.01 कृतस्वपक्षपरपक्ष उपग्रहः कार्यारम्भांश्चिन्तयेत्

01.15.02 मन्त्रपूर्वाः सर्वारम्भाः

01.15.03 तद्.उद्देशः संवृतः कथानां अनिहश्रावी पक्षिभिरप्यनालोक्यः स्यात् ।

01.15.04 श्रूयते हि शुकसारिकाभिर्मन्त्रो भिन्नः, श्वभिरप्यन्यैश्च तिर्यग्योनिभिरिति

01.15.05 तस्मान् मन्त्र उद्देशं अनायुक्तो न उपगच्छेत्

01.15.06 उच्छिद्येत मन्त्रभेदी

01.15.07 मन्त्रभेदो हि दूतामात्यस्वामिनां इङ्गिताकाराभ्याम्

01.15.08 इङ्गितं अन्यथावृत्तिः

01.15.09 आकृतिग्रहणं आकारः

01.15.10 तस्य संवरणं आयुक्तपुरुषरक्षणं आकार्यकालाद् इति

01.15.11 तेषां हि प्रमादमदसुप्तप्रलापाः, कामादिरुत्सेकः, प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति

01.15.12 तस्माद् आद्रक्षेन् मन्त्रम्

01.15.13 मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञः तद्ऽअयुक्तपुरुषाणां च

01.15.14 तस्माद् गुह्यं एको मन्त्रयेत इति भारद्वाजः

01.15.15 मन्त्रिणां अपि हि मन्त्रिणो भवन्ति, तेषां अप्यन्ये

01.15.16 सा एषा मन्त्रिपरम्परा मन्त्रं भिनत्ति

01.15.17ab तस्मान्नास्य परे विद्युः कर्म किञ्चिच्चिकीर्षितम् ।

01.15.17chd आरब्धारः तु जानीयुरारब्धं कृतं एव वा

01.15.18 न एकस्य मन्त्रसिद्धिरस्ति इति विशालाक्षः

01.15.19 प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः

01.15.20 अनुपलब्धस्य ज्ञानं उपलब्धस्य निश्चितबलाधानं अर्थद्वैधस्य संशयच्छेदनं एकदेशदृष्टस्य शेष उपलब्धिरिति मन्त्रिसाध्यं एतत्

01.15.21 तस्माद् बुद्धिवृद्धैः सार्धं अध्यासीत मन्त्रम्

01.15.22ab न कञ्चिद् अवमन्येत सर्वस्य शृणुयान् मतम् ।

01.15.22chd बालस्याप्यर्थवद्वाक्यं उपयुञ्जीत पण्डितः ।

01.15.23 एतन् मन्त्रज्ञानं, न एतन् मन्त्ररक्षणम् इति पाराशराः

01.15.24 यद् अस्य कार्यं अभिप्रेतं तत्प्रतिरूपकं मन्त्रिणः पृच्छेत् - कार्यं इदं एवं आसीत्, एवं वा यदि भवेत्, तत् कथं कर्तव्यम् इति

01.15.25 ते यथा ब्रूयुः तत् कुर्यात्

01.15.26 एवं मन्त्र उपलब्धिः संवृतिश्च भवति इति

01.15.27 न इति पिशुनः

01.15.28 मन्त्रिणो हि व्यवहितं अर्थं वृत्तं अवृत्तं वा पृष्टा अनादरेण ब्रुवन्ति प्रकाशयन्ति वा

01.15.29 स दोषः

01.15.30 तस्मात् कर्मसु ये येष्वभिप्रेताः तैः सह मन्त्रयेत

01.15.31 तैर्मन्त्रयमाणो हि मन्त्रसिद्धिं गुप्तिं च लभते इति

01.15.32 न इति कौटिल्यः

01.15.33 अनवस्था ह्येषा

01.15.34 मन्त्रिभिः त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत

01.15.35 मन्त्रयमाणो ह्येकेनार्थकृच्छ्रेषु निश्चयं नाधिगच्छेत्

01.15.36 एकश्च मन्त्री यथा इष्टं अनवग्रहश्चरति

01.15.37 द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यां अवगृह्यते, विगृहीताभ्यां विनाश्यते

01.15.38 तत् त्रिषु चतुषु वा कृच्छ्रेण उपपद्यते

01.15.39 महादोषं उपपन्नं तु भवति

01.15.40 ततः परेषु कृच्छ्रेणार्थनिश्चयो गम्यते, मन्त्रो वा रक्ष्यते

01.15.41 देशकालकार्यवशेन त्वेकेन सह द्वाभ्यां एको वा यथासामर्थ्यं मन्त्रयेत

alterNative views approved

01.15.42 कर्मणां आरम्भ उपायः पुरुषद्रव्यसम्पद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः

01.15.43 तान् एकैकशः पृच्छेत् समस्तांश्च

01.15.44 हेतुभिश्च एषां मतिप्रविवेकान् विद्यात्

01.15.45 अवासार्थः कालं नातिक्रामयेत्

01.15.46 न दीर्घकालं मन्त्रयेत, न तेषां पक्षीयैर्येषां अपकुर्यात्

01.15.47 मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीत इति मानवाः

01.15.48 षोडश इति बार्हस्पत्याः

01.15.49 विंशतिम् इत्यौशनसाः

01.15.50 यथासामर्थ्यं इति कौटिल्यः

01.15.51 ते ह्यस्य स्वपक्षं परपक्षं च चिन्तयेयुः

01.15.52 अकृतारम्भं आरब्धानुष्ठानं अनुष्ठितविशेषं नियोगसम्पदं च कर्मणां कुर्युः

01.15.53 आसन्नैः सह कर्माणि पश्येत्

01.15.54 अनासन्नैः सह पत्त्रसम्प्रेषणेन मन्त्रयेत

01.15.55 इन्द्रस्य हि मन्त्रिपरिषद्.ऋषीणां सहस्रम्

01.15.56 स तच्चक्षुः

01.15.57 तस्माद् इमं द्व्यऽक्षं सहस्राक्षं आहुः

01.15.58 आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात्

01.15.59 तत्र यद्भूयिष्ठा ब्रूयुः कार्यसिद्धिकरं वा तत् कुर्यात्

01.15.60 कुर्वतश्च

01.15.60ab नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च ।

01.15.60chd गूहेत् कूर्म इवाङ्गानि यत् स्याद् विवृतं आत्मनः

01.15.61ab यथा ह्यश्रोत्रियः श्राद्धं न सतां भोक्तुं अर्हति ।

01.15.61chd एवं अश्रुतशास्त्रार्थो न मन्त्रं श्रोतुं अर्हति (इति)

Chapt | Rules for the envoय्

01.16.01 उद्वृत्तमन्त्रो दूतप्रणिधिः

01.16.02 अमात्यसम्पदा उपेतो निसृष्टार्थः

01.16.03 पादगुणहीनः परिमितार्थः

01.16.04 अर्धगुणहीनः शासनहरः

01.16.05 सुप्रतिविहितयानवाहनपुरुषपरिवापः प्रतिष्ठेत

01.16.06 शासनं एवं वाच्यः परः, स वक्ष्यत्येवं, तस्य इदं प्रतिवाक्यं, एवं अतिसन्धातव्यं, इत्यधीयानो गच्छेत्

01.16.07 अटव्यऽन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत्

01.16.08 अनीकस्थानयुद्धप्रतिग्रहापसारभूमीरात्मनः परस्य चावेक्षेत

01.16.09 दुर्गराष्ट्रप्रमाणं सारवृत्तिगुप्तिच्छिद्राणि च उपलभेत

01.16.10 पराधिष्ठानं अनुज्ञातः प्रविशेत्

01.16.11 शासनं च यथा उक्तं ब्रूयात्, प्राणाबाधेऽपि दृष्टे

01.16.12 परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं वाक्यपूजनं इष्टपरिप्रश्नं गुणकथासङ्गं आसन्नं आसनं सत्कारं इष्टेषु स्मरणं विश्वासगमनं च लक्षयेत् तुष्टस्य, विपरीतं अतुष्टस्य

01.16.13 तं ब्रूयात् - दूतमुखा हि राजानः, त्वं चान्ये च

01.16.14 तस्माद् उद्यतेष्वपि शस्त्रेषु यथा उक्तं वक्तारो दूताः

01.16.15 तेषां अन्तावसायिनोऽप्यवध्याः, किं अङ्ग पुनर्ब्राह्मणाः

01.16.16 परस्य एतद् वाक्यम्

01.16.17 एष दूतधर्मः इति

01.16.18 वसेद् अविसृष्टः पूजया न उत्सिक्तः

01.16.19 परेषु बलित्वं न मन्येत

01.16.20 वाक्यं अनिष्टं सहेत

01.16.21 स्त्रियः पानं च वर्जयेत्

01.16.22 एकः शयीत

01.16.23 सुप्तमत्तयोर्हि भावज्ञानं दृष्टम्

01.16.24 कृत्यपक्ष उपजापं अकृत्यपक्षे गूढप्रणिधानं रागापरागौ भर्तरि रन्ध्रं च प्रकृतीनां तापसवैदेहकव्यञ्जनाभ्यां उपलभेत, तयोरन्तेवासिभिश्चिकित्सकपाषण्डव्यञ्जन उभयवेतनैर्वा

01.16.25 तेषां असम्भाषायां याचकमत्त उन्मत्तसुप्तप्रलापैः पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा चारं उपलभेत

01.16.26 उपलब्धस्य उपजापं उपेयात्

01.16.27 परेण च उक्तः स्वासां प्रकृतीनां प्रमाणं नाचक्षीत

01.16.28 सर्वं वेद भवान् इति ब्रूयात्, कार्यसिद्धिकरं वा

01.16.29 कार्यस्यासिद्धावुपरुध्यमानः तर्कयेत् - किं भर्तुर्मे व्यसनं आसन्नं पश्यन्, स्वं वा व्यसनं प्रतिकर्तुकामः, पार्ष्णिग्राहं आसारं अन्तःकोपं आटविकं वा समुत्थापयितुकामः, मित्रं आक्रन्दं वा व्याघातयितुकामः, स्वं वा परतो विग्रहं अन्तःकोपं आटविकं वा प्रतिकर्तुकामः, संसिद्धं वा मे भर्तुर्यात्राकालं अभिहन्तुकामः, सस्यपण्यकुप्यसङ्ग्रहं दुर्गकर्म बलसमुद्दानं वा कर्तुकामः, स्वसैन्यानां वा व्यायामस्य देशकालावाकाङ्क्षमाणः, परिभवप्रमादाभ्यां वा, संसर्गानुबन्धार्थी वा, मां उपरुणद्धि इति

01.16.30 ज्ञात्वा वसेद् अपसरेद् वा

01.16.31 प्रयोजनं इष्टं अवेक्षेत वा

01.16.32 शासनं अनिष्टं उक्त्वा बन्धवधभयाद् अविसृष्टोऽप्यपगच्छेत्, अन्यथा नियम्येत

01.16.33ab प्रेषणं सन्धिपालत्वं प्रतापो मित्रसङ्ग्रहः ।

01.16.33chd उपजापः सुहृद्भेदो गूढदण्डातिसारणम्

01.16.34ab बन्धुरत्नापहरणं चारज्ञानं पराक्रमः ।

01.16.34chd समाधिमोक्षो दूतस्य कर्म योगस्य चाश्रयः

01.16.35ab स्वदूतैः कारयेद् एतत् परदूतांश्च रक्षयेत् ।

01.16.35chd प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैश्च रक्षिभिः (इति)

Chapt | Guarding against princes

01.17.01 रक्षितो राजा राज्यं रक्षत्यासन्नेभ्यः परेभ्यश्च, पूर्वं दारेभ्यः पुत्रेभ्यश्च

01.17.02 दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः

01.17.03 पुत्ररक्षणं तु

01.17.04 जन्मप्रभृति राजपुत्रान् रक्षेत्

01.17.05 कर्कटकसधर्माणो हि जनकभक्षा राजपुत्राः

01.17.06 तेषां अजातस्नेहे पितर्युपांशुदण्डः श्रेयान् इति भारद्वाजः

01.17.07 नृशंसं अदुष्टवधः क्षत्रबीजविनाशश्च इति विशालाक्षः

01.17.08 तस्माद् एकस्थानावरोधः श्रेयान् इति

01.17.09 अहिभयं एतद् इति पाराशराः

01.17.10 कुमारो हि विक्रमभयान् मां पिताऽवरुणद्धि इति ज्ञात्वा तं एवाङ्के कुर्यात्

01.17.11 तस्माद् अन्तपालदुर्गे वासः श्रेयान् इति

01.17.12 औरभ्रं भयं एतद् इति पिशुनः

01.17.13 प्रत्यापत्तेर्हि तद् एव कारणं ज्ञात्वाऽन्तपालसखः स्यात्

01.17.14 तस्मात् स्वविषयाद् अपकृष्टे सामन्तदुर्गे वासः श्रेयान् इति

01.17.15 वत्सस्थानं एतद् इति कौणपदन्तः

01.17.16 वत्सेन इव हि धेनुं पितरं अस्य सामन्तो दुह्यात्

01.17.17 तस्मान् मातृबन्धुषु वासः श्रेयान् इति

01.17.18 ध्वजस्थानं एतद् इति वातव्याधिः

01.17.19 तेन हि ध्वजेनादितिकौशिकवद् अस्य मातृबान्धवा भिक्षेरन्

01.17.20 तस्माद् ग्राम्य सुखेष्वेनं अवसृजेत्

01.17.21 सुख उपरुद्धा हि पुत्राः पितरं नाभिद्रुह्यन्ति इति

01.17.22 जीवन्मरणं एतद् इति कौटिल्यः

01.17.23 काष्ठं इव घुणजग्धं राजकुलं अविनीतपुत्रं अभियुक्तमात्रं भज्येत

01.17.24 तस्माद् ऋतुमत्यां महिष्यां ऋत्विजश्चरुं ऐन्द्राबार्हस्पत्यं निर्वपेयुः

01.17.25 आपन्नसत्त्वायाः कौमारभृत्यो गर्भभर्मणि प्रसवे च वियतेत

01.17.26 प्रजातायाः पुत्रसंस्कारं पुरोहितः कुर्यात्

01.17.27 समर्थं तद्विदो विनयेयुः

01.17.28 सत्त्रिणां एकश्च एनं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत् पितरि विक्रम्य राज्यं गृहाण इति

01.17.29 तं अन्यः सत्त्री प्रतिषेधयेत् इत्याम्भीयाः

01.17.30 महादोषं अबुद्धबोधनं इत् कौटिल्यः

01.17.31 नवं हि द्रव्यं येन येनार्थजातेन उपदिह्यते तत् तद् आचूषति

01.17.32 एवं अयं नवबुद्धिर्यद् यद् उच्यते तत् तत्शास्त्र उपदेशं इवाभिजानाति

01.17.33 तस्माद् धर्म्यं अर्थ्यं चास्य उपदिशेन्नाधर्म्यं अनर्थ्यं च

01.17.34 सत्त्रिणः त्वेनं तव स्मः इति वदन्तः पालयेयुः

01.17.35 यौवन उत्सेकात् परस्त्रीषु मनः कुर्वाणं आर्याव्यञ्जनाभिः स्त्रीभिरमेध्याभिः शून्यागारेषु रात्रावुद्वेजयेयुः

01.17.36 मद्यकामं योगपानेन उद्वेजयेयुः

01.17.37 द्यूतकामं कापटिकैरुद्वेजयेयुः

01.17.38 मृगयाकामं प्रतिरोधकव्यञ्जनैः त्रासयेयुः

01.17.39 पितरि विक्रमबुद्धिं तथा इत्यनुप्रविश्य भेदयेयुः - अप्रार्थनीयो राजा, विपन्ने घातः, सम्पन्ने नरकपातः, सङ्क्रोशः, प्रजाभिरेकलोष्टवधश्च इति

01.17.40 विरागं वेदयेयुः

01.17.41 प्रियं एकपुत्रं बध्नीयात्

01.17.42 बहुपुत्रः प्रत्यन्तं अन्यविषयं वा प्रेषयेद् यत्र गर्भः पण्यं डिम्बो वा न भवेत्

01.17.43 आत्मसम्पन्नं सैनापत्ये यौवराज्ये वा स्थापयेत्

01.17.44 बुद्धिमान्ऽअहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः

01.17.45 शिष्यमाणो धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान्

01.17.46 उपलभमानो नानुतिष्ठत्याहार्यबुद्धिः

01.17.47 अपायनित्यो धर्मार्थद्वेषी च इति दुर्बुद्धिः

01.17.48 स यद्येकपुत्रः पुत्र उत्पत्तावस्य प्रयतेत

01.17.49 पुत्रिकापुत्रान् उत्पादयेद् वा

01.17.50 वृद्धः तु व्याधितो वा राजा मातृबन्धुकुल्यगुणवत्सामन्तानां अन्यतमेन क्षेत्रे बीजं उत्पादयेत्

01.17.51 न च एकपुत्रं अविनीतं राज्ये स्थापयेत्

01.17.52ab बहूनां एकसम्मोधः पिता पुत्रहितो भवेत् ।

01.17.52chd अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते

01.17.53ab कुलस्य वा भवेद् राज्यं कुलसङ्घो हि दुर्जयः ।

01.17.53chd अराजव्यसनाबाधः शश्वद् आवसति क्षितिम् (इति)

Chapt | The conduct of a prince in disfavour
Behaviour towards a prince in disfavour

01.18.01 विनीतो राजपुत्रः कृच्छ्रवृत्तिरसदृशे कर्मणि नियुक्तः पितरं अनुवर्तेत, अन्यत्र प्राणाबाधकप्रकृतिकोपकपातकेभ्यः

01.18.02 पुण्ये कर्मणि नियुक्तः पुरुषं अधिष्ठातारं याचेत्

01.18.03 पुरुषाधिष्ठितश्च सविशेषं आदेशं अनुतिष्ठेत्

01.18.04 अभिरूपं च कर्मफलं औपायनिकं च लाभं पितुरुपनाययेत्

01.18.05 तथाऽप्यतुष्यन्तं अन्यस्मिन् पुत्रे दारेषु वा स्निह्यन्तं अरण्यायापृच्छेत

01.18.06 बन्धवधभयाद् वा यः सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवाग्ऽविसंवादकः प्रतिग्रहीता मानयिता चाभिपन्नानां तं आश्रयेत

01.18.07 तत्रस्थः कोशदण्डसम्पन्नः प्रवीरपुरुषकन्यासम्बन्धं अटवीसम्बन्धं कृत्यपक्ष उपग्रहं च कुर्यात्

01.18.08 एकचरः सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तान् आजीवेत्

01.18.09 पाषण्डसङ्घद्रव्यं अश्रोत्रिय उपभोग्यं वा देवद्रव्यं आढ्यविधवाद्रव्यं वा गूढं अनुप्रविश्य सार्थयानपात्राणि च मदनरसयोगेनातिसन्धायापहरेत्

01.18.10 पारग्रामिकं वा योगं आतिष्ठेत्

01.18.11 मातुः परिजन उपग्रहेण वा चेष्टेत

01.18.12 कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषण्डच्छद्मभिर् वा नष्टरूपः तद्व्यञ्जनसखश्छिद्रेषु प्रविश्य राज्ञः शस्त्ररसाभ्यां प्रहृत्य ब्रूयात् - अहं असौ कुमारः, सहभोग्यं इदं राज्यं, एको नार्हति भोक्तुं, ये कामयन्ते मां भर्तुं तान् अहं द्विगुणेन भक्तवेतनेन उपस्थास्यामि इति इत्यपरुद्धवृत्तम् ।

01.18.13 अपरुद्धं तु मुख्यपुत्रापसर्पाः प्रतिपाद्यानयेयुः, माता वा प्रतिगृहीता

01.18.14 त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः

01.18.15 अत्यक्तं तुल्यशीलाभिः स्त्रीभिः पानेन मृगयया वा प्रसञ्जयित्वा रात्रावुपगृह्यानयेयुः

01.18.16ab उपस्थितं च राज्येन मद्.ऊर्ध्वं इति सान्त्वयेत् ।

01.18.16chd एकस्थं अथ समुन्ध्यात् पुत्रवांः तु प्रवासयेत् (इति)

Chapt | Rules for the king

01.19.01 राजानं उत्थितं अनूत्तिष्ठन्ते भृत्याः

01.19.02 प्रमाद्यन्तं अनुप्रमाद्यन्ति

01.19.03 कर्माणि चास्य भक्षयन्ति

01.19.04 द्विषद्भिश्चातिसन्धीयते ।

01.19.05 तस्माद् उत्थानं आत्मनः कुर्वीत

01.19.06 नालिकाभिरहरष्टधा रात्रिं च विभजेत्, छायाप्रमाणेन वा

01.19.07 त्रिपौरुषी पौरुषी चतुर्ऽङ्गुला नष्टच्छायो मध्याह्न इति चत्वारः पूर्वे दिवसस्याष्टभागाः

01.19.08 तैः पश्चिमा व्याख्याताः

01.19.09 तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधानं आयव्ययौ च शृणुयात्

01.19.10 द्वितीये पौरजानपदानां कार्याणि पश्येत्

01.19.11 तृतीये स्नानभोजनं सेवेत, स्वाध्यायं च कुर्वीत

01.19.12 चतुर्थे हिरण्यप्रतिग्रहं अध्यक्षांश्च कुर्वीत

01.19.13 पञ्चमे मन्त्रिपरिषदा पत्त्रसम्प्रेषणेन मन्त्रयेत, चारगुह्यबोधनीयानि च बुध्येत

01.19.14 षष्ठे स्वैरविहारं मन्त्रं वा सेवेत

01.19.15 सप्तमे हस्त्यऽश्वरथायुधीयान् पश्येत्

01.19.16 अष्टमे सेनापतिसखो विक्रमं चिन्तयेत्

01.19.17 प्रतिष्ठितेऽहनि सन्ध्यां उपासीत

01.19.18 प्रथमे रात्रिभागे गूढपुरुषान् पश्येत्

01.19.19 द्वितीये स्नानभोजनं कुर्वीत, स्वाध्यायं च

01.19.20 तृतीये तूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत

01.19.21 षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रं इतिकर्तव्यतां च चिन्तयेत्

01.19.22 सप्तमे मन्त्रं अध्यासीत, गूढपुरुषांश्च प्रेषयेत्

01.19.23 अष्टमे ऋत्विग्ऽअचार्यपुरोहितस्वस्त्ययनानि प्रतिगृह्णीयात्, चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येत्

01.19.24 सवस्तां धेनुं वृषभं च प्रदक्षिणीकृत्य उपस्थानं गच्छेत्

01.19.25 आत्मबलानुकूल्येन वा निशाऽहर्भागान् प्रविभज्य कार्याणि सेवेत

01.19.26 उपस्थानगतः कार्यार्थिनां अद्वारासङ्गं कारयेत्

01.19.27 दुर्दर्शो हि राजा कार्याकार्यविपर्यासं आसन्नैः कार्यते

01.19.28 तेन प्रकृतिकोपं अरिवशं वा गच्छेत्

01.19.29 तस्माद् देवताऽऽश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितव्यसन्य्ऽनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्, कार्यगौरवाद् आत्ययिकवशेन वा

01.19.30ab सर्वं आत्ययिकं कार्यं शृणुयान्नातिपातयेत् .

01.19.30chd कृच्छ्रसाध्यं अतिक्रान्तं असाध्यं वाऽपि जायते

01.19.31ab अग्न्य्ऽगारगतः कार्यं पश्येद् वैद्यतपस्विनाम् .

01.19.31chd पुरोहिताचार्यसखः प्रत्युत्थायाभिवाद्य च

01.19.32ab तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत् .

01.19.32chd मायायोगविदां चैव न स्वयं कोपकारणात्

01.19.33ab राज्ञो हि व्रतं उत्थानं यज्ञः कार्यानुशासनम् .

01.19.33chd दक्षिणा वृत्तिसाम्यं तु दीक्षा तस्याभिऽएचनम्

01.19.34ab प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् .

01.19.34chd नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्

01.19.35ab तस्मान्नित्य उत्थितो राजा कुर्याद् अर्थानुशासनम् ।

01.19.35chd अर्थस्य मूलं उत्थानं अनर्थस्य विपर्ययः

01.19.36ab अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च .

01.19.36chd प्राप्यते फलं उत्थानाल्लभते चार्थसम्पदम् (इति)

Chapt | Regulation for the royal residence

01.20.01 वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारं अनेककक्ष्यापरिगतं अन्तःपुरं कारयेत्

01.20.02 कोशगृहविधानेन मध्ये वासगृहं, गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वाऽसन्नचैत्यकाष्ठदेवताऽपिधानद्वारं अनेकसुरुङ्गासञ्चारं तस्य ऽपरि प्रासादं गूढभित्तिसोपानं सुषिरस्तम्भप्रवेशापसारं वा वासगृहं यन्त्रबद्धतलावपातं कारयेत्, आपत्प्रतीकारार्थं आपदि वा

01.20.03 अतोऽन्यथा वा विकल्पयेत्, सहाध्यायिभयात्

01.20.04 मानुषेणाग्निना त्रिरपसव्यं परिगतं अन्तःपुरं अग्निरन्यो न दहति, न चात्रान्योऽग्निर्ज्वलति, वैद्युतेन भस्मना मृत्सम्युक्तेन करकवारिणाऽवलिप्तं च

01.20.05 जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिरक्षीवे जातस्याश्वत्थस्य प्रतानेन गुप्तं सर्पा विषाणि वा न प्रभवन्ति

01.20.06 मयूरनकुलपृषत ऽत्सर्गः सर्पान् भक्षयति

01.20.07 शुकः सारिका भृङ्गराजो वा सर्पविषशङ्कायां क्रोशति

01.20.08 क्रौञ्चो विषाभ्याशे माद्यति, ग्लायति जीवञ्जीवकः, म्रियते मत्तकोकिलः, चकोरस्याक्षिणी विरज्येते

01.20.09 इत्येवं अग्निविषसर्पेभ्यः प्रतिकुर्वीत

01.20.10 पृष्ठतः कक्ष्याविभागे स्त्रीनिवेशो गर्भव्याधिसंस्था वृक्ष ऽदकस्थानं च

01.20.11 बहिः कन्याकुमारपुरम्

01.20.12 पुरस्ताद् अलङ्कारभूमिर्मन्त्रभूमिरुपस्थानं कुमाराध्यक्षस्थानं च

01.20.13 कक्ष्यान्तरेष्वन्तर्वंशिकसैन्यं तिष्ठेत्

01.20.14 अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत्

01.20.15 देवीगृहे लीनो हि भ्राता भद्रसेनं जघान, मातुः शय्याऽन्तर्गतश्च पुत्रः कारूषम्

01.20.16 लाजान् मधुना इति विषेण पर्यस्य देवी काशिराजं, विषदिग्धेन नूप्रेण वैरन्त्यं, मेखलामणिना सौवीरं, जालूथं आदर्शेन, वेण्यां गूढं शस्त्रं कृत्वा देवी विदूरथं जघान

01.20.17 तस्माद् एतान्यास्पदानि परिहरेत्

01.20.18 मुण्डजटिलकुहकप्रतिसंसर्गं बाह्याभिश्च दासीभिः प्रतिषेधयेत्

01.20.19 न च एनाः कुल्याः पश्येयुः, अन्यत्र गर्भव्याधिसंस्थाभ्यः

01.20.20 रूपाजीवाः स्नानप्रघर्षशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येयुः

01.20.21 अशीतिकाः पुरुषाः पञ्चाशत्काः स्त्रियो वा मातापितृव्यञ्जनाः स्थविरवर्षधराभ्यागारिकाश्चावरोधानां शौचाशौचं विद्युः, स्थापयेयुश्च स्वामिहिते,

01.20.22ab स्वभूमौ च वसेत् सर्वः परभूमौ न सञ्चरेत् .

01.20.22chd न च बाह्येन संसर्गं कश्चिद् आभ्यन्तरो व्रजेत्

01.20.23ab सर्वं चावेक्षितं द्रव्यं निबद्धागमनिर्गमम् .

01.20.23chd निर्गच्छेद् अभिगच्छेद् वा मुद्रासङ्क्रान्तभूमिकम् (इति)

Chapt | Concerning the protection of (the kings) own person

01.21.01 शयनाद् उत्थितः स्त्रीगणैर्धन्विभिः परिगृह्यते, द्वितीयस्यां कक्ष्यायां कञ्चुक उष्णीषिभिर्वर्षधराभ्यागारिकैः, तृतीयस्यां कुब्जवामनकिरातैः, चतुर्थ्यां मन्त्रिभिः सम्बन्धिभिर्दौवारिकैश्च प्रासपाणिभिः

01.21.02 पितृपैतामहं सम्बन्धानुबद्धं शिक्षितं अनुरक्तं कृतकर्माणं च जनं आसन्नं कुर्वीत, नान्यतोदेशीयं अकृतार्थमानं स्वदेशीयं वाऽप्यपकृत्य उपगृहीतम्

01.21.03 अन्तर्वंशिकसैन्यं राजानं अन्तःपुरं च रक्षेत्

01.21.04 गुप्ते देशे माहानसिकः सर्वं आस्वादबाहुल्येन कर्म कारयेत्

01.21.05 तद् रजा तथैव प्रतिभुञ्जीत पूर्वं अग्नये वयोभ्यश्च बलिं कृत्वा

01.21.06 अग्नेर्ज्वालाधूमनीलता शब्दस्फोटनं च विषयुक्तस्य, वयसां विपत्तिश्च

01.21.07a अन्नस्य ऊष्मा मयूरग्रीवाभः शैत्यं आशु क्लिष्टस्य इव वैवर्ण्यं स-उदकत्वं अक्लिन्नत्वं च

01.21.07b व्यञ्जनानां आशु शुष्कत्वं च क्वाथध्यामफेनपटलविच्छिन्नभावो गन्धस्पर्शरसवधश्च

01.21.07ch द्रवेषु हीनातिरिक्तच्छायादर्शनं फेनपटलसीमन्त ऊर्ध्वराजीदर्शनं च

01.21.07d रसस्य मध्ये नीला राजी, पयसः ताम्रा, मद्यतोययोः काली, दध्नः श्यामा, मधुनः श्वेता, द्रव्याणां आर्द्राणां आशु प्रम्लानत्वं उत्पक्वभावः क्वाथनीलश्यावता च

01.21.07e शुष्काणां आशु शातनं वैवर्ण्यं च,

01.21.07f कठिनानां मृदुत्वं मृदूनां च कठिनत्वं, तद्ऽभ्याशे क्षुद्रसत्त्ववधश्च,

01.21.07g आस्तरणप्रवरणानां ध्याममण्डलता तन्तुरोमपक्ष्मशातनं च,

01.21.07h लोहमणिमयानां पङ्कमलोपदेहता स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च - इति विषयुक्तस्य लिङ्गानि

01.21.08 विषप्रदस्य तु शुष्कश्याववक्त्रता वाक्सङ्गः स्वेदो विजृम्भणं चातिमात्रं वेपथुः प्रस्खलनं वाक्यविप्रेक्षणं आवेगः कर्मणि स्वभूमौ चानवस्थानं इति

01.21.09 तस्माद् अस्य जाङ्गुलीविदो भिषजश्चासन्नाः स्युः

01.21.10 भिषग्भैषज्यागाराद् आस्वादविशुद्धं औषधं गृहीत्वा पाचकपेषकाभ्यां आत्मना च प्रतिस्वाद्य राज्ञे प्रयच्छेत्

01.21.11 पानं पानीयं चाऽषधेन व्याख्यातम्

01.21.12 कल्पकप्रसाधकाः स्नानशुद्धवस्त्रहस्ताः समुद्गं उपकरणं अन्तर्वंशिकहस्ताद् आदाय परिचरेयुः

01.21.13 स्नापकसंवाहकास्तरकरजकमालाकारकर्म दास्यः प्रसिद्धशौचाः कुर्युः, ताभिरधिष्ठिता वा शिल्पिनः

01.21.14 आत्मचक्षुषि निवेश्य वस्त्रमाल्यं दद्युः, स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्ववक्षोबाहुषु च

01.21.15 एतेन परस्माद् आगतकं व्याख्यातम्

01.21.16 कुशीलवाः शस्त्राग्निरसक्रीडावर्जं नर्मयेयुः

01.21.17 आतोद्यानि च एषां अन्तः तिष्ठेयुः, अश्वरथद्विपालङ्काराश्च

01.21.18 आप्तपुरुषाधिष्ठितं यानवाहनं आरोहेत्, नावं चाप्तनाविकाधिष्ठितम्

01.21.19 अन्यनौप्रतिबद्धां वातवेगवशां च न उपेयात्

01.21.20 उदकान्ते सैन्यं आसीत

01.21.21 मत्स्यग्राहविशुद्धं उदकं अवगाहेत

01.21.22 व्यालग्राहविशुद्धं उद्यानं गच्छेत्

01.21.23 लुब्धकश्चगणिभिरपास्तस्तेनव्यालपराबाधभयं चललक्ष्यपरिचयार्थं मृगारण्यं गच्छेत्

01.21.24 आप्तशस्त्रग्राहाधिष्ठितः सिद्धतापसं पश्येत्, मन्त्रिपरिषदा सह सामन्तदूतम्

01.21.25 सम्नद्धोऽश्वं हस्तिनं वाऽऽरूढः सम्नद्धं अनीकं पश्येत्

01.21.26 निर्याणेऽभियाने च राजमार्गं उभयतः कृतारक्षं शस्त्रिभिर्दण्डिभिश्चापास्तशस्त्रहस्तप्रव्रजितव्यङ्गं गच्छेत्

01.21.27 न पुरुषसम्बाधं अवगाहेत

01.21.28 यात्रासमाज उत्सवप्रहवणानि च दशवर्गिकाधिष्ठितानि गच्छेत्

01.21.29ab यथा च योगपुरुषैरन्यान् राजाऽधितिष्ठति .

01.21.30chd तथाऽयं अन्याबाधेभ्यो रक्षेद् आत्मानं आत्मवान् (इति)

Book | The activityof the head of departments
Chapt | Sec, 19: Settlement of the countryside

02.01.01 भूतपूर्वं अभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्

02.01.02 शूद्रकर्षकप्रायं कुलशतावरं पञ्चकुलशतपरं ग्रामं क्रोशद्विक्रोशसीमानं अन्योन्यारक्षं निवेशयेत्

02.01.03 नलीशैलवनभृष्टिदरीसेतुबन्धशमीशाल्मलीक्षीरवृक्षान् अन्तेषु सीम्नां स्थापयेत्

02.01.04 अष्टशतग्राम्या मध्ये स्थानीयं, चतुःशतग्राम्या द्रोणमुखं, द्विशतग्राम्याः कार्वटिकं, दशग्रामीसङ्ग्रहेण सङ्ग्रहं स्थापयेत्

02.01.05 अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत्

02.01.06 तेषां अन्तराणि वागुरिकशबरपुलिन्दचण्डालारण्यचरा रक्षेयुः

02.01.07a ऋत्विग्ऽअचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायादकानि प्रयच्छेत्

02.01.07b अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकारिकेभ्यश्च विक्रयाधानवर्जानि

02.01.08 करदेभ्यः कृतक्षेत्राण्यैकपुरुषिकाणि प्रयच्छेत्

02.01.09 अकृतानि कर्तृभ्यो नादेयानि

02.01.10 अकृषतां आछिद्यान्येभ्यः प्रयच्छेत्

02.01.11 ग्रामभृतकवैदेहका वा कृषेयुः

02.01.12 अकृषन्तो वाऽवहीनं दद्युः

02.01.13 धान्यपशुहिरण्यैश्च एतान् अनुगृह्णीयात्

02.01.14 तान्यनु सुखेन दद्युः

02.01.15 अनुग्रहपरिहारौ च एतेब्भ्यः कोशवृद्धिकरौ दद्यात्, कोश उपघातकौ वर्जयेत्

02.01.16 अल्पकोशो हि राजा पौरजानपदान् एव ग्रसते

02.01.17 निवेशसमकालं यथाऽऽगतकं वा परिहारं दद्यात्

02.01.18 निवृत्तपरिहारान् पिता इवानुगृह्णीयात्

02.01.19 आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत्

02.01.20 सह उदकं आहार्य उदकं वा सेतुं बन्धयेत्

02.01.21 अन्येषां वा बध्नतां भूमिमार्गवृक्ष उपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च

02.01.22 सम्भूयसेतुबन्धाद् अपक्रामतः कर्मकरबलीवर्दाः कर्म कुर्युः

02.01.23 व्ययकर्मणि च भागी स्यात्, न चांशं लभेत

02.01.24 मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत्

02.01.25 दासाहितकबन्धून् अशृण्वतो राजा विनयं ग्राहयेत्

02.01.26 बालवृद्धव्यसन्यऽनाथांश्च राजा बिभृयात्, स्त्रियं अप्रजातां प्रजातायश्च पुत्रान्

02.01.27 बालद्रव्यं ग्रामवृद्धा वर्धयेयुरा व्यवहारप्रापणात्, देवद्रव्यं च

02.01.28 अपत्यदारं मातापितरौ भ्रातृन् अप्राप्तव्यवहारान् भगिनीः कन्या विधवाश्चाबिभ्रतः शक्तिमतो द्वादशपणो दण्डः, अन्यत्र पतितेभ्यः, अन्यत्र मातुः

02.01.29 पुत्रदारं अप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः, स्त्रियं च प्रव्राजयतः

02.01.30 लुप्तव्यायामः प्रव्रजेद् आपृच्छ्य धर्मस्थान्

02.01.31 अन्यथा नियम्येत

02.01.32 वानप्रस्थाद् अन्यः प्रव्रजितभावः, सजाताद् अन्यः सङ्घः, सामुत्थायिकाद् अन्यः समयानुबन्धो वा नास्य जनपदं उपनिविशेत

02.01.33 न च तत्रारामा विहारार्था वा शालाः स्युः

02.01.34 नटनर्तकगायनवादकवाग्जीवनकुशीलवा न कर्मविघ्नं कुर्युः

02.01.35 निराश्रयत्वाद् ग्रामाणां क्षेत्राभिरतत्वाच्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवति

02.01.36ab परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् .

02.01.36chd देशं परिहरेद् राजा व्ययक्रीडाश्च वारयेत्

02.01.37ab दण्डविष्टिकराबाधै रक्षेद् उपहतां कृषिम् .

02.01.37chd स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान्

02.01.38ab वल्लभैः कार्मिकैः स्तेनैरन्तपालैश्च पीडितम् .

02.01.38chd शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथम्

02.01.39ab एवं द्रव्यद्विपवनं सेतुबन्धं अथाकरान् .

02.01.39chd रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् (इति)

Chapt | Disposal of non-agricultural land

02.2.01 अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत्

02.2.02 प्रदिष्टाभयस्थावरजङ्गमानि च ब्रह्मसोमारण्यानि तपस्विभ्यो गोरुतपराणि प्रयच्छेत्

02.2.03 तावन्मात्रं एकद्वारं खातगुप्तं स्वादुफलगुल्मगुच्छं अकण्टकिद्रुमं उत्तानतोयाशयं दान्तमृगचतुष्पदं भग्ननखदंष्ट्रव्यालं मार्गयुकहस्तिहस्तिनीकलभं मृगवनं विहारार्थं राज्ञः कारयेत्

02.2.04 सर्वातिथिमृगं प्रत्यन्ते चान्यन्मृगवनं भूमिवशेन वा निवेशयेत्

02.2.05 कुप्यप्रदिष्टानां च द्रव्याणां एक एकशो वनानि निवेशयेत्, द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनापाश्रयाः

02.2.06 प्रत्यन्ते हस्तिवनं अटव्यऽरक्षं निवेशयेत्

02.2.07 नागवनाध्यक्षः पार्वतं नादेयं सारसमानूपं च नागवनं विदितपर्यन्तप्रवेशनिष्कासं नागवनपालैः पालयेत्

02.2.08 हस्तिघातिनं हन्युः

02.2.09 दन्तयुगं स्वयंमृतस्याहरतः सपादचतुष्पणो लाभः

02.2.10 नागवनपाला हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखा हस्तिमूत्रपुरीषच्छन्नगन्धा भल्लातकीशाखाप्रच्छन्नाः पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह चरन्तः शय्यास्थानपद्मालेण्डकूलघात उद्देशेन हस्तिकुलपर्यग्रं विद्युः

02.2.11 यूथचरं एकचरं निर्यूथं यूथपतिं हस्तिनं व्यालं मत्तं पोतं बन्धमुक्तं च निबन्धेन विद्युः

02.2.12 अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः

02.2.13 हस्तिप्रधानं विजयो राज्ञः

02.2.14 परानीकव्यूहदुर्गस्कन्धावारप्रमर्दना ह्यतिप्रमाणशरीराः प्राणहरकर्माणो हस्तिनः

02.2.15ab कालिङ्गाङ्गरजाः श्रेष्ठाः प्राच्याश्चैदिकरूषजाः .

02.2.15chd दाशार्णाश्चापरान्ताश्च द्विपानां मध्यमा मताः

02.2.16ab सौराष्ट्रिकाः पाञ्चनदाः तेषां प्रत्यवराः स्मृताः .

02.2.16chd सर्वेषां कर्मणा वीर्यं जवः तेजश्च वर्धते (इति)

Chapt | Construction of forts

02.3.01 चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धं औदकं, प्रास्तरं गुहां वा पार्वतं, निरुदकस्तम्बं इरिणं वा धान्वनं, खञ्जन उदकं स्तम्बगहनं वा वनदुर्गम्

02.3.02 तेषां नदीपर्वतदुर्गं जनपदारक्षस्थानं, धान्वनवनदुर्गं अटवीस्थानं आपद्यपसारो वा

02.3.03 जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेत्, वास्तुकप्रशस्ते देशे नदीसङ्गमे ह्रदस्याविशोषस्याङ्के सरसः तटाकस्य वा, वृत्तं दीर्घं चतुरश्रं वा वास्तुवशेन वा प्रदक्षिण उदकं पण्यपुटभेदनं अंसपथवारिपथाभ्यां उपेतम्

02.3.04 तस्य परिखाः तिस्रो दण्डान्तराः कारयेत् चतुर्दश द्वादश दश इति दण्डान् विस्तीर्णाः, विस्तारात् अवगाढाः पाद ऊनं अर्धं वा, त्रिभागमूलाः, मूलचतुर्ऽश्रा वा, पाषाण उपहिताः पाषाण इष्टकाबद्धपार्श्वा वा, तोयान्तिकीरागन्तुतोयपूर्णा वा सपरिवाहाः पद्मग्राहवतीश्च

02.3.05 चतुर्दण्डापकृष्टं परिखायाः षड्दण्ड उच्छ्रितं अवरुद्धं तद्द्विगुणविष्कम्भं खाताद् वप्रं कारयेद् ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा हस्तिभिर्गोभिश्च क्षुण्णं कण्टकिगुल्मविषवल्लीप्रतानवन्तम्

02.3.06 पांसुशेषेण वास्तुच्छिद्रं राजभवनं वा पूरयेत्

02.3.07a वप्रस्य उपरि प्राकारं विष्कम्भद्विगुण उत्सेधं ऐष्टकं द्वादशहस्ताद् ऊर्ध्वं ओजं युग्मं वा आ चतुर्विंशतिहस्ताद् इति कारयेत्

02.3.07b रथचर्यासञ्चारं तालमूलं मुरजकैः कपिशीर्षकैश्चाचिताग्रम्

02.3.08 पृथुशिलासंहतं वा शैलं कारयेत्, न त्वेव काष्टमयम्

02.3.09 अग्निरवहितो हि तस्मिन् वसति

02.3.10 विष्कम्भचतुर्ऽश्रं अट्टालकं उत्सेधसमावक्षेपसोपानं कारयेत् त्रिंशद्दण्डान्तरं च

02.3.11 द्वयोरट्टालकयोर्मध्ये सहर्म्यद्वितलां अध्यर्धायामां प्रतोलीं कारयेत्

02.3.12 अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं स-अपिधानच्छिद्रफलकसंहतं इन्द्रकोशं कारयेत्

02.3.13 अन्तरेषु द्विहस्तविष्कम्भं पार्श्वे चतुर्गुणायामं देवपथं कारयेत्

02.3.14 दण्डान्तरा द्विदण्डान्तरा वा चर्याः कारयेत्, अग्राह्ये देशे प्रधावनिकां निष्किरद्वारं च

02.3.15 बहिर्जानुभञ्जनीशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्त्रशृङ्गाटकश्वदंष्ट्रार्गल उपस्कन्दनपादुकाम्बरीष उदपानकैः प्रतिच्छन्नं छन्नपथं कारयेत्

02.3.16 प्राकारं उभयतो मेण्ढकं अध्यर्धदण्डं कृत्वा प्रतोलीषट्तुलाऽन्तरं द्वारं निवेशयेत् पञ्चदण्डाद् एक उत्तरं आऽष्टदण्डाद् इति चतुर्ऽश्रं षड्भागं आयामाद्ऽधिकं अष्टभागं वा

02.3.17 पञ्चदशहस्ताद् एक उत्तरं आऽष्टादशहस्ताद् इति तल उत्सेधः

02.3.18 स्तम्भस्य परिक्षेपः षड्sअयामो, द्विगुणो निखातः, चूलिकायाश्चतुर्भागः

02.3.19 आदितलस्य पञ्चभागाः शाला वापी सीमागृहं च

02.3.20 दशभागिकौ द्वौ प्रतिमञ्चौ, अन्तरं आणीहर्म्यं च

02.3.21 समुच्छ्रयाद् अर्धतले स्थूणाबन्धश्च

02.3.22 अर्धवास्तुकं उत्तमागारं, त्रिभागान्तरं वा, इष्टकाsवबद्धपार्श्वं, वामतः प्रदक्षिणसोपानं गूढभित्तिसोपानं इतरतः

02.3.23 द्विहस्तं तोरणशिरः

02.3.24 त्रिपञ्चभागिकौ द्वौ कपाटयोगौ

02.3.25 द्वौ परिघौ

02.3.26 अरत्निरिन्द्रकीलः

02.3.27 पञ्चहस्तं आणिद्वारम्

02.3.28 चत्वारो हस्तिपरिघाः

02.3.29 निवेशार्धं हस्तिनखम्

02.3.30 मुखसमः सङ्क्रमः संहार्यो भूमिमयो वा निरुदके

02.3.31 प्राकारसमं मुखं अवस्थाप्य त्रिभागगोधामुखं गोपुरं कारयेत्

02.3.32 प्राकारमध्ये वापीं कृत्वा पुष्करिणीद्वारं, चतुःशालं अध्यर्धान्तरं साणिकं कुमारीपुरं, मुण्डहर्म्यद्वितलं मुण्डकद्वारं, भूमिद्रव्यवशेन वा निवेशयेत्

02.3.33 त्रिभागाधिकायामा भाण्डवाहिनीः कुल्याः कारयेत्

02.3.34ab तासु पाषाणकुद्दालाः कुठारीकाण्डकल्पनाः .

02.3.34chd मुषुण्ढीमुद्गरा दण्डाश्चक्रयन्त्रशतघ्नयः

02.3.35ab कार्याः कार्मारिकाः शूला वेधनाग्राश्च वेणवः .

02.3.35chd उष्ट्रग्रीव्योsग्निसम्योगाः कुप्यकल्पे च यो विधिः (इति)

Chapt | Lay-out of the fortified city

02.4.01 त्रयः प्राचीना राजमार्गाः त्रय उदीचीना इति वास्तुविभागः

02.4.02 स द्वादशद्वारो युक्त उदकभ्रमच्छन्नपथः

02.4.03 चतुर्दण्डान्तरा रथ्याः

02.4.04 राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः
सम्यानीयव्यूहश्मशानग्रामपथाश्चाष्टदण्डाः

02.4.05 चतुर्दण्डः सेतुवनपथः, द्विदण्डो हस्तिक्षेत्रपथः, पञ्चारत्नयो रथपथः, चत्वारः पशुपथः, द्वौ क्षुद्रपशुमनुष्यपथः

02.4.06 प्रवीरे वास्तुनि राजनिवेशश्चातुर्वर्ण्यसमाजीवे

02.4.07 वास्तुहृदयाद् उत्तरे नवभागे यथा उक्तविधानं अन्तःपुरं प्रान्मुखं उदन्मुखं वा कारयेत्

02.4.08 तस्य पूर्व उत्तरं भागं आचार्यपुरोहित इज्यातोयस्थानं मन्त्रिणश्चावसेयुः, पूर्वदक्षिणं भाग् महानसं हस्तिशाला कोष्ठागारं च

02.4.09 ततः परं गन्धमाल्यरसपण्याः प्रसाधनकारवः क्षत्रियाश्च पूर्वां दिशं अधिवसेयुः

02.4.10 दक्षिणपूर्वं भागं भाण्डागारं अक्षपटलं कर्मनिषद्याश्च, दक्षिणपश्चिमं भागं कुप्यगृहं आयुधागारं च

02.4.11 ततः परं नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः
पक्वान्नसुरामांसपण्या रूपाजीवाः तालावचरा वैश्याश्च दक्षिणां दिशं अधिवसेयुः

02.4.12 पश्चिमदक्षिणं भागं खर उष्ट्रगुप्तिस्थानं कर्मगृहं च, पश्चिम उत्तरं भागं यानरथशालाः

02.4.13 ततः परं ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः शूद्राश्च पश्चिमां दिशं अधिवसेयुः

02.4.14 उत्तरपश्चिमं भागं पण्यभैषज्यगृहं, उत्तरपूर्वं भागं कोशो गवाश्वं च

02.4.15 ततः परं नगरराजदेवतालोहमणिकारवो ब्राह्मणाश्च उत्तरां दिशं अधिवसेयुः

02.4.16 वास्तुच्छिद्रानुशालेषु श्रेणीप्रपणिनिकाया आवसेयुः

02.4.17 अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठान् शिववैश्रवणाश्विश्रीमदिरागृहाणि च पुरमध्ये कारयेत्

02.4.18 यथा उद्देशं वास्तुदेवताः स्थापयेत्

02.4.19 ब्राह्माइन्द्रयाम्यसैनापत्यानि द्वाराणि

02.4.20 बहिः परिखाया धनुःशतापकृष्टाश्चैत्यपुण्यस्थानवनसेतुबन्धाः कार्याः, यथादिशं च दिग्देवताः

02.4.21 उत्तरः पूर्वो वा श्मशानभागो वर्ण उत्तमानां, दक्षिणेन श्मशानं वर्णावराणाम्

02.4.22 तस्यातिक्रमे पूर्वः साहसदण्डः

02.4.23 पाषण्डचण्डालानां श्मशानान्ते वासः

02.4.24 कर्मान्तक्षेत्रवशेन कुटुम्बिनां सीमानं स्थापयेत्

02.4.25 तेषु पुष्पफलवाटान् धान्यपण्यनिचयांश्चानुज्ञाताः कुर्युः

02.4.26 दशकुलीवाटं कूपस्थानम्

02.4.27 सर्वस्नेहधान्यक्षारलवणगन्धभैषज्यशुष्कशाकयवसवल्लूरतृणकाष्ठलोहचर्माङ्गारस्नायुविषविषाणवेणुवल्कलसारदारुप्रहरणावरणाश्मनिचयान् अनेकवर्ष उपभोगसहान् कारयेत्

02.4.28 नवेनानवं शोधयेत्

02.4.29 हस्तिऽश्वरथपादातं अनेकमुख्यं अवस्थापयेत्

02.4.30 अनेकमुख्यं हि परस्परभयात् पर उपजापं न उपैति

02.4.31 एतेनान्तपालदुर्गसंस्कारा व्याख्याताः

02.4.32ab न च बाहिरिकान् कुर्यात् पुरे राष्ट्र उपघातकान् .

02.4.32chd क्षिपेज् जनपदे च एतान् सर्वान् वा दापयेत् करान् (इति)

Chapt | The work of store-keeping by the director of stories

02.5.01 सम्निधाता कोशगृहं पण्यगृहं कोष्ठागारं कुप्यगृहं आयुधागारं बन्धनागारं च कारयेत्

02.5.02 चतुर्ऽश्रां वापीं अन्-उदक उपस्नेहां खानयित्वा पृथुशिलाभिरुभयतः पार्श्वं मूलं च प्रचित्य सारदारुपञ्जरं भूमिसमं त्रितलं अनेकविधानं कुट्टिमदेशस्थानतलं एकद्वारं यन्त्रयुक्तसोपानं भूमिगृहं कारयेत्

02.5.03 तस्य उपरि उभयतोनिषेधं स-प्रग्रीवं ऐष्टकं भाण्डवाहिनीपरिक्षिप्तं कोशगृहं कारयेत्, प्रासादं वा

02.5.04 जनपदान्ते ध्रुवनिधिं आपद्ऽर्थं अभित्यक्तैः कारयेत्

02.5.05a पक्व इष्टकास्तम्भं चतुःशालं एकद्वारं अनेकस्थानतलं विवृतस्तम्भापसारं उभयतः पण्यगृहं कोष्ठागारं च

02.5.05b दीर्घबहुशालं कक्ष्यावृतकुड्यं अन्तः कुप्यगृहं, तद् एव भूमिगृहयुक्तं आयुधागारं

02.5.05ch पृथग्धर्मस्थीयं महामात्रीयं विभक्तस्त्रीपुरुषस्थानं अपसारतः सुगुप्तकक्ष्यं बन्धनागारं कारयेत्

02.5.06 सर्वेषां शालाः खात उदपानवर्चस्नानगृहाग्निविषत्राणमार्जारनकुलारक्षास्वदैवतपूजनयुक्ताः कारयेत्

02.5.07 कोष्ठागारे वर्षमानं अरत्निमुखं कुण्डं स्थापयेत्

02.5.08 तत्जातकरणाधिष्ठितः पुराणं नवं च रत्नं सारं फल्गु कुप्यं वा प्रतिगृह्णीयात्

02.5.09 तत्र रत्न उपधावुत्तमो दण्डः कर्तुः कारयितुश्च सार उपधौ मध्यमः, फल्गुकुप्य उपधौ तत् च तावत् च दण्डः

02.5.10 रूपदर्शकविशुद्धं हिरण्यं प्रतिगृह्णीयात्

02.5.11 अशुद्धं छेदयेत्

02.5.12 आहर्तुः पूर्वः साहसदण्डः

02.5.13 शुद्धं पूर्णं अभिनवं च धान्यं प्रतिगृह्णीयात्

02.5.14 विपर्यये मूल्यद्विगुणो दण्डः

02.5.15 तेन पण्यं कुप्यं आयुधं च व्याख्यातम्

02.5.16 सर्वाधिकरणेषु युक्त उपयुक्ततत्पुरुषाणां पणादिचतुष्पणपरमापहारेषु पूर्वमध्यम उत्तमवधा दण्डाः

02.5.17 कोशाधिष्ठितस्य कोशावच्छेदे घातः

02.5.18 तद्वैयावृत्यकराणां अर्धदण्डाः

02.5.19 परिभाषणं अविज्ञाते

02.5.20 चोराणां अभिप्रधर्षणे चित्रो घातः

02.5.21 तस्माद् आप्तपुरुवाधिष्ठितः सम्निधाता निचयान् अनुतिष्ठेत्

02.5.22a बाह्यं अभ्यन्तरं चायं विद्याद् वर्षशताद् अपि .

02.5.22b यथा पृष्टो न सज्जेत व्यये शेषे च सञ्चये (इति)

Chapt | section 24 The setting up of revenue by the administration

02.6.01 समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथं चावेक्षेत

02.6.02 शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राऽध्यक्षः सुरा सूना सूत्रं तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताऽध्यक्षो द्वारबहिरिकाऽऽदेयं च दुर्गम्

02.6.03 सीता भागो बलिः करो वणिक् नदीपालः तरो नावः पत्तनं विविचितं वर्तनी रज्जुश्चोररज्जुश्च राष्ट्रम्

02.6.04 सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोहलवणभूमिप्रस्तररसधातवः खनिः

02.6.05 पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः

02.6.06 पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम्

02.6.07 गोमहिषं अजाविकं खर उष्त्रं अश्वाश्वतरं च व्रजः

02.6.08 स्थलपथो वारिपथश्च वणिक्पथः

02.6.09 इत्यायशरीरम्

02.6.10 मूल्यं भागो व्याजी परिघः क्लृप्तम्(क्लृप्तम्) रूपिकं अत्ययश्चायमुखम्

02.6.11 देवपितृपूजादानार्थं, स्वस्तिवाचनं, अन्तःपुरं, महानसं, दूतप्रावर्तिमं, कोष्ठागारं, आयुधागारं, पण्यगृहं, कुप्यगृहं, कर्मान्तो, विष्टिः, पत्तिऽश्वरथद्विपपरिग्रहो, गोमण्डलं, पशुमृगपक्षिव्यालवाटाः, काष्ठतृणवाटाश्च इति व्ययशरीरम्

02.6.12 राजवर्षं मासः पक्षो दिवसश्च व्युष्टं, वर्षाहेमन्तग्रीष्माणां तृतीयससमा दिवस ऊनाः पक्षाः शेषाः पूर्णाः, पृथग्ऽधिमासकः, इति कालः

02.6.13 करणीयं सिद्धं शेषं आयव्ययौ नीवी च

02.6.14 संस्थानं प्रचारः शरीरावस्थापनं आदानं सर्वसमुदयपिण्डः सञ्जातं - एतत् करणीयम्

02.6.15 कोशार्पितं राजहारः पुरव्ययश्च प्रविष्टं परमसंवत्सरानुवृत्तं शासनमुक्तं मुखाज्ञप्तं चापातनीयं - एतत् सिद्धम्

02.6.16 सिद्धिकर्मयोगः दण्डशेषं आहरणीयं बलात्कृतप्रतिष्टब्धं अवमृष्टं च प्रशोध्यं - एतत्शेषं, असारं अल्पसारं च

02.6.17 वर्तमानः पर्युषितोऽन्यजातश्चायः

02.6.18 दिवसानुवृत्तो वर्तमानः

02.6.19 परमसांवत्सरिकः परप्रचारसङ्क्रान्तो वा पर्युषितः

02.6.20 नष्टप्रस्मृतं आयुक्तदण्डः पार्श्वं पारिहीणिकं औपायनिकं डमरगतकस्वं अपुत्रकं निधिश्चान्यजातः

02.6.21 विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः

02.6.22 विक्रिये पण्यानां अर्घवृद्धिरुपजा, मान उन्मानविशेषो व्याजी, क्रयसङ्घर्षे वार्धवृद्धिः - इत्यायः

02.6.23 नित्यो नित्य उत्पादिको लाभो लाभ उत्पादिक इति व्ययः

02.6.24 दिवसानुवृत्तो नित्यः

02.6.25 पक्षमाससंवत्सरलाभो लाभः

02.6.26 तयोरुत्पन्नो नित्य उत्पादिको लाभ उत्पादिक इति व्ययः

02.6.27 सञ्जाताद् आयव्ययविशुद्धा नीवी, प्राप्ता चानुवृत्ता च

02.6.28ab एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् .

02.6.28chd ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् (इति)

Chapt | The topic of accounts in the records and audit office

02.7.01 अक्षपटलं अध्यक्षः प्रान्मुखं उदन्मुखं वा विभक्त उपस्थानं निबन्धपुस्तकस्थानं कारयेत्

02.7.02 तत्राधिकरणानां सङ्ख्याप्रचारसञ्जाताग्रं, कर्मान्तानां द्रव्यप्रयोगवृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं, रत्नसारफल्गुकुप्यानां अर्घप्रतिवर्णकमानप्रतिमान उन्मानावमानभाण्डं, देशग्रामजातिकुलसङ्घानां धर्मव्यवहारचरित्रसंस्थानं, राज उपजीविनां प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं, राज्ञश्च पत्नीपुत्राणां रत्नभूमिलाभं निर्देश उत्पातिकप्रतीकारलाभं, मित्रामित्राणां च सन्धिविग्रहप्रदानादानं निबन्धपुस्तकस्थं कारयेत्

02.7.03 ततः सर्वाधिकरणानां करणीयं सिद्धं शेषं आयव्ययौ नीवीं उपस्थानं प्रचारं चरित्रं संस्थानं च निबन्धेन प्रयच्छेत्

02.7.04 उत्तममध्यमावरेषु च कर्मसु तज्जातिकं अध्यक्षं कुर्यात्, सामुदयिकेष्ववक्लृप्तिकम्(अवक्लृप्तिकम्) यं उपहत्य राजा नानुतप्येत

02.7.05 सहग्राहिणः प्रतिभुवः कर्म उपजीविनः पुत्रा भ्रातरो भार्या दुहितरो भृत्याश्चास्य कर्मच्छेदं वहेयुः

02.7.06 त्रिशतं चतुःपञ्चाशत् चाहोरात्राणां कर्मसंवत्सरः

02.7.07 तं आषाढीपर्यवसानं ऊनं पूर्णं वा दद्यात्

02.7.08 करणाधिष्ठितं अधिमासकं कुर्यात्

02.7.09 अपसर्पाधिष्ठितञ्च प्रचारम्

02.7.10 प्रचारचरित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयं अज्ञानेन परिहापयति, उत्थानक्लेशासहत्वाद् आलस्येन, शब्दादिष्विन्द्रियार्थेषु प्रसक्तः प्रमादेन, सङ्क्रोशाधर्मानर्थभीरुभायेन, कार्यार्थिष्वनुग्रहबुद्धिः कामेन, हिंसाबुद्धिः कोपेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण, तुलामानतर्कगणितान्तर उपधानात् लोभेन

02.7.11 तेषां आनुपूर्व्या यावान् अर्थ उपघातः तावान् एक उत्तरो दण्डः इति मानवाः

02.7.12 सर्वत्राष्टगुणः इति पाराशराः

02.7.13 दशगुणः इति बार्हस्पत्याः

02.7.14 विंशतिगुणः इत्यौशनसाः

02.7.15 यथाऽपराधं इति कौटिल्यः

02.7.16 गाणनिक्यानि आषाढीं आगच्छेयुः

02.7.17 आगतानां समुद्रपुस्तकभाण्डनीवीकानां एकत्रासम्भाषाऽवरोधं कारयेत्

02.7.18 आयव्ययनीवीनां अग्राणि श्रुत्वा नीवीं अवहारयेत्

02.7.19 यच्चाग्राद् आयस्यान्तरपर्णे नीव्यां वर्धेत व्ययस्य वा यत् परिहापयेत्, तद् अष्टगुणं अध्यक्षं दापयेत्

02.7.20 विपर्यये तं एव प्रति स्यात्

02.7.21 यथाकालं अनागतानां अपुस्तकभाण्डनीवीकानां वा देयदशबन्धो दण्डः

02.7.22 कार्मिके च उपस्थिते कारणिकस्याप्रतिबध्नतः पूर्वः साहसदण्डः

02.7.23 विपर्यये कार्मिकस्य द्विगुणः

02.7.24 प्रचारसमं महामात्राः समग्राः श्रावयेयुरविषममन्त्राः

02.7.25 पृथग्भूतो मिथ्यावादी च एषां उत्तमं दण्डं दद्यात्

02.7.26 अकृताहोरूपहरं मासं आकाङ्क्षेत

02.7.27 मासाद् ऊर्ध्वं मासद्विशत उत्तरं दण्डं दद्यात्

02.7.28 अल्पशेसलेख्यनीवीकं पञ्चरात्रं आकाङ्क्षेत

02.7.29 ततः परं कोशपूर्वं अहोरूपहरं
धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैरवेक्षेत

02.7.30 दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत्

02.7.31 व्युष्टदेशकालमुख
उत्पत्तिऽनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैश्चायं समानयेत्

02.7.32 व्युष्टदेशकालमुखलाभकारणदेययोगप्रमाणाज्ञापक
उद्धारकविधातृकप्रतिग्राहकैश्च व्ययं समानयेत्

02.7.33 व्युष्टदेशकालमुखानुवर्तनरूपलक्षणप्रमाणनिक्षेपभाजनगोपायकैश्च नीवीं समानयेत्

02.7.34 राजार्थे कारणिकस्याप्रतिबध्नतः प्रतिषेधयतो वाऽऽज्ञां निबन्धाद् आयव्ययं अन्यथा नीवीं अवलिखतो द्विगुणः

02.7.35 क्रमावहीनं उत्क्रमं अविज्ञातं पुनर्.उक्तं वा वस्तुकं अवलिखतो द्वादशपणो दण्डः

02.7.36 नीवीं अवलिखतो द्विगुणः

02.7.37 भक्षयतोऽष्टगुणः

02.7.38 नाशयतः पञ्चबन्धः प्रतिदानं च

02.7.39 मिथ्यावादे स्तेयदण्डः

02.7.40 पश्चात्प्रतिज्ञाते द्विगुणः, प्रस्मृत उत्पन्ने च

02.7.41ab अपराधं सहेताल्पं तुष्येद् अल्पेऽपि च उदये .

02.7.41chd महा उपकारं चाध्यक्षं प्रग्रहेणाभिपूजयेत् (इति)

Chapt | Recovery of revenue misappropriated by state employees

02.8.01 कोशपूर्वाः सर्वारम्भाः

02.8.02 तस्मात् पूर्वं कोशं अवेक्षेत

02.8.03 प्रचारसमृद्धिश्चरित्रानुग्रहश्चोरनिग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यं उपसर्गप्रमोक्षः परिहारक्षयो हिरण्य उपायनं इति कोशवृद्धिः

02.8.04 प्रतिबन्धः प्रयोगो व्यवहारोऽवस्तारः परिहापणं उपभोगः परिवर्तनं अपहारश्च इति कोशक्षयः

02.8.05 सिद्धीनां असाधनं अनवतारणं अप्रवेशनं वा प्रतिबन्धः

02.8.06 तत्र दशबन्धो दण्डः

02.8.07 कोशद्रव्याणां वृद्धिप्रयोगाः प्रयोगः

02.8.08 पण्यव्यवहारो व्यवहारः

02.8.09 तत्र फलद्विगुणो दण्डः

02.8.10 सिद्धं कालं अप्राप्तं करोति अप्राप्तं प्राप्तं वा इत्यवस्तारः

02.8.11 तत्र पञ्चबन्धो दण्डः

02.8.12 क्लृप्तम्(क्लृप्तम्) आयं परिहापयति व्ययं वा विवर्धयति इति परिहापणम्

02.8.13 तत्र हीनचतुर्गुणो दण्डः

02.8.14 स्वयं अन्यैर्वा राजद्रव्याणां उपभोजनं उपभोगः

02.8.15 तत्र रत्न उपभोगे घातः, सार उपभोगे मध्यमः साहसदण्डः, फल्गुकुप्य उपभोगे तच्च तावत् च दण्डः

02.8.16 राजद्रव्याणां अन्यद्रव्येनादानं परिवर्तनम्

02.8.17 तद् उपभोगेन व्याख्यातम्

02.8.18 सिद्धं आयं न प्रवेशयति, निबद्धं व्ययं न प्रयच्छति, प्राप्तां नीवीं विप्रतिजानीत इत्यपहारः

02.8.19 तत्र द्वादशगुणो दण्डः

02.8.20 तेषां हरण उपायाश्चत्वारिंशत्

02.8.21a पूर्वं सिद्धं पश्चाद् अवतारितं, पश्चात् सिद्धं पूर्वं अवतारितं, साध्यं न सिद्धं, असाध्यं सिद्धं, सिद्धं असिद्धं कृतं, असिद्धं सिद्धं कृतं, अल्पसिद्धं बहु कृतं, बहुसिद्धं अल्पं कृतं, अन्यत् सिद्धं अन्यत् कृतं, अन्यतः सिद्धं अन्यतः कृतं,

02.8.21b देयं न दत्तं, अदेयं दत्तं, काले न दत्तं, अकाले दत्तं, अल्पं दत्तं बहु कृतं, बहु दत्तं अल्पं कृतं, अन्यद् दत्तं अन्यत् कृतं, अन्यतो दत्तं अन्यतः कृतं,

02.8.21ch प्रविष्टं अप्रविष्टं कृतं, अप्रविष्टं प्रविष्टं कृतं, कुप्यं अदत्तमूल्यं प्रविष्टं, दत्तमूल्यं न प्रविष्टं

02.8.21d सङ्क्षेपो विक्षेपः कृतः, विक्षेपः सङ्क्षेपो वा, महाऽर्घं अल्पार्घेण परिवर्तितं, अल्पार्घं महाऽर्घेण वा

02.8.21e समारोपितोऽर्घः, प्रत्यवरोपितो वा, संवत्सरो मासविषमः कृतः, मासो दिवसविषमो वा, समागमविषमः, मुखविषमः, कार्मिकविषमः

02.8.21f निर्वर्तनविषमः, पिण्डविषमः, वर्णविषमः, अर्घविषमः, मानविषमः, मापनविषमः, भाजनविषमः - इति हरण उपायाः

02.8.22 तत्र उपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिवैयावृत्यकरान् एक एकशोऽनुयुञ्जीत

02.8.23 मिथ्यावादे च एषां युक्तसमो दण्डः

02.8.24 प्रचारे चावघोषयेत् अमुना प्रकृतेन उपहताः प्रज्ञापयन्तु इति

02.8.25 प्रज्ञापयतो यथा उपघातं दापयेत्

02.8.26 अनेकेषु चाभियोगेष्वपव्ययमानः सकृद् एव पर उक्तः सर्वं भजेत

02.8.27 वैषम्ये सर्वत्रानुयोगं दद्यात्

02.8.28 महत्यर्थापहारे चाल्पेनापि सिद्धः सर्वं भजेत

02.8.29 कृतप्रतिघातावस्थः सूचको निष्पन्नार्थः षष्ठं अंशं लभेत, द्वादशं अंशं भृतकः

02.8.30 प्रभूताभियोगाद् अल्पनिष्पत्तौ निष्पन्नस्यांशं लभेत

02.8.31 अनिष्पन्ने शारीरं हैरण्यं वा दण्डं लभेत, न चानुग्राह्यः

02.8.32ab निष्पत्तौ निक्षिपेद् वादं आत्मानं वाऽपवाहयेत् .

02.8.32chd अभियुक्त उपजापात् तु सूचको वधं आप्नुयात् (इति)

Chapt | Inspection of the Rork of officers

02.9.01 अमात्यसम्पदा उपेताः सर्वाध्यक्षाः शक्तितः कर्मसु नियोज्याः

02.9.02 कर्मसु च एषां नित्यं परीक्षां कारयेत्, चित्तानित्यत्वात् मनुष्यानाम्

02.9.03 अश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वते

02.9.04 तस्मात् कर्तारं करणं देशं कालं कार्यं प्रक्षेपं उदयं च एषु विद्यात्

02.9.05 ते यथासन्देशं असंहता अविगृहीताः कर्माणि कुर्युः

02.9.06 संहता भक्षयेयुः, विगृहीता विनाशयेयुः

02.9.07 न चानिवेद्य भर्तुः कञ्चिद् आरम्भं कुर्युः, अन्यत्रापत्प्रतीकारेभ्यः

02.9.08 प्रमादस्थानेषु च एषां अत्ययं स्थापयेद् दिवसवेतनव्ययद्विगुणम्

02.9.09 यश्च एषां यथाऽऽदिष्टं अर्थं सविशेषं वा करोति स स्थानमानौ लभेत

02.9.10 अल्पायतिश्चेत् महाव्ययो भक्षयति

02.9.11 विपर्यये यथाऽऽयतिव्ययश्च न भक्षयति इत्याचार्याः

02.9.12 अपसर्पेण एव उपलभ्येत इति कौटिल्यः

02.9.13 यः समुदयं परिहापयति स राजार्थं भक्षयति

02.9.14 स चेद् अज्ञानादिभिः परिहापयति तद् एनं यथागुणं दापयेत्

02.9.15 यः समुदयं द्विगुणं उद्भावयति स जनपदं भक्षयति

02.9.16 स चेद् राजार्थं उपनयत्यल्पापराधे वारयितव्यः, महति यथाऽपराधं दण्डयितव्यः

02.9.17 यः समुदयं व्ययं उपनयति स पुरुषकर्माणि भक्षयति

02.9.18 स कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु यथाऽपराधं दण्डयितव्यः

02.9.19 तस्माद् अस्य यो यस्मिन्न् अधिकरणे शासनस्थः स तस्य कर्मणो याथातथ्यं आयव्ययौ च व्याससमासाभ्यां आचक्षीत

02.9.20 मूलहरतादात्विककदर्यांश्च प्रतिषेधयेत्

02.9.21 यः पितृपैतामहं अर्थं अन्यायेन भक्षयति स मूलहरः

02.9.22 यो यद् यद् उत्पद्यते तत् तद् भक्षयति स तादात्विकः

02.9.23 यो भृत्यात्मपीडाभ्यां उपचिनोत्यर्थं स कदर्यः

02.9.24 स पक्षवांश्चेद् अनादेयः, विपर्यये पर्यादातव्यः

02.9.25 यो महत्यर्थसमुदये स्थितः कदर्यः सम्निधत्तेऽवनिधत्तेऽवस्रावयति वा - सम्निधत्ते स्ववेश्मनि, अवनिधत्ते पौरजानपदेषु, अवस्रावयति परविषये - तस्य सत्त्री मन्त्रिमित्रभृत्यबन्धुपक्षं आगतिं गतिं च द्रव्याणां उपलभेत

02.9.26 यश्चास्य परविषये सञ्चारं कुर्यात् तं अनुप्रविश्य मन्त्रं विद्यात्

02.9.27 सुविदिते शत्रुशासनापदेशेन एनं घातयेत्

02.9.28 तस्माद् अस्याध्यक्षाः सङ्ख्यायकलेखकरूपदर्शकनीवीग्राहक उत्तराध्यक्षसखाः कर्मणि कुर्युः

02.9.29 उत्तराध्यक्षा हस्तिऽश्वरथारोहाः

02.9.30 तेषां अन्तेवासिनः शिल्पशौचयुक्ताः सङ्ख्यायकादीनां अपसर्पाः

02.9.31 बहुमुख्यं अनित्यं चाधिकरणं स्थापयेत्

02.9.32ab यथा ह्यनास्वादयितुं न शक्यं जिह्वातलस्थं मधु७ वा विषं वा .

02.9.32chd अर्थः तथा ह्यर्थचरेण राज्ञः स्वल्पोऽप्यनास्वादयितुं न शक्यः

02.9.33ab मत्स्या यथाऽन्तः सलिले चरन्तो ज्ञातुं न शक्याः सलिलं पिबन्तः .

02.9.33chd युक्ताः तथा कार्यविधौ नियुक्ता ज्ञातुं न शक्या धनं आददानाः

02.9.34ab अपि शक्या गतिर्ज्ञातुं पततां खे पतत्रिणाम् .

02.9.34chd न तु प्रच्छन्नभावानां युक्तानां चरतां गतिः

02.9.35ab आस्रावयेच्च उपचितान् विपर्यस्येच्च कर्मसु .

02.9.35chd यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा

02.9.36ab न भक्षयन्ति ये त्वर्थान्न्यायतो वर्धयन्ति च .

02.9.36chd नित्याधिकाराः कार्याः ते राज्ञः प्रियहिते रताः (इति)

Chapt | On edicts

02.10.01 शासने शासनं इत्याचक्षते

02.10.02 शासनप्रधाना हि राजानः, तन्मूलत्वात् सन्धिविग्रहयोः

02.10.03 तस्माद् अमात्यसम्पदा उपेतः सर्वसमयविद् आशुग्रन्थश्चारुऽक्षरो लेखनवाचनसमर्थो लेखकः स्यात्

02.10.04 सोऽव्यग्रमना राज्ञः सन्देशं श्रुत्वा निश्चितार्थं लेखं विदध्यात् देशाइश्वर्यवंशनामधेय उपचारं ईश्वरस्य, देशनामधेय उपचारं अनीश्वरस्य

02.10.05ab जातिं कुलं स्थानवयःश्रुतानि कर्म.ऋद्धिशीलान्यथ देशकालौ .

02.10.05chd यौनानुबन्धं च समीक्ष्य कार्ये लेखं विदध्यात् पुरुषानुरूपम्

02.10.06 अर्थक्रमः सम्बन्धः परिपूर्णता माधुर्यं औदार्यं स्पष्टत्वं इति लेखसम्पत्

02.10.07 तत्र यथावद् अनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वं अभिनिवेश इत्यर्थक्रमः

02.10.08 प्रस्तुतस्यार्थस्यानुपरोधाद् उत्तरस्य विधानं आसमाप्तेरिति सम्बन्धः

02.10.09 अर्थपदाक्षराणां अन्यूनातिरिक्तता हेतु.उदाहरणदृष्टान्तैरर्थ उपवर्णनाऽश्रान्तपदता इति परिपूर्णता

02.10.10 सुख उपनीतचारुऽर्थशब्दाभिधानं माधुर्यम्

02.10.11 अग्राम्यशब्दाभिधानं औदार्यम्

02.10.12 प्रतीतशब्दप्रयोगः स्पष्टत्वं इति

02.10.13 अकारादयो वर्णाः त्रिषष्टिः

02.10.14 वर्णसङ्घातः पदम्

02.10.15 तच्चतुर्विधं नामाख्यात उपसर्गनिपाताश्च इति

02.10.16 तत्र नाम सत्त्वाभिधायि

02.10.17 अविशिष्टलिङ्गं आख्यातं क्रियावाचि

02.10.18 क्रियाविशेषकाः प्रादय उपसर्गाः

02.10.19 अव्ययाश्चादयो निपाताः

02.10.20 पदसमूहो वाक्यं अर्थपरिसमाप्तौ

02.10.21 एकपदावरः त्रिपदपरः परपदार्थानुपरोधेन वर्गः कार्यः

02.10.22 लेखपरिसंहरणार्थ इतिशब्दो वाचिकं अस्य इति च

02.10.23ab निन्दा प्रशंसा पृच्छा च तथाऽऽख्यानं अथार्थना .

02.10.23chd प्रत्याख्यानं उपालम्भः प्रतिषेधोऽथ चोदना

02.10.24ab सान्त्वं अभ्युपपत्तिश्च भर्त्सनानुनयौ तथा .

02.10.24chd एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः

02.10.25 तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा

02.10.26 गुणवचनं एतेषां एव प्रशंसा

02.10.27 कथं एतद् इति पृच्छा

02.10.28 एवम् इत्याख्यानम्

02.10.29 देहि इत्यर्थना

02.10.30 न प्रयच्छामि इति प्रत्याख्यानम्

02.10.31 अननुरूपं भवतः इत्युपालम्भः

02.10.32 मा कार्षीः इति प्रतिषेधः

02.10.33 इदं क्रियताम् इति चोदना

02.10.34 योऽहं स भवान्, यन् मम द्रव्यं तद् भवतः इत्युपग्रहः सान्त्वम्

02.10.35 व्यसनसाहाय्यं अभ्युपपत्तिः

02.10.36 सदोषं आयतिप्रदर्शनं अभिभर्त्सनम्

02.10.37 अनुनयः त्रिविधोऽर्थकृतावतिक्रमे पुरुषादिव्यसने च इति

02.10.38ab प्रज्ञापनाज्ञापरिदानलेखाः तथा परीहारनिसृष्टिलेखौ .

02.10.38chd प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्च इति हि शासनानि

02.10.39ab अनेन विज्ञापितं एवं आह तद् दीयतां चेद् यदि तत्त्वं अस्ति .

02.10.39chd राज्ञः समीपे वरकारं आह प्रज्ञापना एषा विविधा उपदिष्टा

02.10.40ab भर्तुराज्ञा भवेद् यत्र निग्रहानुग्रहौ प्रति .

02.10.40chd विशेषेण तु भृत्येषु तद्ऽअज्ञालेखलक्षणम्

02.10.41ab यथाऽर्हगुणसम्युक्ता पूजा यत्र उपलक्ष्यते .

02.10.41chd अप्याधौ परिदाने वा भवतः तावुपग्रहौ

02.10.42ab जातेर्विशेषेषु परेषु चैव ग्रामेषु देशेषु च तेषु तेषु .

02.10.42chd अनुग्रहो यो नृप्तेर्निदेशात् तज्ज्ञः परीहार इति व्यवस्येत्

02.10.43ab निसृष्टिस्थाऽऽपना कार्यकरणे वचने तथा .

02.10.43chd एष वाचिकलेखः स्याद् भवेन्नैसृष्टिकोऽपि वा

02.10.44ab विविधां दैवसम्युक्तां तत्त्वजां चैव मानुषीम् .

02.10.44chd द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति

02.10.45ab दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च .

02.10.45chd प्रतिलेखो भवेत् कार्यो यथा राजवचः तथा

02.10.46ab यत्र ईश्वरांश्चाधिकृतांश्च राजा रक्षा उपकारौ पथिकार्थं आह .

02.10.46chd सर्वत्रगो नाम भवेत् स मार्गे देशे च सर्वत्र च वेदितव्यः

02.10.47 उपायाः साम उपप्रदानभेददण्डाः

02.10.48 तत्र साम पञ्चविधं - गुणसङ्कीर्तनं, सम्बन्ध उपाख्यानं, परस्पर उपकारसन्दर्शनं, आयतिप्रदर्शनं, आत्म उपनिधानं इति

02.10.49 तत्राभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां गुणग्रहणं प्रशंसा स्तुतिर्गुणसङ्कीर्तनम्

02.10.50 ज्ञातियौनमौखस्रौवकुलहृदयमित्रसङ्कीर्तनं सम्बन्ध उपाख्यानम्

02.10.51 स्वपक्षपरपक्षयोरन्योन्य उपकारसङ्कीर्तनं परस्पर उपकारसन्दर्शनम्

02.10.52 अस्मिन्न् एवं कृत इदं आवयोर्भवति इत्याशाजननं आयतिप्रदर्शनम्

02.10.53 योऽहं स भवान्, यन् मम द्रव्यं तद् भवता स्वकृत्येषु प्रयोज्यताम् इत्यात्म उपनिधानम् । इति

02.10.54 उपप्रदानं अर्थ उपकारः

02.10.55 शङ्काजननं निर्भर्त्सनं च भेदः

02.10.56 वधः परिक्लेशोऽर्थहरणं दण्डः । इति

02.10.57 अकान्तिर्व्याघातः पुनर्.उक्तं अपशब्दः सम्प्लव इति लेखदोषः

02.10.58 तत्र कालपत्त्रकं अचारुविषं अविरागाक्षरत्वं अकान्तिः

02.10.59 पूर्वेण पश्चिमस्यानुपपत्तिर्व्याघातः

02.10.60 उक्तस्याविशेषेण द्वितीयं उच्चारणं पुनर्.उक्तम्

02.10.61 लिङ्गवचनकालकारकाणां अन्यथाप्रयोगोऽपशब्दः

02.10.62 अवर्गे वर्गकरणं चावर्गक्रिया गुणविपर्यासः सम्प्लवः । इति

02.10.63ab सर्वशास्त्राण्यनुक्रम्य प्रयोगं उपलभ्य च .

02.10.63chd कौटिल्येन नर इन्द्रार्थे शासनस्य विधिः कृतः (इति)

Chapt | Examination of the precious articles to be received into the treasur य्

02.11.01 कोशाध्यक्षः कोशप्रवेश्यं रत्नं सारं फल्गुं कुप्यं वा तज्जातकरणाधिष्ठितः प्रतिगृह्णीयात्

02.11.02 ताम्रपर्णिकं पाण्ड्यकवाटकं पाशिक्यं कौलेयं चौर्णेयं माहेन्द्रं कार्दमिकं स्रौतसीयं ह्रादीयं हैमवतं च मौक्तिकम्

02.11.03 शुक्तिः शङ्खः प्रकीर्णकं च योनयः

02.11.04 मसूरकं त्रिपुटकं कूर्मकं अर्धचन्द्रकं कञ्चुकितं यमकं कर्तकं खरकं सिक्तकं कामण्डलुकं श्यावं नीलं दुर्विद्धं चाप्रशस्तम्

02.11.05 स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम्

02.11.06 शीर्षकं उपशीर्षकं प्रकाण्डकं अवघाटकं तरलप्रतिबद्धं च इति

यष्टिप्रभेदाः

02.11.07 यष्टीनां अष्टसहस्रं इन्द्रच्छन्दः

02.11.08 ततोऽर्धं विजयच्छन्दः

02.11.09 चतुष्षष्टिरर्धहारः

02.11.10 चतुष्पञ्चाशद् रश्मिकलापः

02.11.11 द्वात्रिंशद् गुच्छः

02.11.12 सप्तविंशतिर्नक्षत्रमाला

02.11.13 चतुर्विंशतिरर्धगुच्छः

02.11.14 विंशतिर्माणवकः

02.11.15 ततोऽर्धं अर्धमाणवकः

02.11.16 एत एव मणिमध्याः तन्माणवका भवन्ति

02.11.17 एकशीर्षकः शुद्धो हारः

02.11.18 तद्वत्शेषाः

02.11.19 मणिमध्योऽर्धमाणवकः

02.11.20 त्रिफलकः फलकहारः, पञ्चफलको वा

02.11.21 सूत्रं एकावली शुद्धा

02.11.22 सा एव मणिमध्या यष्टिः

02.11.23 हेममणिचित्रा रत्नावली

02.11.24 हेममणिमुक्ताऽन्तरोऽपवर्तकः

02.11.25 सुवर्णसूत्रान्तरं सोपानकम्

02.11.26 मणिमध्यं वा मणिसोपानकम्

02.11.27 तेन शिरोहस्तपादकटीकलापजालकविकल्पा व्याख्याताः

02.11.28 मणिः कौटोमालेयकः पारसमुद्रकश्च

02.11.29 सौगन्धिकः पद्मरागोऽनवद्यरागः पारिजातपुष्पको बालसूर्यकः

02.11.30 वैडूर्यं उत्पलवर्णः शिरीषपुष्पक उदकवर्णो वंशरागः शुकपत्त्रवर्णः पुष्यरागो गोमूत्रको गोमेदकः

02.11.31 इन्द्रनीलो नीलावलीयः कलायपुष्पको महानीलो जम्ब्वऽभो जीमूतप्रभो नन्दकः स्रवन्मध्यः

02.11.32 शुद्धस्फटिको मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्च । इति मणयः

02.11.33 षड्ऽश्रश्चतुर्ऽश्रो वृत्तो वा तीव्रागः संस्थानवान् अछः स्निग्धो गुरुरर्चिष्मान् अन्तर्गतप्रभः प्रभाऽनुलेपी च इति मणिगुणाः

02.11.34 मन्दरागप्रभः स-शर्करः पुष्पच्छिद्रः खण्डो दुर्विद्धो लेखाकीर्ण इति दोषाः

02.11.35 विमलकः सस्यकोऽञ्जनमूलकः पित्तकः सुलभको लोहिताक्षो मृगाश्मको ज्योतीरसको मालेयकोऽहिच्छत्रकः कूर्पः प्रतिकूर्पः सुगन्धिकूर्पः क्षीरवकः श्शुक्तिचूर्णकः शिलाप्रवालकः पुलकः शुक्लपुलक इत्यन्तरजातयः

02.11.36 शेषाः काचमणयः

02.11.37 सभाराष्ट्रकं तज्जमाराष्ट्रकं कास्तीरराष्ट्रकं श्रीकटनकं मणिमन्तकं इन्द्रवानकं च वज्रम्

02.11.38 खनिः स्रोतः प्रकीर्णकं च योनयः

02.11.39 मार्जाराक्षकं शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं मूलाटीवर्णं मणिवर्णानां अन्यतमवर्णं इति वज्रवर्णाः

02.11.40 स्थूलं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम्

02.11.41 नष्टकोणं निराश्रि पार्श्वापवृत्तं चाप्रशस्तम्

02.11.42 प्रवालकं आलकन्दकं वैवर्णिकं च, रक्तं पद्मरागं च करटगर्भिणिकावर्जं इति

02.11.43 चन्दनं सातनं रक्तं भूमिगन्धि

02.11.44 गोशीर्षकं कालताम्रं मत्स्यगन्धि

02.11.45 हरिचन्दनं शुकपत्त्रवर्णं आम्रगन्धि, तार्णसं च

02.11.46 ग्रामेरुकं रक्तं रक्तकालं वा बस्तमूत्रगन्धि

02.11.47 दैवसभेयं रक्तं पद्मगन्धि, जापकं च

02.11.48 जोङ्गकं रक्तं रक्तकालं वा स्निग्धं, तौरूपं च

02.11.49 मालेयकं पाण्डुरक्तम्

02.11.50 कुचन्दनं रूक्षं अगुरुकालं रक्तं रक्तकालं वा

02.11.51 कालपर्वतकं रक्तकालं अनवद्यवर्णं वा

02.11.52 कोशागारपर्वतकं कालं कालचित्रं वा

02.11.53 शीत उदकीयं पद्माभं कालस्निग्धं वा

02.11.54 नागपर्वतकं रूक्षं शैवलवर्णं वा

02.11.55 शाकलं कपिलम् । इति

02.11.56 लघु स्निग्धं अश्यानं सर्पिःस्नेहलेपि गन्धसुखं त्वग्ऽनुसार्यनुल्बणं अविराग्युष्णसहं दाहग्राहि सुखस्पर्शनं इति चन्दनगुणाः

02.11.57 अगुरु जोङ्गकं कालं कालचित्रं मण्डलचित्रं वा

02.11.58 श्यामं दोङ्गकम्

02.11.59 पारसमुद्रकं चित्ररूपं उशीरगन्धि नवमालिकागन्धि वा । इति

02.11.60 गुरु स्निग्धं पेशलगन्धि निर्हार्यग्निसहं असम्प्लुतधूमं विमर्दसहं इत्यगुरुगुणाः

02.11.61 तैलपर्णिकं अशोकग्रामिकं मांसवर्णं पद्मगन्धि

02.11.62 जोङ्गकं रक्तपीतकं उत्पलगन्धि गोमूत्रगन्धि वा

02.11.63 ग्रामेरुकं स्निग्धं गोमूत्रगन्धि

02.11.64 सौवर्णकुड्यकं रक्तपीतं मातुलुङ्गगन्धि

02.11.65 पूर्णकद्वीपकं पद्मगन्धि नवनीतगन्धि वा

02.11.66 भद्रश्रियं पारलौहित्यकं जातीवर्णम्

02.11.67 आन्तरवत्यं उशीरवर्णम्

02.11.68 उभयं कुष्ठगन्धि च । इति

02.11.69 कालेयकः स्वर्णभूमिजः स्निग्धपीतकः

02.11.70 औत्तरपर्वतको रक्तपीतकः इति साराः ।

02.11.71 पिण्डक्वाथधूमसहं अविरागि योगानुविधायि च

02.11.72 चन्दनागुरुवच्च तेषां गुणाः

02.11.73 कान्तनावकं प्रैयकं च उत्तरपर्वतकं चर्म

02.11.74 कान्तनावकं मयूरग्रीवाभम्

02.11.75 प्रैयकं नीलपीतश्वेतलेखाबिन्दुचित्रम्

02.11.76 तद्.उभयं अष्टाङ्गुलायामम्

02.11.77 बिसी महाबिसी च द्वादशग्रामीये

02.11.78 अव्यक्तरूपा दुहिलितिका चित्रा वा बिसी

02.11.79 परुषा श्वेतप्राया महाबिसी

02.11.80 द्वादशाङ्गुलायामं उभयम्

02.11.81 श्यामिका कालिका कदली चन्द्र उत्तरा शाकुला चारोहजाः

02.11.82 कपिला बिन्दुचित्रा वा श्यामिका

02.11.83 कालिका कपिला कपोतवर्णा वा

02.11.84 तद् उभयं अष्टाङ्गुलायामम्

02.11.85 परुषा कदली हस्तायता

02.11.86 सा एव चन्द्रचित्रा चन्द्र उत्तरा

02.11.87 कदलीत्रिभागा शाकुला कोठमण्डलचित्रा कृतकर्णिकाऽजिनचित्रा वा । इति

02.11.88 सामूरं चीनसी सामूली च बाह्लवेयाः

02.11.89 षट्त्रिंशद्ऽङ्गुलं अञ्जनवर्णं सामूरम्

02.11.90 चीनसी रक्तकाली पाण्डुकाली वा

02.11.91 सामूली गोधूमवर्णा । इति

02.11.92 सान्तिना नलतूला वृत्तपृच्छा चौद्राः

02.11.93 सातिना कृष्णा

02.11.94 नलतूला नलतूलवर्णा

02.11.95 कपिला वृत्तपुच्छा च इति चर्मजातयः ।

02.11.96 चर्मणां मृदु स्निग्धं बहुलरोम च श्रेष्ठम्

02.11.97 शुद्धं शुद्धरक्तं पक्षरक्तं चाविकं, खचितं वानचित्रं खण्डसङ्घात्यं तन्तुविच्छिन्नं च

02.11.98 कम्बलः कौचपकः कुलमितिका सौमितिका तुरगास्तरणं वर्णकं तलिच्छकं वारवाणः परिस्तोमः समन्तभद्रकं चाविकम्

02.11.99 पिच्छिलं आर्द्र इव च सूक्ष्मं मृदु च श्रेष्ठम्

02.11.100 अष्टप्रोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणं अपसारक इति नैपालकम्

02.11.101 सम्पुटिका चतुर्ऽश्रिका लम्बरा कटवानकं प्रावरकः सत्तलिका इति मृगरोम

02.11.102 वाङ्गकं श्वेतं स्निग्धं दुकूलम्

02.11.103 पौण्ड्रकं श्यामं मणिस्निग्धम्

02.11.104 सौवर्णकुड्यकं सूर्यवर्णं मणिस्निग्ध उदकवानं चतुर्ऽश्रवानं व्यामिश्रवानं च

02.11.105 एतेषां एकांशुकं अध्यर्धद्वित्रिचतुर्ऽंशुकं इति

02.11.106 तेन काशिकं पौण्ड्रकं च क्षौमं व्याख्यातम्

02.11.107 मागधिका पौण्ड्रिका सौवर्णकुड्यका च पत्त्र ऊर्णा

02.11.108 नागवृक्षो लिकुचो बकुलो वटश्च योनयः

02.11.109 पीतिका नागवृक्षिका

02.11.110 गोधूमवर्णा लैकुची

02.11.111 श्वेता बाकुली

02.11.112 शेषा नवनीतवर्णा

02.11.113 तासां सौवर्णकुड्यका श्रेष्ठा

02.11.114 तया कौशेयं चीनपट्टाश्च चीनभूमिजा व्याख्याताः

02.11.115 माधुरं आपरान्तकं कालिङ्गं काशिकं वाङ्गकं वात्सकं माहिषकं च कार्पासिकं श्रेष्ठम् । इति

02.11.116 अतः परेषां रत्नानां प्रमाणं मूल्यलक्षणम् ।

02.11.117 जातिं रूपं च जानीयान्निधानं नवकर्म च

02.11.118 पुराणप्रतिसंस्कारं कर्म गुह्यं उपस्करान् ।

02.11.119 देशकालपरीभोगं हिंस्राणां च प्रतिक्रियाम् (इति)

Chapt | Starting ore mines and factories

02.12.01 आकराध्यक्षः शुल्बधातुशास्त्ररसपाकमणिरागज्ञः तज्ज्ञसखो वा तज्जातकर्मकर उपकरणसम्पन्नः किट्टमूषाङ्गारभस्मलिङ्गं वाऽऽकरं भूतपूर्वं अभुतपूर्वं वा भूमिप्रस्तररसधातुं अत्यर्थवर्णगौरवं उग्रगन्धरसं परीक्षेत

02.12.02 पर्वतानां अभिज्ञात उद्देशानां बिलगुह उपत्यकालयनगूढखातेष्वन्तः प्रस्यन्दिनो जम्बूचूततालफलपक्वहरिद्राभेदगुड(गूड?)

हरितालमनःशिलाक्षौद्रहिङ्गुलुकपुण्डरीकशुकमयूरपत्त्रवर्णाः सवर्ण

उदकोषधिपर्यन्ताश्चिक्कणा विशदा भारिकाश्च रसाः काञ्चनिकाः

02.12.03 अप्सु निष्ठ्यूताः तैलवद्विसर्पिणः षड्कमलग्राहिणश्च ताम्ररूप्ययोः शताद् उपरि वेद्धारः

02.12.04 तत्प्रतिरूपकं उग्रगन्धरसं शिलाजतु विद्यात्

02.12.05 पीतकास्ताम्रकाः ताम्रपीतका वा भूमिप्रस्तरधातवो भिन्ना

नीलराजीवन्तो मुद्गमाषकृसरवर्णा वा दधिबिन्दुपिण्डचित्रा

हरिद्राहरीतकीपद्मपत्त्रशैवलयकृत्प्लीहानवद्यवर्णा

भिन्नाश्चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः सुगुलिका अर्चिष्मन्तः ताप्यमाना न भियन्ते बहुफेनधूमाश्च सुवर्णधातवः प्रतीवापार्थाः ताम्ररूप्यवेधनाः

02.12.06 शङ्खकर्पूरस्फटिकनवनीतकपोतपारावतविमलकमयूरग्रीवावर्णाः सस्यकगोमेदकगुडमत्स्यण्डिकावर्णाः कोविदारपद्मपाटलीकलायक्षौमातसीपुष्पवर्णाः स-सीसाः साञ्जना विस्रा भिन्नाः श्वेताभाः कृष्णाः कृष्णाभाः श्वेताः सर्वे वा लेखाबिन्दुचित्रा मृदवो ध्मायमाना न स्फुटन्ति बहुफेनधूमाश्च रूप्यधातवः

02.12.07 सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः

02.12.08 तेषां अशुद्धा मूढगर्भा वा तीक्ष्णमूत्रक्षरभाविता राजवृक्षवटपीलुगोपित्तरोचनामहिषखरकरभमूत्रलेण्डपिण्डबद्धाः तत्प्रतीवापाः तद्ऽवलेपा वा विशुद्धाः स्रवन्ति

02.12.09 यवमाषतिलपलाशपीलुक्षारैर्गोक्षीराजक्षीरैर्वा कदलीवज्रकन्दप्रतीवपो मार्दवकरः

02.12.10ab मधुमधुकं अजापयः स-तैलं घृतगुडकिण्वयुतं स-कन्दलीकम् ।

02.12.10chd यद् अपि शतसहस्रधा विभिन्नं भवति मृदु त्रिभिरेव तन्निषेकैः

02.12.11 गोदन्तशृङ्गप्रतीवापो मृदुस्तम्भनः

02.12.12 भारिकः स्निग्धो मृदुश्च प्रस्तरधातुर्भूमिभागो वा पिङ्गलो हरितः पाटलो लोहितो वा ताम्रधातुः

02.12.13 काकमोचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रः सीसधातुः

02.12.14 ऊषरकर्बुरः पक्वलोष्ठवर्णो वा त्रपुधातुः

02.12.15 खरुम्बः पाण्डुरोहितः सिन्दुवारपुष्पवर्णो वा तीक्ष्णधातुः

02.12.16 काकाण्डभुजपत्त्रवर्णो वा वैकृन्तकधातुः

02.12.17 अच्छः स्निग्धः स-प्रभो घोषवान् शीतः तीव्रः तनुरागश्च मणिधातुः

02.12.18 धातुसमुत्थं तज्जातकर्मान्तेषु प्रयोजयेत्

02.12.19 कृतभाण्डव्यवहारं एकमुखं, अत्ययं चान्यत्र कर्तृक्रेतृविक्रेतृणां स्थापयेत्

02.12.20 आकरिकं अपहरन्तं अष्टगुणं दापयेद् अन्यत्र रत्नेभ्यः

02.12.21 स्तेनं अनिसृष्ट उपजीविनं च बद्धं कर्म कारयेत्, दण्ड उपकारिणं च

02.12.22 व्ययक्रियाभारिकं आकरं भागेन प्रक्रयेण वा दद्यात्, लाघविकं आत्मना कारयेत्

02.12.23 लोहाध्यक्षः ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् कारयेत्, लोहभाण्डव्यवहारं च

02.12.24 लक्षणाध्यक्षश्चतुर्भागताम्रं रूप्यरूपं तीक्ष्णत्रपुसीसाञ्जनानां अन्यतममाषबीजयुक्तं कारयेत् - पणं अर्धपणं पादं, अष्टभागं इति, पादाजीवं ताम्ररूपं - माषकं अर्धमाषकं काकणीं अर्धकाकणीं इति

02.12.25 रूपदर्शकः पणयात्रां व्यावहारिकीं कोशप्रवेश्यां च स्थापयेत्

02.12.26 रूपिकं अष्टकं शतं, पञ्चकं शतं व्याजीं, पारीक्षिकं अष्टभागिकं, शतं, पञ्चविंशतिपणं अत्ययं च अन्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्यः

02.12.27 खन्य्ऽध्यक्षः शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् कारयेत्, पणनव्यवहारं च

02.12.28 लवणाध्यक्षः पाकमुक्तं लवणभागं प्रक्रयं च यथाकालं सङ्गृह्णीयाद्, विक्रयाच्च मूल्यं रूपं व्याजीं च

02.12.29 आगन्तुलवणं षड्भागं दद्यात्

02.12.30 दत्तभागविभागस्य विक्रयः, पञ्चकं शतं व्याजीं रूपं रूपिकं च

02.12.31 क्रेता शुल्कं राजपण्यच्छेदानुरूपं च वैधरणं दद्यात्, अन्यत्र क्रेता षट्छतं अत्ययं च

02.12.32 विलवणं उत्तमं दण्डं दद्याद्, अनिषृष्ट उपजीवी चान्यत्र वानप्रस्थेभ्यः

02.12.33 श्रोत्रियाः तपस्विनो विष्टयश्च भक्तलवणं हरेयुः

02.12.34 अतोऽन्यो लवणक्षारवर्गः शुल्कं दद्यात्

02.12.35ab एवं मूल्यं च भागं च व्याजीं परिघं अत्ययम् ।

02.12.35chd शुल्कं वैधरणं दण्डं रूपं रूपिकं एव च

02.12.36ab खनिभ्यो द्वादशविधं धातुं पण्यं च संहरेत् ।

02.12.36chd एवं सर्वेषु पण्येषु स्थापयेन् मुखसङ्ग्रहम्

02.12.37ab आकरप्रभः कोशः कोशाद् दण्डः प्रजायते ।

02.12.37chd पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा (इति)

Chapt | Superintendent of gold in the Rorkshop

02.13.01 सुवर्णाध्यक्षः सुवर्णरजतकर्मान्तानां असम्बन्धावेशनचतुःशालां एकद्वारां अक्षशालां कारयेत्

02.13.02 विशिखामध्ये सौवर्णिकं शिल्पवन्तं अभिजातं प्रात्ययिकं च स्थापयेत्

02.13.03 जाम्बूनदं शातकुम्भं हाटकं वैणवं शृङ्गशुक्तिजं जातरूपं रसविद्धं आकर उद्गतं च सुवर्णम्

02.13.04 किञ्जल्कवर्णं मृदु स्निग्धं अनादि भ्राजिष्णु च श्रेष्ठं, रक्तपीतकं मध्यमं, रक्तं अवरम्

02.13.05 श्रेष्ठानां पाण्डु श्वेतं चाप्रास्कम्

02.13.06 तद् येनाप्रास्कं तच्चतुर्गुणेन सीसेन शोधयेत्

02.13.07 सीसान्वयेन भिद्यमानं शुष्कपटलैर्ध्मापयेत्

02.13.08 रूक्षत्वाद् भिद्यमानं तैलगोमये निSएचयेत्

02.13.09 आकर उद्गतं सीसान्वयेन भिद्यमानं पाकपत्त्राणि कृत्वा गण्डिकासु कुट्टयेत्, कदलीवज्रकन्दकल्के वा निSएचयेत्

02.13.10 तुत्थ उद्गतं गौडिकं काम्बुकं चाक्रवालिकं च रूप्यम्

02.13.11 श्वेतं स्निग्धं मृदु च श्रेष्ठम्

02.13.12 विपर्यये स्फोटनं च दुष्टम्

02.13.13 तत्सीसचतुर्भागेन शोधयेत्

02.13.14 उद्वतचूलिकं अच्छं भ्राजिष्णु दधिवर्णं च शुद्धम्

02.13.15 शुद्धस्य एको हारिद्रस्य सुवर्णो वर्णकः

02.13.16 ततः शुल्बकाकण्य्.उत्तरापसारिता आचतुःसीमान्ताद् इति षोडश वर्णकाः

02.13.17 सुवर्णं पूर्वं निकष्य पश्चाद् वर्णिकां निकषयेत्

02.13.18 समरागलेखं अनिम्न उन्नते देशे निकषितं, परिमृदितं परिलीढं नखान्तराद् वा गैरिकेणावचूर्णितं उपधिं विद्यात्

02.13.19 जातिहिङ्गुलुकेन पुष्पकासीसेन वा गोमूत्रभावितेन दिग्धेनाग्रहस्तेन संस्पृष्टं सुवर्णं श्वेतीभवति

02.13.20 स-केसरः स्निग्धो मृदुर्भाजिष्णुश्च निकषरागः श्रेष्ठः

02.13.21 कालिङ्गकः तापीपाषाणो वा मुद्गवर्णो निकषः श्रेष्ठः

02.13.22 समरागी विक्रयक्रयहितः

02.13.23 हस्तिच्छविकः सहरितः प्रतिरागी विक्रयहितः

02.13.24 स्थिरः परुषो विषमवर्णश्चाप्रतिरागी क्रयहितः

02.13.25 छेदश्चिक्कणः समवर्णः श्लक्ष्णो मृदुर्भाजिष्णुश्च श्रेष्ठः

02.13.26 तापो बहिर्ऽन्तश्च समः किञ्जल्कवर्णः कुरण्डकपुष्पवर्णो वा श्रेष्ठः

02.13.27 श्यावो नीलश्चाप्रासकः

02.13.28 तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः

02.13.29 तेन उपदेशेन रूप्यसुवर्णं दद्याद् आददीत च

02.13.30 अक्षशालां अनायुक्तो न उपगच्छेत्

02.13.31 अभिगच्छन्न् उच्छेद्यः

02.13.32 आयुक्तो वा सरूप्यसुवर्णः तेन एव जीयेत

02.13.33 विचितवस्त्रहस्तगुह्याः काञ्चनपृषतत्वष्टृतपनीयकारवो ध्मायकचरकपांसुधावकाः प्रविशेयुर्निष्कसेयुश्च

02.13.34 सर्वं च एषां उपकरणं अनिष्ठिताश्च प्रयोगाः तत्र एवावतिष्ठेरन्

02.13.35 गृहीतं सुवर्णं धृतं च प्रयोगं करणमध्ये दद्यात्

02.13.36 सायं प्रातश्च लक्षितं कर्तृकारयितृमुद्राभ्यां निदध्यात्

02.13.37 क्षेपणो गुणः क्षुद्रकं इति कर्माणि

02.13.38 क्षेपणः काचार्पणादीनि

02.13.39 गुणः सूत्रवानादीनि

02.13.40 घनं सुषिरं पृषतादियुक्तं क्षुद्रकं इति

02.13.41 अर्पयेत् काचकर्मणः पञ्चभागं काञ्चनं दशभागं कटुमानम्

02.13.42 ताम्रपादयुक्तं रूप्यं रूप्यपादयुक्तं वा सुवर्णं संस्कृतकं, तस्माद् रक्षेत्

02.13.43 पृषतकाचकर्मणः त्रयो हि भागाः परिभाण्डं द्वौ वास्तुकं, चत्वारो वा वास्तुकं त्रयः परिभाण्डम्

02.13.44 त्वष्टृकर्मणः शुल्बभाण्डं समसुवर्णेन सम्यूहयेत्

02.13.45 रूप्यभाण्डं घनं सुषिरं वा सुवर्णार्धेनावलेपयेत्

02.13.46 चतुर्भागसुवर्णं वा वालुकाहिङ्गुलुकस्य रसेन चूर्णेन वा वासयेत् ।

02.13.47 तपनीयं ज्येष्ठं सुवर्णं सुरागं समसीसातिक्रान्तं पाकपत्त्रपक्वं सैन्धविकया ऽज्ज्वालितं नीलपीतश्वेतहरितशुकपत्त्रवर्णानां प्रकृतिर्भवति

02.13.48 तीक्ष्णं चास्य मयूरग्रीवाभं श्वेतभङ्गं चिमिचिमायितं पीतचूर्णितं काकणिकः सुवर्णरागः

02.13.49 तारं ऽपशुद्धं वा - अस्थितुत्थे चतुः समसीसे चतुः शुष्कतुत्थे चतुः कपाले त्रिर्गोमये द्विरेवं सप्तदशतुत्थातिक्रान्तं सैन्धविकया ऽज्ज्वालितम्

02.13.50 एतस्मात् काकण्य्.ऽत्तरमाद् विमाषाद् इति सुवर्णे देयं, पश्चाद् रागयोगः, श्वेततारं भवति ।

02.13.51 त्रयोऽंशाः तपनीयस्य द्वात्रिंशद्भागश्वेततारं ऊर्च्छिताः तत् श्वेतलोहितकं भवति

02.13.52 ताम्रं पीतकं करोति

02.13.53 तपनीयं ऽज्ज्वाल्य रागत्रिभागं दद्यात्, पीतरागं भवति

02.13.54 श्वेततारभागौ द्वावेकः तपनीयस्य मुद्गवर्णं करोति

02.13.55 कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति

02.13.56 प्रतिलेपिना रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्त्रवर्णं भवति

02.13.57 तस्यारम्भे रागविशेषेषु प्रतिवर्णिकां गृह्णीयात्

02.13.58 तीक्ष्णताम्रसंस्कारं च बुध्येत

02.13.59 तस्माद् वज्रमणिमुक्ताप्रवालरूपाणां अपनेयिमानं च रूप्यसुवर्णभाण्डबन्धप्रमाणानि च

02.13.60ab समरागं समद्वन्द्वं असक्तपृषतं स्थिरम् ।

02.13.60chd सुप्रमृष्टं असम्पीतं विभक्तं धारणे सुखम्

02.13.61ab अभिनीतं प्रभायुक्तं संस्थानं अधुरं समम् ।

02.13.61chd मनोनेत्राभिरामं च तपनीयगुणाः स्मृताः (इति)

Chapt | Activity of the goldsmitH in the market-highRaय्

02.14.01 सौवर्णिकः पौरजानपदानां रूप्यसुवर्णं आवेशनिभिः कारयेत्

02.14.02 निर्दिष्टकालकार्यं च कर्म कुर्युः, अनिर्दिष्टकालं कार्यापदेशम्

02.14.03 कार्यस्यान्यथाकरणे वेतननाशः, तद्द्विगुणश्च दण्डः

02.14.04 कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः

02.14.05 यथावर्णप्रमाणं निक्षेपं गृह्णीयुः तथाविधं एवार्पयेयुः

02.14.06 कालान्तराद् अपि च तथाविधं एव प्रतिगृह्णीयुः, अन्यत्र क्षीणपरिशीर्णाभ्याम्

02.14.07 आवेशनिभिः सुवर्णपुद्गललक्षणप्रयोगेषु तत्तज् जानीयात्

02.14.08 तत्सकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः

02.14.09 तीक्ष्णकाकणी - रूप्यद्विगुणः - रागप्रक्षेपः, तस्य षड्भागः क्षयः

02.14.10 वर्णहीने माषावरे पूर्वः साहसदण्डः, प्रमाणहीने मध्यमः, तुलाप्रतिमान उपधावुत्तमः, कृतभाण्ड उपधौ च

02.14.11 सौवर्णिकेनादृष्टं अन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः

02.14.12 कर्तुर्द्विगुणः स-अपसारश्चेत्

02.14.13 अनपसारः कण्टकशोधनाय नीयेत

02.14.14 कर्तुश्च द्विशतो दण्डः पणच्छेदनं वा

02.14.15 तुलाप्रतिमानभाण्डं पौतवहस्तात् क्रीणीयुः

02.14.16 अन्यथा द्वादशपणो दण्डः

02.14.17 घनं सुषिरं सम्यूह्यं अवलेप्यं सङ्घात्यं वासितकं च कारुकर्म

02.14.18 तुलाविषमं अपसारणं विस्रावणं पेटकः पिङ्कश्च इति हरण उपायाः

02.14.19 सम्नामिन्युत्कीर्णिका भिन्नमस्तक उपकण्ठी कुशिक्या सकटुकक्ष्या परिवेल्याऽयस्कान्ता च दुष्टतुलाः

02.14.20 रूप्यस्य द्वौ भागावेकः शुल्बस्य त्रिपुटकम्

02.14.21 तेनाकरोद् गतं अपसार्यते तत्त्रिपुटकापसारितम्

02.14.22 शुल्बेन शुल्बापसारितं, वेल्लकेन वेल्लकापसारितं, शुल्बार्धसारेण हेम्ना हेमापसारितम्

02.14.23 मूकमूषा पूतिकिट्टः करटुकमुखं नाली सन्दंशो जोङ्गनी सुवर्चिकालवणं तद् एव सुवर्णं इत्यपसारणमार्गाः

02.14.24 पूर्वप्रणिहिता वा पिण्डवालुका मूषाभेदाद् अग्निष्ठाद् उद्ध्रियन्ते

02.14.25 पश्चाद् बन्धने आचितकपत्त्रपरीक्षायां वा रूप्यरूपेण परिवर्तनं विस्रावणं, पिण्डवालुकानां लोहपिण्डवालुकाभिर्वा

02.14.26 गाढश्चाभ्युद्धार्यश्च पेटकः सम्यूह्यावलेप्यसङ्घात्येषु क्रियते

02.14.27 सीसरूपं सुवर्णपत्त्रेणावलिप्तं अभ्यन्तरं अष्टकेन बद्धं गाढपेटकः

02.14.28 स एव पटलसम्पुटेष्वभ्युद्धार्यः

02.14.29 पत्त्रं आश्लिष्टं यमकपत्त्रं वाऽवलेप्येषु क्रियते

02.14.30 शुल्बं तारं वा गर्भः पत्त्राणां सङ्घात्येषु क्रियते

02.14.31 शुल्बरूपं सुवर्णपत्त्रसंहतं प्रमृष्टं सुपार्श्वं, तद् एव यमकपत्त्रसंहृतं प्रमृष्टं ताम्रताररुपं च उत्तरवर्णकः

02.14.32 तद् उभयं तापनिकषाभ्यां निहशब्द उल्लेखनाभ्यां वा विद्यात्

02.14.33 अभ्युद्धार्यं बदराम्ले लवण उदके वा सादयन्ति इति पेटकः

02.14.34 घने सुषिरे वा रूपे सुवर्णमृन्मालुकाहिङ्गुलुककल्पो वा तप्तोऽवतिष्ठते

02.14.35 दृढवास्तुके वा रूपे वालुकामिश्रं जतु गान्धारपङ्को वा तप्तोऽवतिष्ठते

02.14.36 तयोः तापनं अवध्वंसनं वा शुद्धिः

02.14.37 स-परिभाण्डे वा रूपे लवणं उल्कया कटुशर्करया तप्तं अवतिष्ठते

02.14.38 तस्य क्वाथनं शुद्धिः

02.14.39 अभ्रपटलं अष्टकेन द्विगुणवास्तुके वा रूपे बध्यते

02.14.40 तस्यापिहितकाचकस्य उदके निमज्जत एकदेशः सीदति, पटलान्तरेषु वा सूच्या भिद्यते

02.14.41 मणयो रूप्यं सुवर्णं वा घनसुषिराणां पिङ्कः

02.14.42 तस्य तापनं अवध्वंसनं वा शुद्धिः । इति पिङ्कः

02.14.43 तस्माद् वज्रमणिमुक्ताप्रवालरूपाणां जातिरूपवर्णप्रमाणपुद्गललक्षणान्युपलभेत

02.14.44 कृतभाण्डपरीक्षायां पुराणभाण्डप्रतिसंस्कारे वा चत्वारो हरण उपायाः - परिकुट्टनं अवच्छेदनं उल्लेखनं परिमर्दनं वा

02.14.45 पेटकापदेशेन पृषतं गुणं पिटकां वा यत् परिशातयन्ति तत्परिकुट्टनम्

02.14.46 यद्द्विगुणवास्तुकानां वा रूपे सीसरूपं प्रक्षिप्याभ्यन्तरं अवच्छिन्दन्ति तद् अवच्छेदनम्

02.14.47 यद् घनानां तीक्ष्णेन उल्लिखन्ति तद् उल्लेखनम्

02.14.48 हरितालमनःशिलाहिङ्गुलुकचूर्णानां अन्यतमेन कुरुविन्दचूर्णेन वा वस्त्रं सम्यूह्य यत् परिमृद्नन्ति तत् परिमर्दनम्

02.14.49 तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते, न च एषां किञ्चिद् अवरुग्णं भवति

02.14.50 भग्नखण्डघृष्टानां सम्यूह्यानां सदृशेनानुमानं कुर्यात्

02.14.51 अवलेप्यानां यावद् उत्पाटितं तावद् उत्पाट्यानुमानं कुर्यात्

02.14.52 विरूपाणां वा तापनं उदकपेषणं च बहुशः कुर्यात्

02.14.53 अवक्षेपः प्रतिमानं अग्निर्गण्डिका भण्डिकाधिकरणी पिञ्छः सूत्रं चेल्लं बोल्लनं शिर उत्सङ्गो मक्षिका स्वकाय ईक्षा दृतिरुदकशरावं अग्निष्ठं इति काचं विद्यात्

02.14.54 राजतानां विस्रं मलग्राहि परुषं प्रस्तीनं विवर्णं वा दुष्टं इति विद्यात्

02.14.55ab एवं नवं च जीर्णं च विरूपं चापि भाण्डकम् ।

02.14.55chd परीक्षेतात्ययं च एषां यथा उद्दिष्टं प्रकल्पयेत् (इति)

Chapt | Superintendent of the magashin

02.15.01 कोष्ठागाराध्यक्षः

सीताराष्ट्रक्रयिमपरिवर्तकप्रामित्यकापमित्यकसंहनिकान्यजातव्ययप्रत्याय उपस्थानान्युपलभेत्

02.15.02 सीताऽध्यक्ष उपनीतः सस्यवर्णकः सीता

02.15.03 पिण्डकरः षड्भागः सेनाभक्तं बलिः कर उत्सङ्गः पार्श्वं पारिहीणिकं औपायनिकं कौष्ठेयकं च राष्ट्रम्

02.15.04 धान्यमूल्यं कोशनिर्हारः प्रयोगप्रत्यादानं च क्रयिमम्

02.15.05 सस्यवर्णानां अर्घान्तरेण विनिमयः परिवर्तकः

02.15.06 सस्ययाचनं अन्यतः प्रामित्यकम्

02.15.07 तद् एव प्रतिदानार्थं आपमित्यकम्

02.15.08 कुट्टकरोचकसक्तुशुक्तपिष्टकर्म तज्जीवनेषु तैलपीडनमौद्रचाक्रिकेष्विक्षूणां च क्षारकर्म संहनिका

02.15.09 नष्टप्रस्मृतादिरन्यजातः

02.15.10 विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः

02.15.11 तुलामानान्तरं हस्तपूरणं उत्करो व्याजी पर्युषितं प्रार्जितं च उपस्थानम् । इति

02.15.12 धान्यस्नेहक्षारलवणानां धान्यकल्पं सीताऽध्यक्षे वक्ष्यामः

02.15.13 सर्पिस्तैलवसामज्जानः स्नेहाः

02.15.14 फाणितगुडमत्स्यण्डिकाखण्डशर्कराः क्षारवर्गः

02.15.15 सैन्धवसामुद्रबिडयवक्षारसौवर्चल उद्भेदजा लवणवर्गः

02.15.16 क्षौद्रं मार्द्वीकं च मधु

02.15.17 इक्षुरसगुडमधुफाणितजाम्बवपनसानां अन्यतमो मेषशृङ्गीपिप्पलीक्वाथाभिषुतो मासिकः षाण्मासिकः सांवत्सरिको वा चिद्भिटोर्वारुक इक्षुकाण्डाम्रफलामलकावसुतः शुद्धो वा शुक्तवर्गः

02.15.18 वृक्षाम्लकरमर्दाम्रविदलामलकमातुलुङ्गकोलबदरसौवीरकपरूषकादिः फलाम्लवर्गः

02.15.19 दधिधान्याम्लादिर्द्रवाम्लवर्गः

02.15.20

पिप्पलीमरिचशृङ्गिबेराऽजाजीकिराततिक्तगौरसर्षपकुस्तुम्बुरुचोरकदमनकमरुवकशिग्रुकाण्डादिः कटुकवर्गः

02.15.21 शुष्कमत्स्यमांसकन्दमूलफलशाकादि च शाकवर्गः

02.15.22 ततोऽर्धं आपद्ऽर्थं जानपदानां स्थापयेद्, अर्धं उपयुञ्जीत

02.15.23 नवेन चानवं शोधयेत्

02.15.24 क्षुण्णघृष्टपिष्टभृष्टानां आर्द्रशुष्कसिद्धानां च धान्यानां वृद्धिक्षयप्रमाणानि प्रत्यक्षीकुर्वीत

02.15.25 कोद्रवव्रीहीणां अर्धं सारः, शालीनां अर्धभाग ऊनः, त्रिभाग ऊनो वरकाणाम्

02.15.26 प्रियङ्गूणां अर्धं सारो नवभागवृद्धिश्च

02.15.27 उदारकः तुल्यः, यवा गोधूमाश्च क्षुण्णाः, तिला यवा मुद्गमाषाश्च घृष्टाः

02.15.28 पञ्चभागवृद्धिर्गोधूमः, सक्तवश्च

02.15.29 पाद ऊना कलायचमसी

02.15.30 मुद्गमाषाणां अर्धपाद ऊना

02.15.31 शौम्ब्यानां अर्धं सारः, त्रिभाग ऊनो मसूराणाम्

02.15.32 पिष्टं आमं कुल्माषाश्चाध्यर्धगुणाः

02.15.33 द्विगुणो यावकः, पुलाकः, पिष्टं च सिद्धम्

02.15.34 कोद्रववरक उदारकप्रियङ्गूणां त्रिगुणं अन्नं, चतुर्गुणं व्रीहीणां, पञ्चगुणं शालीनाम्

02.15.35 तिमितं अपरान्नं द्विगुणं, अर्धाधिकं विरूढानाम्

02.15.36 पञ्चभागवृद्धिर्भृष्टानाम्

02.15.37 कलायो द्विगुणः, लाजा भरुजाश्च

02.15.38 षट्कं तैलं अतसीनाम्

02.15.39 निम्बकुशाम्रकपित्थादीनां पञ्चभागः

02.15.40 चतुर्भागिकाः तिलकुसुम्भमधूक इङ्गुदीस्नेहाः

02.15.41 कार्पासक्षौमाणां पञ्चपले पलं सूत्रम्

02.15.42 पञ्चद्रोणे शालीनां द्वादशाढकं तण्डुलानां कलभभोजनं, एकादशकं व्यालानां, दशकं औपवाह्यानां नवकं साम्नाह्यानां, अष्टकं पत्तीनां, सप्तकं मुख्यानां, षट्कं देवीकुमाराणां, पञ्चकं राज्ञां, अखण्डपरिशुद्धानां वा तुअण्डुलानां प्रस्थः

02.15.43 तण्डुलानां प्रस्थः चतुर्भागः सूपः सूपषोडशो लवणस्यांशः चतुर्भागः सर्पिषः तैलस्य वा एकं आर्यभक्तं पुंसः

02.15.44 षड्भागः सूपः अर्धस्नेहं अवराणाम्

02.15.45 पाद ऊनं स्त्रीणाम्

02.15.46 अर्धं बालानाम्

02.15.47 मांसपलविंशत्या स्नेहार्धकुडुबः पलिको लवणस्यांशः क्षारपलयोगो द्विधरणिकः कटुकयोगो दध्नुश्चार्धप्रस्थः

02.15.48 तेन उत्तरं व्याख्यातम्

02.15.49 शाकानां अध्यर्धगुणः, शुष्काणां द्विगुणः, स चैव योगः

02.15.50 हस्त्यश्वयोः तदध्यक्षे विधाप्रमाणं वक्ष्यामः

02.15.51 बलीवर्दानां माषद्रोणं यवानां वा पुलाकः, शेषं अश्वविधानम्

02.15.52 विशेषो घाणपिण्याकतुला, कणकुण्डकं दशाढकं वा

02.15.53 द्विगुणं महिष उष्ट्राणाम्

02.15.54 अर्धद्रोणं खरपृषतरोहितानाम्

02.15.55 आढकं एणकुरङ्गाणाम्

02.15.56 अर्धाढकं अज एडकवराहाणां, द्विगुणं वा कणकुण्डकम्

02.15.57 प्रस्थोदनः शुनाम्

02.15.58 हंसक्रौञ्चमयूराणां अर्धप्रस्थः

02.15.59 शेषाणां अतो मृगपशुपक्षिव्यालानां एकभक्ताद् अनुमानं ग्राहयेत्

02.15.60 अङ्गारांः तुषान् लोहकर्मान्तभित्तिलेप्यानां हारयेत्

02.15.61 कणिका दासकर्मकरसूपकाराणां, अतोऽन्यद् औदनिकापूपिकेभ्यः प्रयच्छेत्

02.15.62 तुलामानभाण्डं रोचनीदृषन्मुसल उलूखलकुट्टकरोचकयन्त्रपत्त्रकशूर्पचालनिकाकण्डोलीपिटकसम्मार्जन्यश्च उपकरणानि

02.15.63
मार्जकरक्षकधरकमायकमापकदायकदापकशलाकाप्रतिग्राहकदासकर्मकरवर्गश्च विष्टिः

02.15.64ab उच्चैर्धान्यस्य निक्षेपो मूताः क्षारस्य संहताः ।

02.15.64chd मृत्काष्ठकोष्ठाः स्नेहस्य पृथिवी लवणस्य च (इति)

Chapt | Director of trade

02.16.01 पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथवारिपथ उपयातानां सारफल्ग्व्sर्घान्तरं प्रियाप्रियतां च विद्यात्, तथा विक्षेपसङ्क्षेपक्रयविक्रयप्रयोगकालान्

02.16.02 यच्च पण्यं प्रचुरं स्यात् तद् एकीकृत्यार्घं आरोपयेत्

02.16.03 प्राप्तेsर्घे वाsर्घान्तरं कारयेत्

02.16.04 स्वभूमिजानां राजपण्यानां एकमुखं व्यवहारं स्थापयेत्, परभूमिजानां अनेकमुखम्

02.16.05 उभयं च प्रजानां अनुग्रहेण विक्रापयेत्

02.16.06 स्थूलं अपि च लाभं प्रजानां औपघातिकं वारयेत्

02.16.07 अजस्रपण्यानां काल उपरोधं सङ्कुलदोषं वा न उत्पादयेत्

02.16.08 बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन्

02.16.09 छेदानुरूपं च वैधरणं दद्युः

02.16.10 षोडशभागो मानव्याजी, विंशतिभागः तुलामानं, गण्यपण्यानां एकादशभागः

02.16.11 परभूमिजं पण्यं अनुग्रहेणावाहयेत्

02.16.12 नाविकसार्थवाहेभ्यश्च परिहारं आयतिक्षमं दद्यात्

02.16.13 अनभियोगश्चार्थेष्वागन्तूनां, अन्यत्र सभ्या उपकारिभ्यः

02.16.14 पण्याधिष्ठातारः पण्यमूल्यं एकमुखं काष्ठद्रोण्यां एकच्छिद्रापिधानायां निदध्युः

02.16.15 अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः - इदं विक्रीतं, इदं शेषम् इति

02.16.16 तुलामानभाण्डं चार्पयेयुः

02.16.17 इति स्वविषये व्याख्यातम्

02.16.18 परविषये तु - पण्यप्रतिपण्ययोरर्घं मूल्यं चागमय्य
शुल्कवर्तन्याऽऽतिवाहिकगुल्मतरदेयभक्तभागव्ययशुद्धं उदयं पश्येत्
02.16.19 असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यानयनेन वा लाभं पश्येत्
02.16.20 ततः सारपादेन स्थलव्यवहारं अध्वना क्षेमेण प्रयोजयेत्
02.16.21 अटव्यऽन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेद् अनुग्रहार्थम्
02.16.22 आपदि सारं आत्मानं वा मोक्षयेत्
02.16.23 आत्मनो वा भूमिं प्राप्तः सर्वदेयविशुद्धं व्यवहरेत
02.16.24 वारिपथे वा
यानभागकपथ्यऽदनपण्यप्रतिपण्यार्घप्रमाणयात्राकालभयप्रतीकारपण्यपत्तनचारित्राण्युपलभेत
02.16.25ab नदीपथे च विज्ञाय व्यवहारं चरित्रतः ।
02.16.25chd यतो लाभः ततो गच्छेद् अलाभं परिवर्जयेत् (इति)

Chapt | Director of forest produce
02.17.01 कुप्याध्यक्षो द्रव्यवनपालैः कुप्यं आनाययेत्
02.17.02 द्रव्यवनकर्मान्तांश्च प्रयोजयेत्
02.17.03 द्रव्यवनच्छिद्रां च देयं अत्ययं च स्थापयेद् अन्यत्रापद्भ्यः
02.17.04 कुप्यवर्गः -
शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपाऽरिमेदराजादनशिरीषखदिरसरलतालसर्जाश्च
कर्णसोमवल्ककुशाम्रप्रियकधवादिः सारदारुवर्गः
02.17.05 उटजचिमियचापवेणुवंशसातिनकण्टकभाल्लूकादिर्वेणुवर्गः
02.17.06 वेत्रशीकवल्लीवाशीश्यामलतानागलताऽऽदिर्वल्लीवर्गः
02.17.07 मालतीमूर्वाऽर्कशणगवेधुकाऽतस्य्ऽअदिर्वल्कवर्गः
02.17.08 मुञ्जबल्बजादि रज्जुभाण्डम्
02.17.09 तालीतालभूर्जानां पत्त्रम्
02.17.10 किंशुककुसुम्भकुङ्कुमानां पुष्पम्
02.17.11 कन्दमूलफलादिरौषधवर्गः
02.17.12
कालकूटवत्सनाभहालाहलमेषशृङ्गमुस्ताकुष्ठमहाविषवेल्लितकगौरार्द्रबालकमार्कटहैमवतका

लिङ्गकदारदकाङ्कोलसारक उष्ट्रकादीनि विषाणि, सर्पाः कीटाश्च त एव कुम्भगताः विषवर्गः

02.17.13

गोधासेरकद्वीप्य्.ऋक्षशिंशुमारसिंहव्याघ्रहस्तिमहिषचमरसृमरखड्गगोमृगगवयानां चर्मास्थिपित्तस्नाय्व्sक्षिदन्तशृङ्गखुरपुच्छानि, अन्येषां वाऽपि मृगपशुपक्षिव्यालानाम्

02.17.14 कालायसताम्रवृत्तकंससीसत्रपुवैकृन्तकारकूटानि लोहानि

02.17.15 विदलमृत्तिकामयं भाण्डम्

02.17.16 अङ्गारतुषभस्मानि, मृगपशुपक्षिव्यालवाटाः काष्ठतृणवाटाश्च । इति

02.17.17ab बहिरन्तश्च कर्मान्ता विभक्ताः सार्वभाण्डिकाः ।

02.17.17chd आजीवपुररक्षाऽर्थाः कार्याः कुप्य उपजीविना (इति)

Chapt | Superintendent of the armourय्

02.18.01 आयुधागाराध्यक्षः साङ्ग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं च यन्त्रं आयुधं आवरणं उपकरणं च तज्जातकारुशिल्पिभिः

कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत्, स्वभूमिषु च स्थापयेत्

02.18.02 स्थानपरिवर्तनं आतपप्रवातप्रदानं च बहुशः कुर्यात्

02.18.03 ऊष्म उपस्नेहक्रिमिभिरुपहन्यमानं अन्यथा स्थापयेत्

02.18.04 जातिरूपलक्षणप्रमाणागममूल्यनिक्षेपैश्च उपलभेत

02.18.05

सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसङ्घाटीयानकपर्जन्यकबाहु.ऊर्ध्वबाह्वsर्धबाहूनि स्थितयन्त्राणि

02.18.06

पाञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरगदास्पृक्तलाकुद्दालास्फाटिम उत्पाटिम उद्घाटिमशतघ्निशूलचक्राणि चलयन्त्राणि

02.18.07

शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णकणयकर्पणत्रासिकादीनि च हुलमुखानि

02.18.08 तालचापदारवशाङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि

02.18.09 मूर्वाऽर्कशनगवेधुवेणुस्नायूनि ज्याः

02.18.10 वेणुशरशलाकादण्डासननाराचाश्च इषवः

02.18.11 तेषां मुखानि छेदनभेदनताडनान्यायसास्थिदारवाणि

02.18.12 निस्त्रिंशमण्डलाग्रासियष्टयः खड्गाः

02.18.13 खड्गमहिषवारणविषाणदारुवेणुमूलानि त्सरवः

02.18.14 परशुकुठारपट्टसखनित्रकुद्दालक्रकचकाण्डच्छेदनाः क्षुरकल्पाः

02.18.15 यन्त्रगोष्पणमुष्टिपाषाणरोचनीदृषदश्चाश्मायुधानि

02.18.16 लोहजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गधेनुकहस्तिगोचर्मखुरशृङ्गसङ्घातं वर्माणि

02.18.17 शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारवाणपट्टनाग उदरिकाः पेटीचर्महस्तिकर्णतालमूलधमनिकाकपाटकिटिकाऽप्रतिहतबलाहकान्ताश्चावरणाणि

02.18.18 हस्तिरथवाजिनां योग्याभाण्डं आलङ्कारिकं सम्नाहकल्पनाश्च उपकरणानि

02.18.19 ऐन्द्रजालिकं औपनिषदिकं च कर्म

02.18.20ab कर्मान्तानां च - इच्छां आरम्भनिष्पत्तिं प्रयोगं व्याजं उद्दयम् ।

02.18.20chd क्षयव्ययौ च जानीयात् कुप्यानां आयुध ईश्वरः (इति)

Chapt | Standardization of Rights and measures

02.19.01 पौतवाध्यक्षः पौतवकर्मान्तान् कारयेत्

02.19.02 धान्यमाषा दश सुवर्णमाषकः, पञ्च वा गुञ्जाः

02.19.03 ते षोडश सुवर्णः कर्षो वा

02.19.04 चतुष्कर्षं पलम्

02.19.05 अष्टाशीतिर्गौरसर्षपा रूप्यमाषकः

02.19.06 ते षोडश धरणं, शौम्ब्यानि वा विंशतिः

02.19.07 विंशतितण्डुलं वज्रधरणम्

02.19.08 अर्धमाषकः माषकः द्वौ चत्वारः अष्टौ माषकाः सुवर्णो द्वौ चत्वारः, अष्टौ सुवर्णाः दश विंशतिः त्रिंशत् चत्वारिंशत् शतं इति

02.19.09 तेन धरणानि व्याख्यातानि

02.19.10 प्रतिमानान्ययोमयानि मागधमेकलशैलमयानि यानि वा न उदकप्रदेहाभ्यां वृद्धिं गच्छेयुरुष्णेन वा ह्रासम्

02.19.11 षडङ्गुलाद् ऊर्ध्वं अष्टाङ्गुल उत्तरा दश तुलाः कारयेत् लोहपलाद् ऊर्ध्वं एकपल उत्तराः, यन्त्रं उभयतःशिक्यं वा

02.19.12 पञ्चत्रिंशत्पललोहां द्विसप्तत्यङ्गुलायामां समवृत्तां कारयेत्

02.19.13 तस्याः पञ्चपलिकं मण्डलं बद्ध्वा समकरणं कारयेत्

02.19.14 ततः कर्ष उत्तरं पलं पल उत्तरं दशपलं द्वादश पञ्चदश विंशतिरिति पदानि कारयेत्

02.19.15 तत आशताद् दश उत्तरं कारयेत्

02.19.16 अक्षेषु नान्दीपिनद्धं कारयेत्

02.19.17 द्विगुणलोहां तुलां अतः षण्णवत्यङ्गुलायामां परिमाणीं कारयेत्

02.19.18 तस्याः शतपदाद् ऊर्ध्वं विंशतिः पञ्चाशत् शतं इति पदानि कारयेत्

02.19.19 विंशतितौलिको भारः

02.19.20 दशधारणिकं पलम्

02.19.21 तत्पलशतं आयमानी

02.19.22 पञ्चपलावरा व्यावहारिकी भाजन्यन्तःपुरभाजनी च

02.19.23 तासां अर्धधरणावरं पलं, द्विपलावरं उत्तरलोहं, षड्ऽङ्गुलावराश्चायामाः

02.19.24 पूर्वयोः पञ्चपलिकः प्रयामो मांसलोहलवणमणिवर्जम्

02.19.25 काष्ठतुला अष्टहस्ता पदवती प्रतिमानवती मयूरपदाधिष्ठिता

02.19.26 काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनम्

02.19.27 एष प्रदेशो बह्वऽल्पयोः

02.19.28 इति तुलाप्रतिमानं व्याख्यातम्

02.19.29 अथ धान्यमाषद्विपलशतं द्रोणं आयमानं, सप्ताशीतिपलशतं अर्धपलं च व्यावहारिकं, पञ्चसप्ततिपलशतं भाजनीयं, द्विषष्टिपलशतं अर्धपलं चान्तःपुरभाजनीयम्

02.19.30 तेषां आढकप्रस्थकुडुबाश्चतुर्भागावराः

02.19.31 षोडशद्रोणा खारी

02.19.32 विंशतिद्रोणिकः कुम्भः

02.19.33 कुम्भैर्दशभिर्वहः

02.19.34 शुष्कसारदारुमयं समं चतुर्भागशिखं मानं कारयेत्, अन्तःशिखं वा

02.19.35 रसस्य तु सुरायाः पुष्पफलयोः तुषाङ्गाराणां सुधायाश्च शिखामानं द्विगुण उत्तरा वृद्धिः

02.19.36 स-पादपणो द्रोणमूल्यं आढकस्य पाद ऊनः, षण्माषकाः प्रस्थस्य, माषकः कुडुबस्य

02.19.37 द्विगुणं रसादीनां मानमूल्यम्

02.19.38 विंशतिपणाः प्रतिमानस्य

02.19.39 तुलामूल्यं त्रिभागः

02.19.40 चतुर्मासिकं प्रातिवेधनिकं कारयेत्

02.19.41 अप्रतिविद्धस्यात्ययः स-पादः सप्तविंशतिपणः

02.19.42 प्रातिवेधनिकं काकणीकं अहरहः पौतवाध्यक्षाय दद्युः

02.19.43 द्वात्रिंशद्भागः तप्तव्याजी सर्पिषः, चतुःषष्टिभागः तैलस्य

02.19.44 पञ्चाशद् भागो मानस्रावो द्रवाणाम्

02.19.45 कुडुबार्धचतुर्ऽष्टभागानि मानानि कारयेत्

02.19.46 कुडुबाश्चतुर्ऽशीतिर्वारकः सर्पिषो मतः

02.19.47 चतुःषष्टिः तु तैलस्य पादश्च घटिकाऽनयोः

Chapt | Measures of space and time

02.20.01 मानाध्यक्ष्यो देशकालमानं विद्यात्

02.20.02 अष्टौ परमाणवो रथचक्रविप्रुट्

02.20.03 ता अष्टौ लिक्षा

02.20.04 ता अष्तौ यूका

02.20.05 ता अष्टौ यवमध्यः

02.20.06 अष्टौ यवमध्या अङ्गुलम्

02.20.07 मध्यमस्य पुरुषस्य मध्यमाया अनुगुल्या मध्यप्रकर्षो वाऽङ्गुलम्

02.20.08 चतुर्ऽङ्गुलो धनुर्ग्रहः

02.20.09 अष्टाङ्गुला धनुर्मुष्टिः

02.20.10 द्वादशाङ्गुला वितस्तिः, छायापौरुषं च

02.20.11 चतुर्दशाङ्गुलं शमः शलः परीरयः पदं च

02.20.12 द्विवितस्तिररत्निः प्राजापत्यो हस्तः

02.20.13 स-धनुर्ग्रहः पौतवविवीतमानम्

02.20.14 स-धनुर्मुष्टिः कुष्कुः कंसो वा

02.20.15 द्विचत्वारिंशद्ऽङ्गुलः तक्ष्णः क्राकचनिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम्

02.20.16 चतुष्पञ्चाशद्ऽङ्गुलः कूप्यवनहस्तः

02.20.17 चतुर्ऽशीत्य्ऽङ्गुलो व्यामो रज्जुमानं खातपौरुषं च

02.20.18 चतुर्ऽरत्निर्दण्डो धनुर्नालिका पौरुषं च गार्हपत्यम्

02.20.19 अष्टशताङ्गुलं धनुः पथिप्राकारमानं पौरुषं चाग्निचित्यानाम्

02.20.20 षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम्

02.20.21 दशदण्डो रज्जुः

02.20.22 द्विरज्जुकः परिदेशः

02.20.23 त्रिरज्जुकं निवर्तनं एकतः

02.20.24 द्विदण्डाधिको बाहुः

02.20.25 द्विधनुःसहस्रं गोरुतम्

02.20.26 चतुर्गोरुतं योजनम्

02.20.27 इति देशमानम्

02.20.28 कालमानं अत ऊर्ध्वम्

02.20.29 तुटो लवो निमेषः काष्ठा कल्ला नालिका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगं इति कालाः

02.20.30 द्वौ तुटौ लवः

02.20.31 द्वौ लवौ निमेषः

02.20.32 पञ्चनिमेषाः काष्ठाः

02.20.33 त्रिंशत्काष्ठाः कलाः

02.20.34 चत्वारिंशत्कलाः नालिका

02.20.35 सुवर्णमाषकाश्चत्वारश्चतुर्ऽङ्गुलायामाः कुम्भच्छिद्रं आढकं अम्भसो वा नालिका

02.20.36 द्विनालिको मुहूर्तः

02.20.37 पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्रे चाश्वयुजे च मासि भवतः

02.20.38 ततः परं त्रिभिर्मुहूर्तैरन्यतरः षण्मासं वर्धते ह्रसते च इति

02.20.39 छायायां अष्टपौरुष्यां अष्टादशभागश्छेदः, षट्पौरुष्यां चतुर्दशभागः, त्रिपौरुष्यां अष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयो दशभागाः, चतुर्ऽङ्गुलायां त्रयोऽष्टभागाः, अच्छायो मध्याह्न इति

02.20.40 परावृत्ते दिवसे शेषं एवं विद्यात्

02.20.41 आषाढे मासि नष्टच्छायो मध्याह्नो भवति

02.20.42 अतः परं श्रावणादीनां षण्मासानां द्व्य्ऽङ्गुल उत्तरा माघादीनां द्व्य्ऽङ्गुलावरा छाया इति

02.20.43 पञ्चदशाहोरात्राः पक्षः

02.20.44 सोमाप्यायनः शुक्लः

02.20.45 सोमावच्छेदनो बहुलः

02.20.46 द्विपक्षो मासः

02.20.47 त्रिंशद्ऽहोरात्रः कर्ममासः

02.20.48 स-अर्धः सौरः

02.20.49 अर्धन्यूनश्चान्द्रमासः

02.20.50 सप्तविंशतिर्नाक्षत्रमासः

02.20.51 द्वात्रिंशद् बलमासः

02.20.52 पञ्चत्रिंशद् अश्ववाहायाः

02.20.53 चत्वारिंशद्धस्तिवाहायाः

02.20.54 द्वौ मासावृतुः

02.20.55 श्रावणः प्रौष्ठपदश्च वर्षाः

02.20.56 आश्वयुजः कार्त्तिकश्च शरत्

02.20.57 मार्गशीर्षः पौषश्च हेमन्तः

02.20.58 माघः फाल्गुनश्च शिशिरः

02.20.59 चैत्रो वैशाखश्च वसन्तः

02.20.60 ज्येष्ठामूलीय आषाढश्च ग्रीष्मः

02.20.61 शिशिराद्युत्तरायणम्

02.20.62 वर्षादि दक्षिणायनम्

02.20.63 द्व्य्ऽयनः संवत्सरः

02.20.64 पञ्चसंवत्सरो युगम् । इति

02.20.65ab दिवसस्य हरत्यर्कः षष्टिभागं ऋतौ ततः ।

02.20.65chd करोत्येकं अहश्छेदं तथा एव एकं च चन्द्रमाः

02.20.66ab एवं अर्धतृतीयानां अब्दानां अधिमासकम् ।

02.20.66chd ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम् (इति)

Chapt | Collector of chostums and tolls

02.21.01 शुल्काध्यक्षः शुल्कशालां ध्वजं च प्रान्मुखं उदन्मुखं वा महाद्वाराभ्याशे निवेशयेत्

02.21.02 शुल्कादायिनश्चत्वारः पञ्च वा सार्थ उपयातान् वणिजो लिखेयुः - के कुतस्त्याः कियत्पण्याः क्व चाभिज्ञानं मुद्रा वा कृता इति

02.21.03 अमुद्राणां अत्ययो देयद्विगुणः

02.21.04 कूटमुद्राणां शुल्काष्टगुणो दण्डः

02.21.05 भिन्नमुद्राणां अत्ययो घटिकास्थाने स्थानम्

02.21.06 राजमुद्रापरिवर्तने नामकृते वा स-पादपणिकं वहनं दापयेत्

02.21.07 ध्वजमूल उपस्थितस्य प्रमाणं अर्घं च वैदेहिकाः पण्यस्य ब्रूयुः एतत्प्रमाणेनार्घेण पण्यं इदं कः क्रेता इति

02.21.08 त्रिरुद्ध उषितं अर्थिभ्यो दद्यात्

02.21.09 क्रेतृसङ्घर्षे मूल्यवृद्धिः स-शुल्का कोशं गच्छेत्

02.21.10 शुल्कभयात् पण्यप्रमाण मूल्यं वा हीनं ब्रुवतः तद् अतिरिक्तं राजा हरेत्

02.21.11 शुल्कं अष्टगुणं वा दद्यात्

02.21.12 तद् एव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च कुर्यात्

02.21.13 प्रतिक्रेतृभयाद् वा पण्यमूल्याद् उपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेत्, द्विगुणं वा शुल्कं कुर्यात्

02.21.14 तद् एवाष्टगुणं अध्यक्षस्यच् । छादयतः

02.21.15 तस्माद् विक्रयः पण्यानां धृतो मितो गणितो वा कार्यः, तर्कः फल्गुभाण्डानां आनुग्राहिकाणां च

02.21.16 ध्वजमूलं अतिक्रान्तानां चाकृतशुल्कानां शुल्काद् अष्टगुणो दण्डः

02.21.17 पथिक उत्पथिकाः तद् विद्युः

02.21.18 वैवाहिकं अन्वायनं औपायिकं यज्ञकृत्यप्रसवनैमित्तिकं देव इज्याचौल उपनयनगोदानव्रतदीक्षाऽऽदिषु क्रियाविशेषेषु भाण्डं उच्छुल्कं गच्छेत्

02.21.19 अन्यथावादिनः स्तेयदण्डः

02.21.20 कृतशुल्केनाकृतशुल्कं निर्वाहयतो द्वितीयं एकमुद्रया भित्त्वा पण्यपुटं अपहरतो वैदेहकस्य तच्च तावच्च दण्डः

02.21.21 शुल्कस्थानाद् गोमयपलालं प्रमाणं कृत्वाऽपहरत उत्तमः साहसदण्डः

02.21.22 शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनां अन्यतमं अनिर्वाह्यं निर्वाहयतो यथाऽवघुषितो दण्डः पण्यनाशश्च

02.21.23 तेषां अन्यतमस्यानयने बहिरेव उच्छुल्को विक्रयः

02.21.24 अन्तपालः स-पादपणिकां वर्तनीं गृह्णीयात् पण्यवहनस्य, पणिकां एकखुरस्य, पशूनां अर्धपणिकां क्षुद्रपशूनां पादिकां, अंसभारस्य माषिकाम्

02.21.25 नष्टापहृतं च प्रतिविदध्यात्

02.21.26 वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनं अभिज्ञानं मुद्रां च दत्त्वा प्रेषयेद् अध्यक्षस्य

02.21.27 वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत्

02.21.28 तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणं उपदिशेत् सर्वज्ञख्यापनार्थम्

02.21.29 ततः सार्थं अध्यक्षोऽभिगम्य ब्रूयात् इदं अमुष्यां उष्य च सारभाण्डं फल्गुभाण्डं च, न निहूहितव्यं, एष राज्ञः प्रभावः इति

02.21.30 निहूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वापहारः

02.21.31ab राष्ट्रपीडाकरं भाण्डं उच्छिन्द्याद् अफलं च यत् ।

02.21.31chd महा उपकारं उच्छुल्कं कुर्याद् बीजं च दुर्लभम् (इति)

Chapt | Tariff of duties and tolls

02.22.01 बाह्यं आभ्यन्तरं चातिथ्यम्

02.22.02 निष्क्राम्यं प्रवेश्यं च शुल्कम्

02.22.03 प्रवेश्यानां मूल्यपञ्चभागः

02.22.04 पुष्पफलशाकमूलकन्दवाल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात्

02.22.05 शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः

02.22.06 क्षौमदुकूलक्रिमितानकङ्कटहरितालमनःशिलाऽञ्जनहिङ्गुलुकलोहवर्णधातूनां चन्दनागुरुकटुककिण्वावराणां चर्मदन्तास्तरणप्रावरणक्रिमिजातानां आज एडकस्य च दशभागः पञ्चदशभागो वा

02.22.07 वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा

02.22.08 द्वारादेयं शुल्कं पञ्चभागः आनुग्राहिकं वा यथादेश उपकारं स्थापयेत्

02.22.09 जातिभूमिषु च पण्यानां विक्रयः

02.22.10 खनिभ्यो धातुपण्यादाने षट्छतं अत्ययः

02.22.11 पुष्पफलवाटेभ्यः पुष्पफलादाने चतुष्पञ्चाशत्पणो दण्डः

02.22.12 षण्डेभ्यः शाकमूलकन्दादाने पाद ऊनं द्विपञ्चाशत्पणो दण्डः

02.22.13 क्षेत्रेभ्यः सर्वसस्यादाने त्रिपञ्चाशत्पणः

02.22.14 पणोऽध्यर्धपणश्च सीताऽत्ययः

02.22.15ab अतो नवपुराणां देशजातिचरित्रतः |

02.22.15chd पण्यानां स्थापयेच्शुक्लं अत्ययं चापकारतः (इति)

Chapt | Superintendent of yarns (and textiles)

02.23.01 सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं तज्जातपुरुषैः कारयेत्

02.23.02 ऊर्णावल्ककार्पासतूलशणक्षौमाणि च विधवान्यङ्गाकन्याप्रव्रजितादण्डप्रतिकारिणीभी रूपाजीवामातृकाभिर्वृद्धराजदासीभिर्व्युपरत उपस्थानदेवदासीभिश्च कर्तयेत्

02.23.03 श्लक्ष्णस्थूलमध्यतां च सूत्रस्य विदित्वा वेतनं कल्पयेत्, बह्वल्पतां च

02.23.04 सूत्रप्रमाण ज्ञात्वा तैलामलक उद्वर्तनैरेता अनुगृह्णीयात्

02.23.05 तिथिषु प्रतिमानदानैश्च कर्म कारयितव्याः

02.23.06 सूत्रह्रासे वेतनह्रासो द्रव्यसारात्

02.23.07 कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारुभिश्च कर्म कारयेत्, प्रतिसंसर्गं च गच्छेत्

02.23.08 क्षौमदुकूलक्रिमितानराङ्कवकार्पाससूत्रवानकर्मान्तांश्च प्रयुञ्जानो गन्धमाल्यदानैरन्यैश्चाउपग्राहिकैराराधयेत्

02.23.09 वस्त्रास्तरणप्रावरणविकल्पान् उत्थापयेत्

02.23.10 कङ्कटकर्मान्तांश्च तज्जातकारुशिल्पिभिः कारयेत्

02.23.11 याश्चानिष्कासिन्यः प्रोषिता विधवा न्यङ्गाः कन्यका वाऽऽत्मानं बिभृयुः ताः स्वदासीभिरनुसार्य स-उपग्रहं कर्म कारयितव्याः

02.23.12 स्वयं आगच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत्

02.23.13 सूत्रपरीक्षाऽर्थमात्रः प्रदीपः

02.23.14 स्त्रिया मुखसन्दर्शनेऽन्यकार्यसम्भाषायां वा पूर्वः साहसदण्डः, वेतनकालातिपातने मध्यमः, अकृतकर्मवेतनप्रदाने च

02.23.15 गृहीत्वा वेतनं कर्माकुर्वत्या अङ्गुष्ठसन्दंशं दापयेत्, भक्षितापहृतावस्कन्दितानां च

02.23.16 वेतनेषु च कर्मकराणां अपराधतो दण्डः

02.23.17 रज्जुवर्तकैर्वर्मकारैश्च स्वयं संसृज्येत

02.23.18 भाण्डानि च वरत्रादीनि वर्तयेत्

02.23.19ab सूत्रवल्कमयी रज्जुर्वरत्रा वैत्रवैणवीः ।

02.23.19chd साम्नाह्या बन्धनीयाश्च यानयुग्यस्य करयेत् (इति)

Chapt | Director of agriculture

02.24.01 सीताऽध्यक्षः कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञः तज्ज्ञसखो वा सर्वधान्यपुष्पफलशाककन्दमूलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालं गृह्णीयात्

02.24.02 बहुहलपरिकृष्टायां स्वभूमौ दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत्

02.24.03 कर्षणयन्त्र उपकरणबलीवर्दैश्च एषां असङ्गं कारयेत्, कारुभिश्च कर्मारकुट्टाकमेदकरज्जुवर्तकसर्पग्राहादिभिश्च

02.24.04 तेषां कर्मफलविनिपाते तत्फलहानं दण्डः

02.24.05 षोडशद्रोणं जाङ्गलानां वर्षप्रमाणं, अध्यर्धं आनूपानां देशवापानां, अर्धत्रयोदशाश्मकानां, त्रयोविंशतिरवन्तीनां, अमितं अपरान्तानां हैमन्यानां च, कुल्याऽऽवापानां च कालतः

02.24.06 वर्षत्रिभागः पूर्वपश्चिममासयोः, द्वौ त्रिभागौ मध्यमयोः - सुषमारूपम्

02.24.07 तस्य उपलधिर्बृहस्पतेः स्थानगमनगर्भाधानेभ्यः शुक्र उदयास्तमयचारेभ्यः सूर्यस्य प्रकृतिवैकृताच्च

02.24.08 सूर्याद् बीजसिद्धिः, बृहस्पतेः सस्यानां स्तम्बकारिता, शुक्राद् वृष्टिः | इति

02.24.09ab त्रयः सप्ताहिका मेघा अशीतिः कणशीकराः |

02.24.09chd षष्टिरातपमेघानां एषा वृष्टिः समा हिता

02.24.10ab वातं आतपयोगं च विभजन् यत्र वर्षति |

02.24.10chd त्रीन् करीषांश्च जनयंः तत्र सस्यागमो ध्रुवः

02.24.11 ततः प्रभूत उदकं अल्प उदकं वा सस्यं वापयेत्

02.24.12 शालिव्रीहिकोद्रवतिलप्रियङ्गु.उदारकवरकाः पूर्ववापाः

02.24.13 मुद्गमाषशैम्ब्या मध्यवापाः

02.24.14 कुसुम्भमसूरकुलत्थयवगोधूमकलायातसीसर्षपाः पश्चाद्वापाः

02.24.15 यथा.ऋतुवशेन वा बीजवापाः

02.24.16 वापातिरिक्तं अर्धसीतिकाः कुर्युः, स्ववीर्य उपजीविनो वा चतुर्थपञ्चभागिकाः

U2.24.17 यथा इष्टं अनवसितभागं दद्युः, अन्यत्र कृच्छ्रेभ्यः

U2.24.18 स्वसेतुभ्यो हस्तप्रावर्तिमं उदकभागं पञ्चमं दद्युः, स्कन्धप्रावर्तिमं चतुर्थं, स्रोतोयन्त्रप्रावर्तिमं च तृतीयं, चतुर्थं नदीसरस्तटाककूप उद्घाटम्

U2.24.19 कर्म उदकप्रमाणेन कैदारं हैमनं ग्रैष्मिकं वा सस्यं स्थापयेत्

U2.24.20 शाल्य्ऽअदि ज्येष्ठं, षण्डो मध्यमः, इक्षुः प्रत्यवरः

02.24.21 इक्षवो हि बह्वऽअबाधा व्ययग्राहिणश्च

02.24.22 फेनाघातो वल्लीफलानां, परीवाहान्ताः पिप्पलीमृद्वीक इक्षूणां, कूपपर्यन्ताः शाकमूलानां, हरणीपर्यन्ता हरितकानां, पाल्यो लवानां गन्धभैषज्य उशीरह्रीबेरपिण्डालुकादीनाम्

02.24.23 यथास्वं भूमिषु च स्थाल्याश्चानूप्याश्चोषधीः स्थापयेत्

02.24.24 तुषारपायनमुष्णशोषणं चासप्तरात्राद् इति धान्यबीजानां, त्रिरात्रं वा पञ्चरात्रं वा कोशीधान्यानां, मधुघृतसूकरवसाभिः शकृद्युक्ताभिः काण्डबीजानां छेदलेपो, मधुघृतेन कन्दानां, अस्थिबीजानां शकृद्ऽअलेपः, शाखिनां गर्तदाहो गोऽस्थिशकृद्भिः काले दौह्रदं च

02.24.25 प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण पाययेत्

02.24.26ab कार्पाससारं निर्मोकं सर्पस्य च समाहरेत् ।

02.24.26chd न सर्पाः तत्र तिष्ठन्ति धूमो यत्र एष तिष्ठति

02.24.27 सर्वजीजानां तु प्रथमवापे सुवर्ण उदकसम्प्लुतां पूर्वमुष्टिं वापयेद्, अमुं च मन्त्रं ब्रूयात् - प्रजापतये काश्यपाय देवाय च नमः सदा । सीता मे ऋध्यतां देवी बीजेषु च धनेषु च

02.24.28 षण्डवाटगोपालकदासकर्मकरेभ्यो यथापुरुषपरिवापं भक्तं कुर्यात्, स-पादपणिकं च मासं दद्यात्

02.24.29 कर्मानुरूपं कारुभ्यो भक्तवेतनम्

02.24.30 प्रशीर्णं च पुष्पफलं देवकार्यार्थं व्रीहियवं आग्रयणार्थं श्रोत्रियाः तपस्विनश्चाहरेयुः, राशिमूलं उञ्छवृत्तयः

02.24.31ab यथाकालं च सस्यादि जातं जातं प्रवेशयेत् ।

02.24.31chd न क्षेत्रे स्थापयेत् किञ्चित् पलालं अपि पण्डितः

02.24.32ab प्राकाराणां समुच्छ्रयान् वलभीर्वा तथाविधाः ।

02.24.32chd न संहतानि कुर्वीत न तुच्छानि शिरांसि च

02.24.33ab खलस्य प्रकरान् कुर्यान् मण्डलान्ते समाश्रितान् ।

02.24.33chd अनग्निकाः स-उदकाश्च खले स्युः परिकर्मिणः (इति)

Chapt | Controller of spiritual liquors

02.25.01 सुराऽध्यक्षः सुराकिण्वव्यवहारान् दुर्गे जनपदे स्कन्धावारे वा तज्जातसुराकिण्वव्यवहारिभिः कारयेद्, एकमुखं अनेकमुखं वा विक्रयक्रयवशेन वा

02.25.02 षट्शतं अत्ययं अन्यत्र कर्तृक्रेतृविक्रेतृणां स्थापयेत्

02.25.03 ग्रामाद् अनिर्णयणं असम्पातं च सुरायाः, प्रमादभयात् कर्मसु ञ्जिर्दिष्टानां, मर्यादातिक्रमभयाद् आर्याणां, उत्साहभयाच्च तीष्क्णानाम्

02.25.04 लक्षितं अल्पं वा चतुर्भागं अर्धकुडुबं कुडुबं अर्धप्रस्थं प्रस्थं वा इति ज्ञातशौचा निर्हरेयुः

02.25.05 पानागारेषु वा पिबेयुरसञ्चारिणः

02.25.06 निक्षेप उपनिधिप्रयोगापहृतानां अनिष्ट उपगतानां च द्रव्याणां ज्ञानार्थं अस्वामिकं कुप्यं हिरण्यं च उपलभ्य निष्केसारं अन्यत्र व्यपदेशेन ग्राहयेद्, अतिव्ययकर्तारं अनायतिव्ययं च

02.25.07 न चानर्घेण कालिकां वा सुरां दद्याद्, अन्यत्र दुष्टसुरायाः

02.25.08 तां अन्यत्र विक्रापयेत्

02.25.09 दासकर्मकरेभ्यो वा वेतनं दद्यात्

02.25.10 वाहनप्रतिपानं सूकरपोषणं वा दद्यात्

02.25.11 पानागाराण्यऽनेककक्ष्याणि विभक्तशयनासनवन्ति पान उद्देशानि गन्धमाल्य उदकवन्ति ऋतुसुखानि कारयेत्

02.25.12 तत्रस्थाः प्रकृत्यऽउत्पत्तिकौ व्ययौ गूढा विद्युः, आगन्तूंश्च

02.25.13 क्रेतृणां मत्तसुप्तानां अलङ्कारात्छादनहिरण्यानि च विद्युः

02.25.14 तन्नाशे वणिजः तच्च तावच्च दण्डं दद्युः

02.25.15 वणिजशः तु संवृतेषु कक्ष्याविभागेषु स्वदासीभिः पेशलरूपाभिरागन्तूनां वास्तव्यानां चार्यरूपाणां मत्तसुप्तानां भावं विद्युः

02.25.16 मेदकप्रसन्नासवारिष्टमैरेयमधूनाम्

02.25.17 उदकद्रोणं तण्डुलानां अर्धाढकं त्रयः प्रस्थाः किण्वस्य इति मेदकयोगः

02.25.18 द्वादशाढकं पिष्टस्य पञ्च प्रस्थाः किण्वस्य क्रमुकत्वक्फलयुक्तो वा जातिसम्भारः प्रसन्नायोगः

02.25.19 कपित्थतुला फाणितं पञ्चतौलिकं प्रस्थो मधुन इत्यासवयोगः

U2.25.20 पाद्ऽधिको ज्येष्ठः पादहीनः कनिष्ठः

U2.25.21 चिकित्सकप्रमाणाः प्रत्येकशो विकाराणां अरिष्टाः

U2.25.22 मेषशृङ्गीत्वक्क्वाथाभिषुतो गुडप्रतीवापः पिप्पलीमरिचसम्भारः त्रिफलायुक्तो वा मैरेयः

U2.25.23 गुडयुक्तानां वा सर्वेषां त्रिफलासम्भारः

U2.25.24 मृद्वीकारसो मधु

u2.25.25 तस्य स्वदेशो व्याख्यानं कापिशायनं हारहूरकं इति

U2.25.26 माषकलनीद्रोणमामं सिद्धं वा त्रिभागाधिकतण्डुलं मोरटादीनां कार्षिकभागयुक्तं किण्वबन्धः

02.25.27 पाठालोघ्रतेजोवत्य्.एलावालुकमधुकमधुरसाप्रियङ्गुदारुहरिद्रामरिचपिप्पलीनां च पञ्चकार्षिकः सम्भारयोगो मेदकस्य प्रसन्नायाश्च

02.25.28 मधुकनिर्यूहयुक्ता कटशर्करा वर्णप्रसादनी च

02.25.29 चोचचित्रकविलङ्गगजपिप्पलीनां च कार्षिकः क्रमुकमधुकमुस्तालोध्राणां द्विकार्षिकश्चासवसम्भारः

02.25.30 दशभागश्च एषां बीजबन्धः

02.25.31 प्रसन्नायोगः श्वेतसुरायाः

02.25.32 सहकारसुरा रस उत्तरा बीज उत्तरा वा महासुरा सम्भारिकी वा

02.25.33 तासां मोरटापलाशपत्तूरमेषशृङ्गीकरञ्जक्षीरवृक्षकषायभावितं दग्धकटशर्कराचूर्णं लोघ्रचित्रकविलङ्गपाठामुस्ताकलिङ्गयवदारुहरिद्र इन्दीवरशतपुष्पापामार्गसप्तपर्णनिम्बास्फोतकल्कार्धयुक्तं अन्तर्नखो मुष्टिः कुम्भीं राजपेयां प्रसादयति

02.25.34 फाणितः पञ्चपलिकश्चात्र रसवृद्धिर्देयः

02.25.35 कुटुम्बिनः कृत्येषु श्वेतसुरां, औषधार्थं वारिष्टं, अन्यद् वा कर्तुं लभेरन्

02.25.36 उत्सवसमाजयात्रासु चतुर्ऽहः सौरिको देयः

02.25.37 तेष्वननुज्ञातानां प्रहवनान्तं दैवसिकं अत्ययं गृह्णीयात्

02.25.38 सुराकिण्वविचयं स्त्रियो बालाश्च कुर्युः

02.25.39 अराजपण्याः पञ्चकं शतं शुल्कं दद्युः,
सुरकामेदकारिष्टमधुफलाम्लाम्लशीधूनां च

02.25.40ab अह्नश्च विक्रयं ज्ञात्वा व्याजीं मानहिरण्ययोः ।

02.25.40chd तथा वैधरणं कुर्याद् उचितं चानुवर्तयेत् (इति)

Chapt | Supervisor of (animal-)slaughter

02.26.01 सूनाऽध्यक्षः प्रदिष्टाभयानां अभयवनवासिनां च मृगपशुपक्षिमत्स्यानां बन्धवधहिंसायां उत्तमं दण्डं कारयेत्, कुटुम्बिनां अभयवनपरिग्रहेषु मध्यमम्

02.26.02 अप्रवृत्तवधानां मत्स्यपक्षिणां बन्धवधहिंसायां पाद ऊनसप्तविंशतिपणं अत्ययं कुर्यात्, मृगपशूनां द्विगुणम्

02.26.03 प्रवृत्तहिंसानां अपरिगृहीतानां षड्भागं गृह्णीयात्, मत्स्यपक्षिणां दशभागं वाऽधिकं, मृगपशूनां शुल्कं वाऽधिकम्

02.26.04 पक्षिमृगाणां जीवत् षड्भागं अभयवनेषु प्रमुञ्चेत्

02.26.05 सामुद्रहस्त्यश्वपुरुषवृषगर्दभाकृतयो मत्स्याः सारसा नादेयाः तटाककुल्या उद्धवा वा क्रौञ्च
उत्क्रोशकदात्यूहहंसचक्रवाकजीवञ्जीवकभृङ्गराजचकोरमत्तकोकिलमयूरशुकमदनशारिका विहारपक्षिणो मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगा हिंसाबाधेभ्यो रक्ष्याः

02.26.06 रक्षाऽतिक्रमे पूर्वः साहसदण्डः

02.26.07 मृगपशूनां अनस्थिमांसं सद्योहतं विक्रीणीरन्

02.26.08 अस्थिमतः प्रतिपातं दद्युः

02.26.09 तुलाहीने हीनाष्टगुणम्

02.26.10 वत्सो वृषो धेनुश्च एषां अवध्याः

02.26.11 घ्नतः पञ्चाशत्को दण्डः, क्लिष्टघातं घातयतश्च

02.26.12 परिशूनं अशिरःपादास्थि विगन्धं स्वयंमृतं च न विक्रीणीरन्

02.26.13 अन्यथा द्वादशपणो दण्डः

02.26.14ab दुष्टाः पशुमृगव्याला मत्स्यश्चाभयचारिणः ।

02.26.14chd अन्यत्र गुप्तिस्थानेभ्यो वधबन्धं अवाप्नुयुः (इति)

Chapt | Superintendent of courtesans

02.27.01 गणिकाऽध्यक्षो गणिकाऽन्वयां अगणिकाऽन्वयां वा रूपयौवनशिल्पसम्पन्नां सहस्रेण गणिकां कारयेत्, कुटुम्बार्धेन प्रतिगणिकाम्

02.27.02 निष्पतिताप्रेतयोर्दुहिता भगिनी वा कुटुम्बं भरेत, माता वा प्रतिगणिकां स्थापयेत्

02.27.03 तासां अभावे राजा हरेत्

02.27.04 सौभाग्यालङ्कारवृद्ध्या सहस्रेण वारं कनिष्ठं मध्यमं उत्तमं वाऽऽरोपयेत् छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थम्

02.27.05 सौभाग्यभङ्गे मातृकां कुर्यात्

02.27.06 निष्क्रयश्चतुर्विंशतिसाहस्रो गणिकायाः, द्वादशसाहस्रो गणिकापुत्रस्य

02.27.07 अष्टवर्षात् प्रभृति राज्ञः कुशीलवकर्म कुर्यात्

02.27.08 गणिकादासी भग्नभोगा कोष्ठागारे महानसे वा कर्म कुर्यात्

02.27.09 अविशन्ती सपादपणं अवरुद्धा मासवेतनं दद्यात्

02.27.10 भोगं दायमायं व्ययं आयतिं च गणिकाया निबन्धयेत्, अतिव्ययकर्म च वारयेत्

02.27.11 मातृहस्ताद् अन्यत्र अभरणन्यासे सपादचतुष्पणो दण्डः

02.27.12 स्वापतेयं विक्रयं आधानं वा नयन्त्याः सपादपञ्चाशत्पणः पणोऽर्धपणच्छेदने

02.27.13 अकामायाः कुमार्या वा साहसे उत्तमो दण्डः, सकामायाः पूर्वः साहसदण्डः

02.27.14 गणिकां अकामां रुन्धतो निष्पातयतो वा व्रणविदारणेन वा रूपं.उपघ्नतः सहस्रं दण्डः

02.27.15 स्थान्विशेषेण वा दण्डवृद्धिः आनिष्क्रयद्विगुणात्

02.27.16 प्रासाधिकारं गणिकां घतयतो निष्क्रयत्रिगुणो दण्डः

02.27.17 मातृकादुहितृकारूपदासीनां घाते उत्तमः साहसदण्डः

02.27.18 सर्वत्र प्रथमेऽपराधे प्रथमः, द्वितीये द्विगुणः, तृतीये त्रिगुणः, चतुर्थे यथाकामी स्यात्

02.27.19 राजाज्ञया पुरुषं अनभिगच्छन्ती गणिका शिफासहस्रं लभीत, पञ्चसहस्रं वा दण्डः

02.27.20 भोगं गृहीत्वा द्विषत्या भोगद्विगुणो दण्डः

02.27.21 वसतिभोगापहारे भोगं अष्टगुणं दद्याद् अन्यत्र व्याधिपुरुषदोषेभ्यः

02.27.22 पुरुषं घ्नत्याश्चिताप्रतापेऽप्सु प्रवेशनं वा

02.27.23 गणिकाभरणं अर्थं भोगं वाऽपहरतोऽष्टगुणो दण्डः

02.27.24 गणिका भोगं आयतिं पुरुषं च निवेदयेत्

02.27.25 एतेन नटनर्तकगायनवादकवाग्जीवनकुशीलवप्लवकसौभिकचारणानां स्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः

02.27.26 तेषां तूर्यं आगन्तुकं पञ्चपणं प्रेक्षावेतनं दद्यात्

02.27.27 रूपाजीवा भोगद्वयगुणं मासं दद्युः

02.27.28 गीतवाद्यपाठ्यनृत्यनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञानगन्धमाल्यसम्यूहनसंवादनसंवाहनवैशिककलाज्ञानानि गणिका दासी रङ्ग उपजीविनीश्च ग्राहयतो राजमण्डलाद् आजीवं कुर्यात्

02.27.29 गणिकापुत्रान् रङ्ग उपजीविनां च मुख्यान्निष्पादयेयुः, सर्वतालावचराणां च

02.27.30ab संज्ञाभाषाऽन्तरज्ञाश्च स्त्रियः तेषां अनात्मसु ।

02.27.30chd चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः (इति)

Chapt | Controller of shipping

02.28.01 नाव्ऽध्यक्षः समुद्रसम्याननदीमुखतरप्रचारान् देवसरोविसरोनदीतरांश्च स्थानीयादिष्ववेक्षेत

02.28.02 तद्वेलाकूलग्रामाः क्लृप्तं दद्युः

02.28.03 मत्स्यबन्धका नौकाभाटकं षड्भागं दद्युः

02.28.04 पत्तनानुवृत्तं शुल्कभागं वणिजो दद्युः, यात्रावेतनं राजनौभिः सम्पतन्तः

02.28.05 शङ्खमुक्ताग्राहिणो नौभाटकं दद्युः, स्वनौभिर्वा तरेयुः

02.28.06 अध्यक्षश्च एषां खन्यऽध्यक्षेण व्याख्यातः

02.28.07 पत्तनाध्यक्षनिबद्धं पण्यपत्तनचारित्रं नावऽध्यक्षः पालयेत्

02.28.08 मूढवाताहता नावः पिता इवानुगृह्णीयात्

02.28.09 उदकप्राप्तं पण्यं अशुल्कं अर्धशुल्कं वा कुर्यात्

02.28.10 यथानिर्दिष्टाश्च एताः पण्यपत्तनयात्राकालेषु प्रेषयेत्

02.28.11 सम्यातीर्नावः क्षेत्रानुगताः शुल्कं याचेत्

02.28.12 हिंस्रिका निर्घातयेत्, अमित्रविषयातिगाः पण्यपत्तनचारित्र उपघातिकाश्च

02.28.13 शासकनिर्यामकदात्रअंश्मिग्राहक उत्सेचकाधिष्ठिताश्च महानावो हेमन्तग्रीष्मतार्यासु महानदीषु प्रयोजयेत्, क्षुद्रिकाः क्षुद्रिकासु वर्षास्राविणीषु

02.28.14 बाधतीर्थाश्च एताः कार्या राजद्विष्टकारिणां तरणभयात्

02.28.15 अकालेऽतीर्थे च तरतः पूर्वः साहसदण्डः

02.28.16 काले तीर्थे चानिषृष्टतारिणः पाद ऊनसप्तविंशतिपणः तरात्ययः

02.28.17 कैवर्तकाष्टतृणभारपुष्पफलवाटषण्डगोपालकानां अनत्ययः, सम्भाव्यदूतानुपातिनां च सेनाभाण्डप्रयोगाणां च स्वतरणैः तरतां, बीजभक्तद्रव्य उपस्करांश्चानूपग्रामाणां तारयताम्

02.28.18 ब्राह्मणप्रव्रजितबालवृद्धव्याधितशासनहरगर्भिण्यो नावऽध्यक्षमुद्राभिः तरेयुः

02.28.19 कृतप्रवेशाः पारविषयिकाः सार्थप्रमाणा वा प्रविशेयुः

02.28.20 परस्य भार्यां कन्यां वित्तं वाऽपहरन्तं शवित्तं वाऽपहरन्तं शङ्कितं आविग्नं उद्भाण्डीकृतं महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं सद्योगृहीतलिङ्गिनं अलिङ्गिनं वा प्रव्रजितं अलक्ष्यव्याधितं भयविकारिणं गूढसारभाण्डशासनशस्त्राग्नियोगं विषहस्तं दीर्घपथिकं अमुद्रं च उपग्राहयेत्

02.28.21 क्षुद्रपशुर्मनुष्यश्च सभारो माषकं दद्यात्, शिरोभारः कायभारो गवाश्वं च द्वौ, उष्ट्रमहिषं चतुरः, पञ्च लभुयानं, षड् गोलिङ्गं, सप्त शकटं, पन्यभारः पादम्

02.28.22 तेन भाण्डभारो व्याख्यातः

02.28.23 द्विगुणो महानदीषु तरः

02.28.24 क्लृप्तं आनूपग्रामा भक्तवेतनं दद्युः

02.28.25 प्रत्यन्तेषु तराः शुल्कं आतिवाहिकं वर्तनीं च गृह्णीयुः, निर्गच्छतश्चामुद्रद्रव्यस्य भाण्डं हरेयुः, अतिभारेणावेलायां अतिर्थे तरतश्च

02.28.26 पुरुष उपकरणहीनायां असंस्कृतायां वा नावि विपन्नायां नाव्sध्यक्षो नष्टं विनष्टं वाऽभ्यावहेत्

02.28.27ab सप्ताहवृत्तां आषाढीं कार्त्तिकीं चान्तरा तरः ।

02.28.27chd कार्मिकः प्रत्ययं दद्यान्नित्यं चाह्निकं आवहेत् (इति)

Chapt | Superintendent of cattle

02.29.01 गोsध्यक्षो वेतन उपग्राहिकं करप्रतिकरं भग्न उत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीरघृतसञ्जातं च उपलभेत

02.29.02 गोपालकपिण्डारकदोहकमन्थकलुब्धकाः शतं शतं धेनूनां हिरण्यभृताः पालयेयुः

02.29.03 क्षीरघृतभृता हि वत्सान् उपहन्युः । इति वेतन उपग्राहिकम्

02.29.04 जरद्गुधेनुगर्भिणीपष्ठौहीवत्सतरीणां समविभागं रूपशतं एकः पालयेत्

02.29.05 घृतस्याष्टौ वारकान् पणिकं पुच्छं अङ्कचर्म च वार्षिकं दद्यात् । इति करप्रतिकरः

02.29.06 व्याधितान्यङ्गाऽनन्यदोहीदुर्दोहापुत्रघ्नीनां च समविभागं रूपशतं पालयन्तः तज्जातिकं भागं दद्युः । इति भग्न उत्षृष्टकम्

02.29.07 परचक्राटवीभयाद् अनुप्रविष्टानां पशूनां पालनधर्मेण दशभगं दद्युः । इति भागानुप्रविष्टकम्

02.29.08 वत्सा वत्सतरा दम्या वहिनो वृषा उक्षाणश्च पुङ्गवाः, युगवाहनशकटवहा वृषभाः सूनामहिषाः पृष्टस्कन्धवाहिनश्च महिषाः, वत्सिका वत्सतरी पष्टहुही गर्भिणी धेनुश्चाप्रजाता वन्ध्याश्च गावो महिष्यश्च, मासद्विमासजाताः तासां उपजा वत्सा वत्सिकाश्च

02.29.09 मासद्विमासजातान् अङ्कयेत्

02.29.10 मासद्विमासपर्युषितं अङ्कयेत्

02.29.11 अङ्कं चिह्नं वर्णं शृङ्गान्तरं च लक्षणं एवं उपजा निबन्धयेत् । इति व्रजपर्यग्रम्

02.29.12 चोरहृतं अन्ययूथप्रविष्टं अवलीनं वा नष्टम्

02.29.13 पङ्कविषमव्याधिजरातोयाहारावसन्नं वृक्षतटकाष्ठशिलाऽभिहतं ईशानव्यालसर्पग्राहदावाग्निविपन्नं विनष्टम्

02.29.14 प्रमादाद् अभ्यावहेयुः

02.29.15 एवं रूपाग्रं विद्यात्

02.29.16 स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः

02.29.17 परपशूनां राजाङ्केन परिवर्तयिता रूपस्य पूर्वं साहसदण्डं दद्यात्

02.29.18 स्वदेशीयानां चोरहृतं प्रत्यानीय पणितं रूपं हरेत्

02.29.19 परदेशीयानां मोक्षयिताऽर्धं हरेत्

02.29.20 बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्युः

02.29.21 लुब्धकश्वगणिभिरपास्तः तेनाव्यालपराबाधभयं ऋतुविभक्तं अरण्यं चारयेयुः

02.29.22 सर्पव्यालत्रासनार्थं गोचरानुपातज्ञानार्थं च त्रस्नूनां घण्टातूर्यं च बध्नीयुः

02.29.23 समव्यूढतीर्थं अकर्दमग्राहं उदकं अवतारयेयुः पालयेयुश्च

02.29.24 स्तेनव्यालसर्पग्राहगृहीतं व्याधिजराऽवसन्नं चावेदयेयुः, अन्यथा रूपमूल्यं भजेरन्

02.29.25 कारणमृतस्याङ्कचर्म गोमहिषस्य, कर्णलक्षणं अजाविकानां, पुच्छं अङ्कचर्म चाश्वखर उष्ट्राणां, बालचर्मबस्तिपित्तस्नायुदन्तखुरशृङ्गास्थीनि चाहरेयुः

02.29.26 मांसं आर्द्रं शुष्कं वा विक्रीणीयुः

02.29.27 उदश्वित्श्वराहेभ्यो दद्युः

02.29.28 कूर्चिकां सेनाभक्तार्थं आहरेयुः

02.29.29 किलाटो घाणपिण्याकक्लेदार्थः

02.29.30 पशुविक्रेता पादिकं रूपं दद्यात्

02.29.31 वर्षाशरद्धेमन्तान् उभयतःकालं दुह्युः, शिशिरवसन्तग्रीष्मान् एककालम्

02.29.32 द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्डः

02.29.33 दोहनकालं अतिक्रामतः तत्फलहानं दण्डः

02.29.34 एतेन नस्यदम्ययुगपिङ्गनवर्तनकाला व्याख्याताः

02.29.35 क्षीरद्रोणे गवां घृतप्रस्थः, पञ्चभागाधिको महिषीणां, द्विभागाधिकोऽजावीनाम्

02.29.36 मन्थो वा सर्वेषां प्रमाणम्

02.29.37 भूमितृण उदकविशेषाद् हि क्षीरघृतवृद्धिर्भवति

02.29.38 यूथवृषं वृषेणावपातयतः पूर्वः साहसदण्डः, घातयत उत्तमः

02.29.39 वर्णावरोधेन दशती रक्षा

02.29.40 उपनिवेशदिग्विभागो गोप्रचाराद् बलान्वयतो वा गवां रक्षासामर्थ्याच्च

02.29.41 अजावीनां षण्मासिकीमूर्णां ग्राहयेत्

02.29.42 तेनाश्वखर उष्ट्रवराहव्रजा व्याख्याताः

02.29.43 बलीवर्दानां नस्याश्वभद्रगतिवाहिनां यवसस्यार्धभारः तृणस्य द्विगुणं, तुला घाणपिण्याकस्य, दशाढकं कणकुण्डकस्य, पञ्चपलिकं मुखलवनां, तैलकुडुबो नस्यं प्रस्थः पानं, मांसतुला, दध्नश्चाढकं, यवद्रोणं माषाणां वा पुलाकः, क्षीरद्रोणं अर्धाढकं वा सुरायाः स्नेहप्रस्थः क्षारदशपलं शृङ्गिबेरपलं च प्रतिपानम्

02.29.44 पाद ऊनं अश्वतरगोखराणां, द्विगुणं महिष उष्ट्राणाम्

02.29.45 कर्मकरबलीवर्दानां पायनार्थानां च धेनूनां कर्मकालतः फलतश्च विधादानम्

02.29.46 सर्वेषां तृण उदकप्राकाम्यम्

02.29.47 इति गोमण्डलं व्याख्यातम्

02.29.48ab पञ्च.ऋषभं खराश्वानां अजावीनां दश.ऋषभम् ।

02.29.48chd शत्यं गोमहिष उष्ट्राणां यूथं कुर्याच्चतुर्वृषम् (इति)

Chapt | Superintendent of horses

02.30.01 अश्वाध्यक्षः पण्यागारिकं क्रय उपागतं आहवलब्धं आजातं साहाय्यागतकं पणस्थितं यावत्कालिकं वाऽश्वपर्यग्रं कुलवयोवर्णचिह्नवर्गागमैर्लेखयेत्

02.30.02 अप्रशस्तन्यङ्गव्याधितांश्चावेदयेत्

02.30.03 कोशकोष्ठागाराभ्यां च गृहीत्वा मासलाभं अश्ववाहश्चिन्तयेत्

02.30.04 अश्वविभवेनायतां अश्वायां अद्विगुणविस्तारां चतुर्द्वार उपावर्तनमध्यां स-प्रग्रीवां प्रद्वारासनफलकयुक्तानां वानरमयूरपृषतनकुलचकोरशुकसारिकाकीर्णां शालां निवेशयेत्

02.30.05 अश्वायां अचतुर्ऽश्रश्लक्ष्णफलकास्तारं स-खादनकोष्ठकं स-मूत्रपुरीष उत्सर्गं एक एकशः प्रान्मुखं उदन्मुखं वा स्थानं निवेशयेत्

02.30.06 शालावशेन वा दिग्विभागं कल्पयेत्

02.30.07 वडवावृषकिशोराणां एकान्तेषु

02.30.08 वडवायाः प्रजतायाः त्रिरात्रं घृतप्रस्थः पानम्

02.30.09 अत ऊर्ध्वं सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रम्

02.30.10 ततः पुलाको यवसं आर्तवश्चाहारः

02.30.11 दशरात्राद् ऊर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुबः क्षीरप्रस्थश्चाहार आषण्मासात्

02.30.12 ततः परं मास उत्तरं अर्धवृद्धिर्यवप्रस्थ आत्रिवर्षात्, द्रोण आचतुर्वर्षात्

02.30.13 अत ऊर्ध्वं चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः पूर्णप्रमाणः

02.30.14 द्वात्रिंशद्ऽङ्गुलं मुखं उत्तमाश्वस्य, पञ्चमुखान्यायामो, विंशत्य्ऽङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः

02.30.15 त्र्य्ऽङ्गुलावरं मध्यमावरयोः

02.30.16 शताङ्गुलः परिणाहः

02.30.17 पञ्चभागावरो मध्यमावरयोः

02.30.18 उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गूणां अर्धशुष्कं अर्धसिद्धं वा मुद्गमाषाणां वा पुलाकः स्नेहप्रस्थश्च, पञ्चपलं लवणस्य, मांसं पञ्चाशत्पलिकं रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थं, क्षारपञ्चपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम्

02.30.19 दीर्घपथभारक्लान्तानां च खादनार्थं स्नेहप्रस्थोऽनुवासनं कुडुबो नस्यकर्मणः, यवसस्यार्धभारः तृणस्य द्विगुणः षड्ऽरत्निपरिक्षेपः पुञ्जीलग्रहो वा

02.30.20 पादावरं एतन् मध्यमावरयोः

02.30.21 उत्तमसमो रथ्यो वृषश्च मध्यमः

02.30.22 मध्यमसमश्चावरः

02.30.23 पादहीनं वडवानां पारशमानां च

02.30.24 अतोऽर्धं किशोराणां च

02.30.25 इति विधायोगः

02.30.26 विधापाचकसूत्रग्राहकचिकित्सकाः प्रतिस्वादभाजः

02.30.27 युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः

02.30.28 असमरप्रयोग्याः पौरजानपदानां अर्थेन वृषा वडवास्वायोज्याः

02.30.29 प्रयोग्यानां उत्तमाः काम्बोजसैन्धवारट्टवनायुजाः, मध्यमा बाह्लीकपापेयकसौवीरकतैतलाः, शेषाः प्रत्यवराः

02.30.30 तेषां तीष्ण्भद्रमन्दवशेन साम्नाह्यं औपवाह्यकं वा कर्म प्रयोजयेत्

02.30.31 चतुर्ऽश्रं कर्माश्वस्य साम्नाह्यम्

02.30.32 वल्गनो नीचैर्गतो लङ्घनो घोरणो नारोष्ट्रश्चाऽपवाह्याः

02.30.33 तत्राऽपवेणुको वर्धमानको यमक आलीढप्लुतः पृथुग्ऽस्त्रिकचाली च वल्गनः

02.30.34 स एव शिरःकर्णविशुद्धो नीचैर्गतः, षोडशमार्गो वा

02.30.35 प्रकीर्णकः प्रकीर्ण उत्तरो निषण्णः पार्श्वानुवृत्त ऊर्मिमार्गः शरभक्रीडितः शरभप्लुतः त्रितालो बाह्यानुवृत्तः पञ्चपाणिः सिंहायतः स्वाधूतः क्लिष्टः श्लिङ्गितो बृंहितः पुष्पाभिकीर्णश्च इति नीचैर्गतमार्गः

02.30.36 कपिप्लुतो भेकप्लुतेणप्लुत एकपादप्लुतः कोकिलसञ्चार्य्.ऽरस्यो बकचारी च लङ्घनः

02.30.37 काङ्को वारिकाङ्को मायूरोऽर्धमायूरो नाकुलोर्धनाकुलो वाराहोऽर्धवाराहश्च इति धोरणः

02.30.38 संज्ञाप्रतिकारो नार उष्ट्र इति

02.30.39 षण्णव द्वादश इति योजनान्य्ध्वा रथ्यानां, पञ्च योजनान्यर्धाष्टमानि दश इति पृष्ठवाहिनां अश्वानां अध्वा

02.30.40 विक्रमो भद्राश्वासो भारवाह्य इति मार्गाः

02.30.41 विक्रमो वल्गितं उपकण्ठं उपजवो जवश्च धाराः

02.30.42 तेषां बन्धन उपकरणं योग्याचार्याः प्रतिदिशेयुः, साङ्ग्रामिकं रथाश्वालङ्कारं च सूताः

02.30.43 अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारं ऋतुविभक्तं चाहारम्

02.30.44 सूत्रग्राहकाश्चबन्धकयावसिकविधापाचकस्थानपालकेशकारजाङ्गुलीविदश्च स्वकर्मभिरश्वान् आराधयेयुः

02.30.45 कर्मातिक्रमे च एषां दिवसवेतनच्छेदनं कुर्यात्

02.30.46 नीराजन उपरुद्धं वाहयतश्चिकित्सक उपरुद्धं वा द्वादशपणो दण्डः

02.30.47 क्रियाभैषज्यसङ्गेन व्याधिवृद्धौ प्रतीकारद्विगुणो दण्डः

02.30.48 तद्ऽपराधेन वैलोम्ये पत्त्रमूल्यं दण्डः

02.30.49 तेन गोमण्डलं खर उष्ट्रमहिषं अजाविकं च व्याख्यातम्

02.30.50ab द्विरह्नः स्नानं अश्वानां गन्धमाल्यं च दापयेत् ।

02.30.50chd कृष्णसन्धिषु भूत इज्याः शुक्लेषु स्वस्तिवाचनम्

02.30.51ab नीराजनां आश्वयुजे कारयेन्नवमेऽहनि ।

02.30.51chd यात्राऽऽदाववसाने वा व्याधौ वा शान्तिके रतः (इति)

Chapt | Superintendent of elephants

02.31.01 हस्त्य्ऽध्यक्षो हस्तिवनरक्षां दम्यकर्मक्षान्तानां हस्तिहस्तिनीकलभानां शालास्थानशय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धन उपकरणं साङ्ग्रामिकं अलङ्कारं चिकित्सकानीकस्थाउपस्थायिकवर्गं चानुतिष्ठेत्

02.31.02 हस्त्य्ऽअयामद्विगुण उत्सेधविष्कम्भायामां हस्तिनीस्थानाधिकां सप्रग्रीवां कुमारीसङ्ग्रहां प्रान्मुखीं उदन्मुखीं वा शालां निवेशयेत्

02.31.03 हस्त्य्ऽअयामचतुर्ऽश्रक्ष्णक्ष्णालानस्तम्भफलकास्तरकं स-मूत्रपुरीष उत्सर्गं स्थानं निवेशयेत्

02.31.04 स्थानसमां शय्यां अर्धापाश्रयां दुर्गे साम्नाह्याउपवाह्यानां बहिर्दम्यव्यालानाम्

02.31.05 प्रथमसप्तम अष्टमभागावह्नः स्नानकालौ, तद्ऽनन्तरं विधायाः

02.31.06 पूर्वाह्णे व्यायामकालः, पश्चाह्नः प्रतिपानकालः

02.31.07 रात्रिभागौ द्वौ स्वप्नकाला, त्रिभागः संवेशन उत्थानिकः

02.31.08 ग्रीष्मे ग्रहणकालः

02.31.09 विंशतिवर्षो ग्राह्यः

02.31.10 विक्को मोढो मक्कणो व्याथितो गर्भिणी धेनुका हस्तिनी चाग्राह्याः

02.31.11 सप्तारत्नि उत्सेधो नवायामो दश परिणाहः प्रमाणतश्चत्वारिंशद्वर्षो भवत्युत्तमः, त्रिंशद्वर्षो मध्यमः, पञ्चविंशतिवर्षोऽवरः

02.31.12 तयोः पादावरो विधाविधिः

02.31.13 अरत्नौ तणुलद्रोणः, अर्धाढकं तैलस्य, सर्पिषः त्रयः प्रस्थाः, दशपलं लवणस्य, मांसं पञ्चाशत्पलिकं, रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थं, क्षारदशपलिकं मद्यस्याढकं द्विगुणं वा पयसः प्रतिपानं, गात्रावसेकः तैलप्रस्थः, शिरसोऽष्टभागः प्रादीपिकश्च, यवसस्य द्वौ भारौ स-पादौ, शष्पस्य शुष्कस्यार्धतृतीयो भारः, कडङ्करस्यानियमः

02.31.14 सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यरालः

02.31.15 यथाहस्तं अवशेषः षड्ऽरत्निः पञ्चारत्निश्च

02.31.16 क्षीरयावसिको विक्कः क्रीडाऽर्थं ग्राह्यः

02.31.17 सञ्जातलोहिता प्रतिच्छन्ना सम्लिसपक्षा समकक्ष्या व्यतिकीर्णमांसा समतल्पतला जातद्रोणिका इति शोभाः

02.31.18ab शोभावशेन व्यायामं भद्रम मन्दं च कारयेत् ।

02.31.18chd मृगं सङ्कीर्णलिङ्गं च कर्मस्वृतुवशेन वा

Chapt | Activity of elephants

02.32.01 कर्मस्कन्धाश्चत्वारो दम्यः साम्नाह्य औपवाह्यो व्यालश्च

02.32.02 तत्र दम्यः पञ्चविधः स्कन्धगतः स्तम्भगतो वारिगतोऽवपातगतो यूथगतश्च इति

02.32.03 तस्य उपविचारो विक्ककर्म

02.32.04 साम्नाह्यः सप्तक्रियापथ उपस्थानं संवर्तनं सम्यानं वधावधो हस्तियुद्धं नागरायणं साङ्ग्रामिकं च

02.32.05 तस्य उपविचारः कक्ष्याकर्म ग्रैवेयकर्म यूथकर्म च

02.32.06 औपवाह्योऽष्टविध आचरणः कुञ्जराउपवाह्यो धोरण आधानगतिको यष्ट्य्.उपवाह्यः तोत्र उपवाह्यः शुद्ध उपवाह्यो मार्गयुकश्च इति

02.32.07 तस्य उपविचारः शारदकर्म हीनकर्म नार उष्ट्रकर्म च

02.32.08 व्याल एकक्रियापथः शङ्कितोऽवरुद्धो विषमः प्रभिन्नः प्रभिन्नविनिश्चयो मदहेतुविनिश्चयश्च

02.32.09 तस्य-उपविचार आयम्य एकरक्षाकर्म

02.32.10 क्रियाविपन्नो व्यालः शुद्धः सुव्रतो विषमः सर्वदोषप्रदुष्टश्च

02.32.11 तेषां बन्धन उपकरणं अनीकस्थप्रमाणम्

02.32.12 आलानग्रैवेयकक्ष्यापारायणपरिक्षेप उत्तरादिकं बन्धनम्

02.32.13 अङ्कुशवेणुयन्त्रादिकं उपकरणम्

02.32.14 वैजयन्तीक्षुरप्रमालास्तरणकुथाऽऽदिकं भूषणम्

02.32.15 वर्मतोमरशरावापयन्त्रादिकः साङ्ग्रामिकालङ्कारः

02.32.16 चिकित्सकानीकस्थारोहकाधोरणहस्तिपकौपचारिकविधापाचकयावसिकपादपाशिककुटीरक्षकाउपशयैकादिरौपस्थायिकवर्गः

02.32.17 चिकित्सककुटीरक्षविधापाचकाः प्रस्थोदनं स्नेहप्रसृतिं क्षारलवणयोश्च द्विपलिकं हरेयुः, दशपलं मांसस्य, अन्यत्र चिकित्सकेभ्यः

02.32.18 पथिव्याधिकर्ममदजराऽभितप्तानां चिकित्सकाः प्रतिकुर्युः

02.32.19 स्थानस्याशुद्धिर्यवसस्याग्रहणं स्थले शायनं अभागे घातः परारोहणं अकाले यानं अभूमावतीर्थेऽवतारणं तरुषण्ड इत्यत्ययस्थानानि

02.32.20 तं एषां भक्तवेतनाद् आददीत

02.32.21ab तिस्रो नीराजनाः कार्याश्चातुर्मास्य.ऋतुसन्धिषु ।

02.32.21chd भूतानां कृष्णसन्धी इज्याः सेनान्यः शुक्लसन्धुषु

02.32.22ab दन्तमूलपरीणाहद्विगुणं प्रोज्झ्य कल्पयेत् ।

02.32.22chd अब्दे द्व्यऽर्धे नदीजानां पञ्चाब्दे पर्वतोकसाम् (इति)

Chapt | Superintendent of chariots Superintendent of foot-soldiers Activity of the commandant of the armय्

02.33.01 अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः

02.33.02 स रथकर्मान्तान् कारयेत्

02.33.03 दशपुरुषो द्वादशान्तरो रथः

02.33.04 तस्माद् एकान्तरावरा आषड्ऽन्तराद् इति सप्त रथाः

02.33.05 देवरथपुष्यरथसाङ्ग्रामिकपारियाणिकपरपुराभियानिकवैनयिकांश्च रथान् कारयेत्

02.33.06 इष्व्ऽस्त्रप्रहरणावरण उपकरणकल्पनाः सारथिरथिकरथ्यानां च कर्मस्वायोगं विद्यात्, आकर्मभ्यश्च भक्तवेतनं भृतानां अभृतानां च योग्यारक्षाऽनुष्ठानं अर्थमानकर्म च

02.33.07 एतेन पत्त्य्ऽध्यक्षो व्याख्यातः

02.33.08 स मौलभृतश्रेणिमित्रामित्राटवीबलानां सारफल्गुतां विद्यात्, निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च, आयोगं अयोगं च कर्मसु

02.33.09 तेद् एव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्य्ऽश्वरथचर्यासङ्घुष्टश्चतुर्ऽङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात्

02.33.10 स्वभूमिं युद्धकालं प्रत्यनीकं अभिन्नभेदनं भिन्नसन्धानं संहतभेदनं भिन्नवधं दुर्गवधं यात्राकालं च पश्येत्

02.33.11ab तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत् ।

02.33.11chd स्थाने याने प्रहरणे सैन्यानां विनये रतः (इति)

Chapt | Superintendent of passports
Superintendent of pasture lands

02.34.01 मुद्राऽध्यक्षो मुद्रां माषकेण दद्यात्

02.34.02 स-मुद्रो जनपदं प्रवेष्टुं निष्क्रमितुं वा लभेत

02.34.03 द्वादशपणं अमुद्रो जानपदो दद्यात्

02.34.04 कूटमुद्रायां पूर्वः साहसदण्डः तिरोजनपदस्य उत्तमः

02.34.05 विवीताध्यक्षो मुद्रां पश्येत्

02.34.06 ग्रामान्तरेषु च विवीतं स्थापयेत्

02.34.07 चोरव्यालभयान्निम्नारण्यानि शोधयेत्

02.34.08 अनुदके कूपसेतुबन्ध उत्सान् स्थापयेत्, पुष्पफलवाटांश्च

02.34.09 लुब्धकश्वगणिनः परिव्रजेयुररण्यानि

02.34.10 तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दं अग्राह्याः कुर्युः शैलवृक्षाधिरूढा वा शीघ्रवाहना वा

02.34.11 अमित्राटवीसञ्चारं च राज्ञो गृहकपोतैर्मुद्रायुक्तैर्हारयेत्, धूमाग्निपरम्परया वा

02.34.12ab द्रव्यहस्तिवनाजीवं वर्तनीं चोररक्षणम् ।

02.34.12chd सार्थातिवाह्यं गोरक्ष्यं व्यवहारं च कारयेत् (इति)

Chapt | Activity of the administrator

Secret agents in the disguise of householders, traders, and ascetics

02.35.01 समाहर्ता चतुर्धा जनाप्दं विभज्य ज्येष्ठमध्यमकनिष्ठविभागेन ग्रामाग्रं परिहारकं आयुधीयं धान्यपशुहिरण्यकुप्यविष्टिप्रतिकरं इदं एतावद् इति निबन्धयेत्

02.35.02 तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत्

02.35.03 सीमावरोधेन ग्रामाग्रं, कृष्टाकृष्टस्थलकेदारारामषण्डवाटवनवास्तुचैत्यदेवगृहसेतुबन्धश्मशानसत्त्रप्रपापुण्यस्थानविवीतपथिसङ्ख्यानेन क्षेत्राग्रं, तेन सीम्नां क्षेत्राणां च करदाकरदसङ्ख्यानेन

02.35.04 तेषु च एतावच्चातुर्वार्ण्यं, एतावन्तः कर्षकगोरक्षकवैदेहककारुकर्मकरदासाश्च, एतावच्च द्विपदचतुष्पदं, इदं च एषु हिरण्यल्विष्टिशुल्कदण्डं समुत्तिष्ठति इति

02.35.05 कुलानां च स्त्रीपुरुषाणां बालवृद्धकर्मचरित्राजीवव्ययपरिमाणं विद्यात्

02.35.06 एवं च जनपदचतुर्भागं स्थानिकश्चिन्तयेत्

02.35.07 गोपस्थानिकस्थानेषु प्रदेष्टारः कार्यकरणं बलिप्रग्रहं च कुर्युः

02.35.08 समाहर्तृप्रदिष्टाश्च गृहपतिकव्यञ्जना येषु ग्रामेषु प्रणिहिताः तेषां ग्रामाणां क्षेत्रगृहकुलाग्रं विद्युः, मानसञ्जाताभ्यां क्षेत्राणि भोगपरिहाराभ्यां गृहाणि वर्णकर्मभ्यां कुलानि च

02.35.09 तेषां जङ्घाग्रं आयव्ययौ च विद्युः

02.35.10 प्रस्थितागतानां च प्रवासावासकारणं, अनर्थ्यानां च स्त्रीपुरुषाणां चारप्रचारं च विद्युः

02.35.11 एवं वैदेहकव्यञ्जनाः स्वभूमिजानां राजपण्यानां खनिसेतुवनकर्मान्तक्षेत्रजानां प्रमाणं अर्घं च विद्युः

02.35.12 परभूमिजातानां वारिस्थलपथ उपयातानां सारफल्गुपुण्यानां कर्मसु च शुल्कवर्तन्य्sअतिवाहिकगुल्मतरदेयभागभक्तपण्यागारप्रमाणं विद्युः

02.35.13 एवं समाहर्तृप्रदिष्टाः तापसव्यञ्जनाः कर्षकगोरक्षकवैदेहकानां अध्यक्षाणां च शौचाशौचं विद्युः

02.35.14 पुराण चोरव्यञ्जनाश्चान्तेवासिनश्चैत्यचतुष्पथशून्यपद उदपाननदीनिपानतीर्थायतनाश्रमारण्यशैलवनगहनेषु स्तेनामित्रप्रवीरपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनान्युपलभेरन्

02.35.15ab समाहर्ता जनपदं चिन्तयेद् एवं उत्थितः ।

02.35.15chd चिन्तयेयुश्च संस्थाः ताः संस्थाश्चान्याः स्वयोनयः (इति)

Chapt | Rules for the city-superintendent

02.36.01 समाहर्तृवन्नागरिको नगरं चिन्तयेत्

02.36.02 दशकुलीं गोपो विंशतिकुलीं चत्वारिंशत्कुलीं वा

02.36.03 स तस्यां स्त्रीपुरुषाणां जातिगोत्रनामकर्मभिः जङ्घाग्रं आयव्ययौ च विद्यात्

02.36.04 एवं दुर्गचतुर्भागं स्थानिकश्चिन्तयेत्

02.36.05 धर्मावसथिनः पाषण्डिपथिकान् आवेद्य वासयेयुः, स्वप्रत्ययाश्च तपस्विनः श्रोत्रियांश्च

02.36.06 कारुशिल्पिनः स्वकर्मस्थानेषु स्वजनं वासयेयुः, वैदेहकाश्चान्योन्यं स्वकर्मस्थानेषु

02.36.07 पण्यानां अदेशकालविक्रेतारं अस्वकरणं च निवेदयेयुः

02.36.08 शौण्डिकपाक्वमांसिकाउदनिकरूपाजीवाः परिज्ञातं आवासयेयुः

02.36.09 अतिव्ययकर्तारं अत्याहितकर्माणं च निवेदयेयुः

02.36.10 चिकित्सकः प्रच्छन्नव्रणप्रतीकारकारयितारं अपथ्यकारिणं च गृहस्वामी च निवेद्य गोपस्थानिकयोर्मुच्येत, अन्यथा तुल्यदोषः स्यात्

02.36.11 प्रस्थितागतौ च निवेदयेत्, अन्यथा रात्रिदोषं भजेत

02.36.12 क्षेमरात्रिषु त्रिपणं दद्यात्

02.36.13 पथिक उत्पथिकाश्च बहिर्ऽन्तश्च नगरस्य देवगृहपुण्यस्थानवनश्मशानेषु स-व्रणं अनिष्ट उपकरणं उद्भाण्डीकृतं आविग्नं अतिस्वप्नं अध्वक्लान्तं अपूर्वं वा गृह्णीयुः

02.36.14 एवं अभ्यन्तरे शून्यनिवेशावेशनशौण्डिकाउदनिकपाक्वमांसिकद्यूतपाषण्डावासेषु विचयं कुर्युः

02.36.15 अग्निप्रतीकारं च ग्रीष्मे

02.36.16 मध्यमयोरह्नश्चतुर्भागयोरष्टभागोऽग्निदण्डः

02.36.17 बहिर्ऽधिश्रयणं वा कुर्युः

02.36.18 पादः पञ्चघटीनां कुम्भद्रोणिनिःश्रेणीपरशुशूर्पाङ्कुशकचग्रहणीदृतीनां चाकरणे

02.36.19 तृणकटच्छन्नान्यपनयेत्

02.36.20 अग्निजीविन एकस्थान् वासयेत्

02.36.21 स्वगृहप्रद्वारेषु गृहस्वामिनो वसेयुः असम्पातिनो रात्रौ

02.36.22 रथ्यासु कुटव्रजाः सहस्रं तिष्ठेयुः, चतुष्पथद्वारराजपरिग्रहेषु च

02.36.23 प्रदीप्तं अनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः, षट्पणोऽवक्रयिणः

02.36.24 प्रमादाद् दीप्तेषु चतुष्पञ्चाशत्पणो दण्डः

02.36.25 प्रदीपिकोऽग्निना वध्यः

02.36.26 पांसुन्यासे रथ्यायां अष्टभागो दण्डः, पङ्क उदकसम्निरोधे पादः

02.36.27 राजमार्गे द्विगुणः

02.36.28 पण्यस्थान उदकस्थानदेवगृहराजपरिग्रहेषु पण उत्तरा विष्टादण्डाः, मूत्रेष्वर्धदण्डाः

02.36.29 भैषज्यव्याधिभयनिमित्तं अदण्ड्याः

02.36.30 मार्जारश्वनकुलसर्पप्रेतानां नगरस्यान्तर्.उत्सर्गे त्रिपणो दण्डः, खर उष्ट्राश्वतराश्वप्रेतानां षट्पणः, मनुष्यप्रेतानां पञ्चाशत्पणः

02.36.31 मार्गविपर्यासे शवद्वाराद् अन्यतश्च शवनिर्णयने पूर्वः साहसदण्डः

02.36.32 द्वाःस्थानां द्विशतम्

02.36.33 श्मशानाद् अन्यत्र न्यासे दहने च द्वादशपणो दण्डः

02.36.34 विषण्णालिकं उभयतोरात्रं यामतूर्यम्

02.36.35 तूर्यशब्दे राज्ञो गृहाभ्याशे सपादपणंऽक्षणताडनं प्रथमपश्चिमयामिकं, मध्यमयामिकं द्विगुणं, अन्तश्चतुर्गुणम्

02.36.36 शङ्कनीये देशे लिङ्गे पूर्वापदाने च गृहीतं अनुयुञ्जीत

02.36.37 राजपरिग्रह उपगमने नगररक्षाऽऽरोहणे च मध्यमः साहसदण्डः

02.36.38 सूतिकाचिकित्सकप्रेतप्रदीपयाननागरिकतूर्यप्रेक्षाऽग्निनिमित्तं मुद्राभिश्चाग्राह्याः

02.36.39 चाररात्रिषु प्रच्छन्नविपरीतवेषाः प्रव्रजिता दण्डशस्त्रहस्ताश्च मनुष्या दोषतो दण्ड्याः

02.36.40 रक्षिणां अवार्यं वारयतां वार्यं चावारयतां क्षणद्विगुणो दण्डः

02.36.41 स्त्रियं दासीं अधिमेहयतां पूर्वः साहसदण्डः, अदासीं मध्यमः, कृतावरोधां उत्तमः, कुलस्त्रियं वधः

02.36.42 चेतनाचेतनिकं रात्रिदोषं अशंसतो नागरिकस्य दोषानुरूपो दण्डः, प्रमादस्थाने च

02.36.43 नित्यं उदकस्थानमार्गभ्रमच्छन्नपथवप्रप्राकाररक्षाऽवेक्षणं नष्टप्रस्मृतापसृतानां च रक्षणम्

02.36.44 बन्धनागारे च बालवृद्धव्याधितानाथानां जातनक्षत्रपौर्णमासीषु विसर्गः

02.36.45 पण्यशीलाः समयानुबद्धा वा दोषनिष्क्रयं दद्युः

02.36.46ab दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत् ।

02.36.46chd कर्मणा कायदण्डेन हिरण्यानुग्रहेण वा

02.36.47ab अपूर्वदेशाधिगमे युवराजाभिऽएचने ।

02.36.47chd पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते (इति)

Book | Determination of (valid and invalid) transactions

Chapt | Filing of law-suits

03.1.01 धर्मस्थाः त्रयः त्रयोऽमात्या जनपदसन्धिसङ्ग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकान् अर्थान् कुर्युः

03.1.02 तिरोहितान्तर्ऽगारनक्तारण्य ऽपध्य्.ऽपह्वरकृतांश्च व्यवहारान् प्रतिषेधयेयुः

03.1.03 कर्तुः कारयितुः पूर्वः साहसदण्डः

03.1.04 श्रोतृणां एक एकं प्रत्यर्धदण्डाः

03.1.05 श्रद्धेयानां तु द्रव्यव्यपनयः

03.1.06 परोक्षेणाधिक.ऋणग्रहणं अवक्तव्यकरा वा तिरोहिताः सिध्येयुः

03.1.07 दायनिक्षेप ऽपनिधिविवाहयुक्ताः स्त्रीणां अनिष्कासिनीनां व्याधितानां चामूढसंज्ञानां अन्तर्ऽगारकृताः सिध्येयुः

03.1.08 साहसानुप्रवेशकलहविवाहराजनियोगयुक्ताः पूर्वरात्रव्यवहारिणां च रात्रिकृताः सिध्येयुः

03.1.09 सार्थव्रजाश्रमव्याधचारणमध्येष्वरण्यचराणां अरण्यकृताः सिध्येयुः

03.1.10 गूढाजीविषु च ऽपधिकृताः सिध्येयुः

03.1.11 मिथःसमवाये च ऽपह्वरकृताः सिध्येयुः

03.1.12 अतोऽन्यथा न सिध्येयुः, अपाश्रयवद्भिश्च कृताः, पितृमता पुत्रेण, पित्रा पुत्रवता, निष्कुलेन भ्रात्रा, कनिष्ठेनाविभक्तांशेन, पतिमत्या पुत्रवत्या च स्त्रिया, दासाहितकाभ्यां, अप्राप्तातीतव्यवहाराभ्यां, अभिशस्तप्रव्रजितन्यङ्गव्यसनिभिश्च, अन्यत्र निषृष्टव्यवहारेभ्यः

03.1.13 तत्रापि क्रुद्धेनार्तेन मत्तेन ऽन्मत्तेनावगृहीतेन वा कृता व्यवहारा न सिध्येयुः

03.1.14 कर्तृकारयितृश्रोतृणां पृथग् यथा ऽक्ता दण्डाः

03.1.15 स्वे स्वे तु वर्गे देशे काले च स्वकरणकृताः सम्पूर्णाचाराः शुद्धदेशा दृष्टरूपलक्षणप्रमाणगुणाः सर्वव्यवहाराः सिध्येयुः

03.1.16 पश्चिमं च एषां करणं आदेशाधिवर्जं श्रद्धेयम् इति व्यवहारस्थापना ।

03.1.17 संवत्सरं ऋतुं मासं पक्षं दिवसं करणं अधिकरणं ऋणं वेदकावेदकयोः कृतसमर्थावस्थयोर्देशग्रामजातिगोत्रनामकर्माणि चाभिलिख्य वादिप्रतिवादिप्रश्नान् अर्थानुपूर्व्या निवेशयेत्

03.1.18 निविष्टांश्चावेक्षेत

03.1.19 निबद्धं वादं ऽत्सृज्यान्यं वादं सङ्क्रामति, पूर्व ऽक्तं पश्चिमेनार्थेन नाभिसन्धत्ते, परवाक्यं अनभिग्राह्यं अभिग्राह्यावतिष्ठते, प्रतिज्ञाय देशं निर्दिश इत्युक्ते न

निर्दिशति, हीनदेशं अदेशं वा निर्दिशति, निर्दिष्टाद् देशाद् अन्यं देशं उपस्थापयति, उपस्थिते देशेऽर्थवचनं न एवं इत्यपव्ययते, साक्षिभिरवधृतं न इच्छति, असम्भाष्ये देशे साक्षिभिर्मिथः सम्भाषते, इति परा उक्तहेतवः

03.1.20 परा उक्तदण्डः पञ्चबन्धः

03.1.21 स्वयंवादिदण्डो दशबन्धः

03.1.22 पुरुषभृतिरष्टांशः

03.1.23 पथिभक्तं अर्घविशेषतः

03.1.24 तद् उभयं नियम्यो दद्यात्

03.1.25 अभियुक्तो न प्रत्यभियुञ्जीत, अन्यत्र कलहसाहससार्थसमवायेभ्यः

03.1.26 न चाभियुक्तेऽभियोगेऽस्ति

03.1.27 अभियोक्ता चेत् प्रत्युक्तः तद्ऽहरेव न प्रतिब्रूयात् परा उक्तः स्यात्

03.1.28 कृतकार्यविनिश्चयो ह्यभियोक्ता नाभियुक्तः

03.1.29 तस्याप्रतिब्रुवतः त्रिरात्रं सप्तरात्रं इति

03.1.30 अत ऊर्ध्वं त्रिपणावरार्ध्यं द्वादशपणपरं दण्डं कुर्यात्

03.1.31 त्रिपक्षाद् ऊर्ध्वं अप्रतिब्रुवतः परा उक्तदण्डं कृत्वा यान्यस्य द्रव्याणि स्युः ततोऽभियोक्तारं प्रतिपादयेद्, अन्यत्र वृत्य्.उपकरणेभ्यः

03.1.32 तद् एव निष्पततोऽभियुक्तस्य कुर्यात्

03.1.33 अभियोक्तुर्निष्पातसमकालः परा उक्तभावः

03.1.34 प्रेतस्य व्यसनिनो वा साक्षिवचनं असारम्

03.1.35 अभियोक्ता दण्डं दत्त्वा कर्म कारयेत्

03.1.36 आधिं वा स कामं प्रवेशयेत्

03.1.37 रक्षोघ्नरक्षितं वा कर्मणा प्रतिपादयेद्, अन्यत्र ब्राह्मणात्

03.1.38ab चतुर्वर्णाश्रमस्यायं लोकस्याचाररक्षणात् ।

03.1.38chd नश्यतां सर्वधर्माणां राजा धर्मप्रवर्तकः

03.1.39ab धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।

03.1.39chd विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः

03.1.40ab तत्र सत्ये स्थितो धर्मो व्यवहारः तु साक्षिषु ।

03.1.40chd चरित्रं सङ्ग्रहे पुंसां राज्ञां आज्ञा तु शासनम्

03.1.41ab राज्ञः स्वधर्मः स्वर्गाय प्रजा धर्मेण रक्षितुः ।

03.1.41chd अरक्षितुर्वा क्षेसुर्वा मिथ्यादण्डं अतोऽन्यथा

03.1.42ab दण्डो हि केवलो लोकं परं च इमं च रक्षति ।

03.1.42chd राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः

03.1.43ab अनुशासद् हि धर्मेण व्यवहारेण संस्थया ।

03.1.43chd न्यायेन च चतुर्थेन चतुर्ऽन्तां वा महीं जयेत्

03.1.44ab संस्था या धर्मशास्त्रेण शास्त्रं वा व्यावहारिकम् ।

03.1.44chd यस्मिन्न् अर्थे विरुध्येत धर्मेणार्थं विनिर्णयेत्

03.1.45ab शास्त्रं विप्रतिपद्येत धर्मे न्यायेन केनचित् ।

03.1.45chd न्यायः तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति

03.1.46ab दृष्टदोषः स्वयंवादः स्वपक्षपरपक्षयोः ।

03.1.46chd अनुयोगार्जवं हेतुः शपथश्चार्थसाधकः

03.1.47ab पूर्व उत्तरार्थव्याघाते साक्षिवक्तव्यकारणे ।

03.1.47chd चारहस्ताच्च निष्पाते प्रदेष्टव्यः पराजयः (इति)

Chapt | Concerning marriage

(i) Law of marriage (ii) Rules concerning women property(iii) Concerning supersession (of a wife) by a second marriage

03.2.01 विवाहपूर्वो व्यवहारः

03.2.02 कन्यादानं कन्यां अलङ्कृत्य ब्राह्मो विवाहः

03.2.03 सहधर्मचर्या प्राजापत्यः

03.2.04 गोमिथुनादानाद् आर्षः

03.2.05 अन्तर्वेद्यां ऋत्विजे दानाद् दैवः

03.2.06 मिथःसमवायाद् गान्धर्वः

03.2.07 शुल्कादानाद् आसुरः

03.2.08 प्रसह्यादानाद् राक्षसः

03.2.09 सुसमत्तादानात् पैशाचः

03.2.10 पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः, मातापितृप्रमाणाः शेषाः

03.2.11 तौ हि शुल्कहरौ दुहितुः, अन्यतराभावेऽन्यतरो वा

03.2.12 द्वितीयं शुल्कं स्त्री हरेत

03.2.13 सर्वेषां प्रीत्यऽअरोपणं अप्रतिषिद्धम् इति विवाहधर्मः ।

03.2.14 वृत्तिराबन्ध्यं वा स्त्रीधनम्

03.2.15 परद्विसाहस्रा स्थाप्या वृत्तिः, आबन्ध्यानियमः

03.2.16 तद् आत्मपुत्रस्नुषाभर्मणि प्रवासाप्रतिविधाने च भार्याया भोक्तुं अदोषः, प्रतिरोधकव्याधिदुर्भिक्षभयप्रतीकारे धर्मकार्ये च पत्युः, सम्भूय वा दम्पत्योर्मिथुनं प्रजातयोः

03.2.17 त्रिवर्ष उपभुक्तं च धर्मिष्ठेषु विवाहेषु नानुयुञ्जीत

03.2.18 गान्धर्वासुर उपभुक्तं स-वृद्धिकं उभयं दाप्येत, राक्षसपैशाच उपभुक्तं स्तेयं दद्यात्

03.2.19 मृते भर्तरि धर्मकामा तदानीं एव स्थाप्याभरणं शुल्कशेषं च लभेत

03.2.20 लब्ध्वा वा विन्दमाना स-वृद्धिकं उभयं दाप्येत

03.2.21 कुटुम्बकामा तु श्वशुरपतिदत्तं निवेशकाले लभेत

03.2.22 निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः

03.2.23 श्वशुरप्रातिलोम्येन वा निविष्टा श्वशुरपतिदत्तं जीयेत

03.2.24 ज्ञातिहस्ताद्ऽभिमृष्टाया ज्ञातयो यथागृहीतं दद्युः

03.2.25 न्याय उपगतायाः प्रतिपत्ता स्त्रीधनं गोपयेत्

03.2.26 पतिदायं विन्दमाना जीयेत

03.2.27 धर्मकामा भुञ्जीत

03.2.28 पुत्रवती विन्दमाना स्त्रीधनं जीयेत

03.2.29 तत् तु स्त्रीधनं पुत्रा हरेयुः

03.2.30 पुत्रभरणार्थं वा विन्दमाना पुत्रार्थं स्फातीकुर्यात्

03.2.31 बहुपुरुषप्रजानां पुत्राणां यथापितृदत्तं स्त्रीधनं अवस्थापयेत्

03.2.32 कामकरणीयं अपि स्त्रीधनं विन्दमाना पुत्रसंस्थं कुर्यात्

03.2.33 अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनं आयुःक्षयाद् भुञ्जीत

03.2.34 आपद्ऽर्थं हि स्त्रीधनम्

03.2.35 ऊर्ध्वं दायादं गच्छेत्

03.2.36 जीवति भर्तरि मृतायाः पुत्रा दुहितरश्च स्त्रीधनं विभजेरन्, अपुत्राया दुहितरः, तद्sभावे भर्ता

03.2.37 शुल्कं अन्वाधेयं अन्यद् वा बन्धुभिर्दत्तं बान्धवा हरेयुः इति स्त्रीधनकल्पः ।

03.2.38 वर्षाण्यष्टावप्रजायमानां अपुत्रां वन्ध्यां चाकाङ्क्षेत, दश निन्दुं, द्वादश कन्याप्रसविनीम्

03.2.39 ततः पुत्रार्थी द्वितीयां विन्देत

03.2.40 तस्यातिक्रमे शुल्कं स्त्रीधनं अर्धं चाधिवेदनिकं दद्यात्, चतुर्विंशतिपणपरं च दण्डम्

03.2.41 शुल्कं स्त्रीधनं अशुल्कस्त्रीधनायाः तत्प्रमाणं आधिवेदनिकं अनुरूपां च वृत्तिं दत्त्वा बह्वीरपि विन्देत

03.2.42 पुत्रार्था हि स्त्रियः

03.2.43 तीर्थसमवाये चासां यथाविवाहं पूर्व ऊढां जीवत्पुत्रां वा पूर्वं गच्छेत्

03.2.44 तीर्थगूहनागमने षण्ँअवतिर्दण्डः

03.2.45 पुत्रवतीं धर्मकामां वन्ध्यां निन्दुं नीरजस्कां वा नाकामां उपेयात्

03.2.46 न चाकामः पुरुषः कुष्ठिनीं उन्मत्तां वा गच्छेत्

03.2.47 स्त्री तु पुत्रार्थं एवम्भूतं वा उपगच्छेत्

03.2.48ab नीचत्वं परदेशं वा प्रस्थितो राजकिल्बिषी ।

03.2.48chd प्राणाभिहन्ता पतितः त्याज्यः क्लीबोsपि वा पतिः (इति)

Chapt | iv) Marital duty, (v) Maintenance, (vi) Cruelty, (vii) Disaffection, (viii) Misconduct, (ix) Prohibition of favours and dealings

03.3.01 द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति, षोडशवर्षः पुमान्

03.3.02 अत ऊर्ध्वं अशुश्रूषायां द्वादशपणः स्त्रिया दण्डः, पुंसो द्विगुणः इति शुश्रूषा ।

03.3.03 भर्मण्यायां अनिर्दिष्टकालायां ग्रासाच्छादनं वाsधिकं यथापुरुषपरिवापं सविशेषं दद्यात्

03.3.04 निर्दिष्टकालायां तद् एव सङ्ख्याय बन्धं च दद्यात्

03.3.05 शुल्कस्त्रीधनाधिवेदनिकानां अनादाने च

03.3.06 श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः इति भर्म ।

03.3.07 नष्टे विनष्टे न्यङ्गे अपितृके अमातृके इत्यनिर्देशेन विनयग्राहणम्

03.3.08 वेणुदलरज्जुहस्तानां अन्यतमेन वा पृष्ठे त्रिराघातः

03.3.09 तस्यातिक्रमे वाग्दण्डपारुष्यदण्डाभ्यां अर्धदण्डाः

03.3.10 तद् एव स्त्रिया भर्तरि प्रसिद्धदोषायाः

03.3.11 ईर्ष्यया बाह्यविहारेषु द्वारेष्वत्ययो यथानिर्दिष्टः इति पारुष्यम् ।

03.3.12 भर्तारं द्विषती स्त्री सप्तार्तवान्यमण्डयमाना तदानीं एव स्थाप्याभरणं निधाय भर्तारं अन्यया सह शयानं अनुशयीत

03.3.13 भिक्षुक्यऽन्वाधिज्ञातिकुलानां अन्यतमे वा भर्ता द्विषन् स्त्रियं एकां अनुशयीत

03.3.14 दृष्टलिङ्गे मैथुनापहारे सवर्णापसर्प उपगमे वा मिथ्यावादी द्वादशपणं दद्यात्

03.3.15 अमोक्ष्या भर्तुरकामस्य द्विषती भार्या, भार्यायाश्च भर्ता

03.3.16 परस्परन्द्वेषान् मोक्षः

03.3.17 स्त्रीविप्रकाराद् वा पुरुषश्चेन् मोक्षं इच्छेद् यथागृहीतं अस्यै दद्यात्

03.3.18 पुरुषविप्रकाराद् वा स्त्री चेन् मोक्षं इच्छेन्नास्यै यथागृहीतं दद्यात्

03.3.19 अमोक्षो धर्मविवाहानाम् इति द्वेषः ।

03.3.20 प्रतिषिद्धा स्त्री दर्पमद्यक्रीडायां त्रिपणं दण्डं दद्यात्

03.3.21 दिवा स्त्रीप्रेक्षाविहारगमने षट्पणो दण्डः, पुरुषप्रेक्षाविहारगमने द्वादशपणः

03.3.22 रात्रौ द्विगुणः

03.3.23 सुप्तमत्तप्रव्रजने भर्तुरदाने च द्वारस्य द्वादशपणः

03.3.24 रात्रौ निष्कसने द्विगुणः

03.3.25 स्त्रीपुंसयोर्मैथुनार्थेनाङ्गविचेष्टायां रहोऽश्लीलसम्भाषायां वा चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसो द्विगुणः

03.3.26 केशनीविदन्तनखालम्बनेषु पूर्वः साहसदण्डः, पुंसो द्विगुणः

03.3.27 शङ्कितस्थाने सम्भाषायां च पणस्थाने शिफादण्डः

03.3.28 स्त्रीणां ग्राममध्ये चण्डालः पक्षान्तरे पञ्चशिफा दद्यात्

03.3.29 पणिकं वा प्रहारं मोक्षयेत् इत्यतीचारः ।

03.3.30 प्रतिषिद्धयोः स्त्रीपुंसयोरन्योन्य उपकारे क्षुद्रकद्रव्याणां द्वादशपणो दण्डः, स्थूलकद्रव्याणां चतुर्विंशतिपणः, हिरण्यसुवर्णयोश्चतुष्पञ्चाशत्पणः स्त्रिया दण्डः, पुंसोर्द्विगुणः

03.3.31 त एवागम्ययोरर्धदण्डाः, तथा प्रतिषिद्धपुरुषव्यवहारेषु च इति प्रतिषेधः ।

03.3.32ab राजद्विष्टातिचाराभ्यां आत्मापक्रमणेन च ।

03.3.32chd स्त्रीधनानीतशुल्कानां अस्वाम्यं जायते स्त्रियाः (इति)

Chapt | Leaving home, goi.g away(with a man), Short absence from home, Long absence from home

03.4.01 पतिकुलान्निष्पतितायाः स्त्रियाः षट्पणो दण्डः, अन्यत्र विप्रकारात्

03.4.02 प्रतिषिद्धायां द्वादशपणः

03.4.03 प्रतिवेशगृहातिगतायाः षट्पणः

03.4.04 प्रातिवेशिकभिक्षुकवैदेहकानां अवकाशभिक्षापण्यदाने द्वादशपणो दण्डः

03.4.05 प्रतिषिद्धानां पूर्वः साहसदण्डः

03.4.06 परगृहातिगतायाश्चतुर्विंशतिपणः

03.4.07 परभार्याऽवकाशदाने शत्यो दण्डः, अन्यत्रापद्भ्यः

03.4.08 वारणाज्ञानयोर्निर्दोषः

03.4.09 पतिविप्रकारात् पतिज्ञातिसुखावस्थग्रामिकान्वाधिभिक्षुकीज्ञातिकुलानां अन्यतमं अपुरुषं गन्तुं अदोषः इति आचार्याः

03.4.10 स-पुरुषं वा ज्ञातिकुलम्

03.4.11 कुतो हि साध्वीजनस्यच्छलम्

03.4.12 सुखं एतद् अवबोद्धुं, इति कौटिल्यः

03.4.13 प्रेतव्याधिव्यसनगर्भनिमित्तं अप्रतिषिद्धं एव ज्ञातिकुलगमनम्

03.4.14 तन्निमित्तं वारयतो द्वादशपणो दण्डः

03.4.15 तत्रापि गूहमाना स्त्रीधनं जीयेत, ज्ञातयो वा छादयन्तः शुल्कशेषम् इति निष्पतनं ।

03.4.16 पतिकुलान्निष्पत्य ग्रामान्तरगमने द्वादशपणो दण्डः स्थाप्याऽऽभरणलोपश्च

03.4.17 गम्येन वा पुंसा सह प्रस्थाने चतुर्विंशतिपणः सर्वधर्मलोपश्च, अन्यत्र भर्मदानतीर्थगमनाभ्याम्

03.4.18 पुंसः पूर्वः साहसदण्डः तुल्यश्रेयसोः, पापीयसो मध्यमः

03.4.19 बन्धुर्ऽदण्ड्यः

03.4.20 प्रतिषेधेऽर्धदण्डाः

03.4.21 पथि व्यन्तरे गूढदेशाभिगमने मैथुनार्थेन शङ्कितप्रतिषिद्धायां वा पथ्य्ऽनुसरणे सङ्ग्रहणं विद्यात्

03.4.22 तालावचरचारणमत्स्यबन्धकलुब्धकगोपालकशौण्डिकानां अन्येषां च प्रसृष्टस्त्रीकाणां पथ्य्ऽनुसरणं अदोषः

03.4.23 प्रतिषिद्धे वा नयतः पुंसः स्त्रियो वा गच्छन्त्याः त एवार्धदण्डाः इति पथ्य्ऽनुसरणम् ।

03.4.24 ह्रस्वप्रवासिनां शूद्रवैश्यक्षत्रियब्राह्मणानां भार्याः संवत्सर ऊत्तरं कालं आकाङ्क्षेरन् अप्रजाताः, संवत्सराधिकं प्रजाताः

03.4.25 प्रतिविहिता द्विगुणं कालम्

03.4.26 अप्रतिविहिताः सुखावस्था बिभृयुः, परं चत्वारि वर्षाण्यष्टौ वा ज्ञातयः

03.4.27 ततो यथादत्तं आदाय प्रमुञ्चेयुः

03.4.28 ब्राह्मणं अधीयानं दशवर्षाण्यप्रजाता, द्वादश प्रजाता, राजपुरुषं आयुःक्षयाद् आकाङ्क्षेत

03.4.29 सवर्णतश्च प्रजाता नापवादं लभेत

03.4.30 कुटुम्ब.ऋद्धिलोपे वा सुखावस्थैर्विमुक्ता यथा इष्टं विन्देत, जीवितार्थं आपद्गता वा

03.4.31 धर्मविवाहात् कुमारी परिग्रहीतारं अनाख्याय प्रोषितं अश्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं श्रूयमाणम्

03.4.32 आख्याय प्रोषितं अश्रूयमाणं पञ्च तीर्थान्याकाङ्क्षेत, दश श्रूयमाणम्

03.4.33 एकदेशदत्तशुल्कं त्रीणि तीर्थान्यश्रूयमाणं, श्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत

03.4.34 दत्तशुल्कं पञ्च तीर्थान्यश्नूयमाणं, दश श्नूयमाणम्

03.4.35 ततः परं धर्मस्थैर्विसृष्टा यथा इष्टं विन्देत

03.4.36 तीर्थ उपरोधो हि धर्मवध इति कौटिल्यः इति ह्रस्वप्रवासः ||

03.4.37 दीर्घप्रवासिनः प्रव्रजितस्य प्रेतस्य वा भार्या सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं प्रजाता

03.4.38 ततः पतिसोदर्यं गच्छेत्

03.4.39 बहुषु प्रत्यासन्नं धार्मिकं भर्मसमर्थं कनिष्ठं अभार्यं वा

03.4.40 तद्ऽभावेऽप्यसोदर्यं सपिण्डं कुल्यं वाऽऽसन्नम्

03.4.41 एतेषां एष एव क्रमः

03.4.42ab एतान् उत्क्रम्य दायादान् वेदने जारकर्मणि |

03.4.42chd जारस्त्रीदातृवेत्तारः सम्प्राप्ताः सङ्ग्रहात्ययम् (इति)

Chapt | Partition of inheritance
Orderof inheritance

03.5.01 अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः

03.5.02 तेषां ऊर्ध्वं पितृतो दायविभागः पितृद्रव्याणाम्

03.5.03 स्वयंऽअर्जितं अविभाज्यं, अन्यत्र पितृद्रव्याद् उत्थितेभ्यः

03.5.04 पितृद्रव्याद् अविभक्त उपगतानां पुत्राः पौत्रा वा आचतुर्थाद् इत्यंशभाजः

03.5.05 तावद् अविच्छिन्नः पिण्डो भवति

03.5.06 विच्छिन्नपिण्डाः सर्वे समं विभजेरन्

03.5.07 अपितृद्रव्या विभक्तपितृद्रव्या वा सह जीवन्तः पुनर्विभजेरन्

03.5.08 यतश्च उत्तिष्ठेत स द्व्य्sंशं लभेत

03.5.09 द्रव्यं अपुत्रस्य सोदर्या भ्रातरः सहजीविनो वा हरेयुः कन्याश्च

03.5.10 रिक्थं पुत्रवतः पुत्रा दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः

03.5.11 तद्ऽभावे पिता धरमाणः

03.5.12 पित्र्ऽभावे भ्रातरो भ्रातृपुत्राश्च

03.5.13 अपितृका बहवोऽपि च भ्रातरो भ्रातृपुत्राश्च पितुरेकं अंशं हरेयुः

03.5.14 सोदर्याणां अनेकपितृकाणां पितृतो दायविभागः

03.5.15 पितृभ्रातृपुत्राणां पूर्वे विद्यमाने नापरं अवलम्बन्ते, ज्येष्ठे च कनिष्ठं अर्थग्राहिणम्

03.5.16 जीवद्विभागे पिता न एकं विशेषयेत्

03.5.17 न च एकं अकारणान्निर्विभजेत

03.5.18 पितुरसत्यर्थे ज्येष्ठाः कनिष्ठान् अनुगृह्णीयुः, अन्यत्र मिथ्यावृत्तेभ्यः

03.5.19 प्राप्तव्यवहाराणां विभागः

03.5.20 अप्राप्तव्यवहाराणां देयविशुद्धं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुः आव्यवहारप्रापणात्, प्रोषितस्य वा

03.5.21 सम्निविष्टसमं असम्निविष्टेभ्यो नैवेशनिकं दद्युः, कन्याभ्यश्च प्रादानिकम्

03.5.22 ऋणरिक्थयोः समो विभागः

03.5.23 उदपात्राण्यपि निष्किञ्चना विभजेरन् इत्याचार्याः

03.5.24 छलं एतद् इति कौटिल्यः

03.5.25 सतोऽर्थस्य विभागो नासतः

03.5.26 एतावान् अर्थः सामान्यः तस्य एतावान् प्रत्य्ऽंश इत्यनुभाष्य ब्रुवन् साक्षिषु विभागं कारयेत्

03.5.27 दुर्विभक्तं अन्योन्यापहृतं अन्तर्हितं अविज्ञात उत्पन्नं वा पुनर्विभजेरन्

03.5.28 अदायादकं राजा हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जं, अन्यत्र श्रोत्रियद्रव्यात्

03.5.29 तत् त्रैवेद्येभ्यः प्रयच्छेत्

03.5.30 पतितः पतिताज् जातः क्लीबश्चानंशाः, जड उन्मत्तान्धकुष्ठिनश्च

03.5.31 सति भार्यार्थे तेषां अपत्यं अतद्विधं भागं हरेत्

03.5.32 ग्रासाच्छादनं इतरे पतितवर्जाः

03.5.33ab तेषां च कृतदाराणां लुप्ते प्रजनने सति ।

03.5.33chd सृजेयुर्बान्धवाः पुत्रांः तेषां अंशान् प्रकल्पयेत् (इति)

Chapt | Division into shares

03.6.01 एकस्त्रीपुत्राणां ज्येष्ठांशः - ब्राह्मणानां अजाः, क्षत्रियाणां अश्वाः, वैश्यानां गावः, शूद्राणां अवयः

03.6.02 काणलङ्गाः तेषां मध्यमांशः, भिन्नवर्णाः कनिष्ठांशः

03.6.03 चतुष्पदाभावे रत्नवर्जानां दशानां भागं द्रव्याणां एकं ज्येष्ठो हरेत्

03.6.04 प्रतिमुक्तस्वधापाशो हि भवति

03.6.05 इत्यौशनसो विभागः

03.6.06 पितुः परिवापाद् यानं आभरणं च ज्येष्ठांशः, शयनासनं भुक्तकांस्यं च मध्यमांशः, कृष्णं धान्यायसं गृहपरिवापो गोशकटं च कनिष्ठांशः

03.6.07 शेषद्रव्याणां एकद्रव्यस्य वा समो विभागः

03.6.08 अदायादा भगिन्यः, मातुः परिवापाद् भुक्तकांस्याभरणभागिन्यः

03.6.09 मानुषहीनो ज्येष्ठः तृतीयं अंशं ज्येष्ठांशाल्लभेत, चतुर्थं अन्यायवृत्तिः, निवृत्तधर्मकार्यो वा

03.6.10 कामाचारः सर्वं जीयेत

03.6.11 तेन मध्यमकनिष्ठौ व्याख्यातौ

03.6.12 तयोर्मानुष उपेतो ज्येष्ठांशाद् अर्धं लभेत

03.6.13 नानास्त्रीपुत्राणां तु संस्कृतासंस्कृतयोः कन्याकृतक्षतयोरभावे च एकस्याः पुत्रयोर्यमयोर्वा पूर्वजन्मना ज्येष्ठभावः

03.6.14 सूतमागधव्रात्यरथकाराणां ऐश्वर्यतो विभागः

03.6.15 शेषाः तं उपजीवेयुः

03.6.16 अनीश्वराः समविभागाः

03.6.17 चातुर्वर्ण्यपुत्राणां ब्राह्मणीपुत्रश्चतुरोऽंशान् हरेत्, क्षत्रियापुत्रस्त्रीन् अंशान्, वैश्यापुत्रो द्वावंशौ, एकं शूद्रापुत्रः

03.6.18 तेन त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोर्व्याख्यातः

03.6.19 ब्राह्मणस्यानन्तरापुत्रः तुल्यांशः

03.6.20 क्षत्रियवैश्ययोरर्धांशः तुल्यांशो वा मानुष उपेतः

03.6.21 तुल्यातुल्ययोरेकपुत्रः सर्वं हरेत्, बन्धूंश्च बिभृयात्

03.6.22 ब्राह्मणानां तु पारशवः तृतीयं अंशं लभेत, द्वावंशौ सपिण्डः कुल्यो वाऽऽसन्नः, स्वधादानहेतोः

03.6.23 तदऽभावे पितुराचार्योऽन्तेवासी वा

03.6.24ab क्षेत्रे वा जनयेद् अस्य नियुक्तः क्षेत्रजं सुतम् ।

03.6.24chd मातृबन्धुः सगोत्रो वा तस्मै तत् प्रदिशेद् धनम् (इति)

Chapt | Classification of sons

03.7.01 परपरिग्रहे बीजं उत्सृष्टं क्षेत्रिणः इत्याचार्याः

03.7.02 माता भस्त्रा, यस्य रेतः तस्यापत्यम् इत्यपरे

03.7.03 विद्यमानं उभयं इति कौटिल्यः

03.7.04 स्वयञ्जातः कृतक्रियायां औरसः

03.7.05 तेन तुल्यः पुत्रिकापुत्रः

03.7.06 सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः

03.7.07 जनयितुरसत्यन्यस्मिन् पुत्रे स एव द्विपितृको द्विगोत्रो वा द्वयोरपि स्वधारिक्थभाग् भवति

03.7.08 तत्सधर्मा बन्धूनां गृहे गूढजातः तु गूढजः

03.7.09 बन्धुना उत्सृष्टोऽपविद्धः संस्कर्तुः पुत्रः

03.7.10 कन्यागर्भः कानीनः

03.7.11 सगर्भ ऊढायाः सह ऊढः

03.7.12 पुनर्भूतायाः पौनर्भवः

03.7.13 स्वयञ्जातः पितुर्बन्धूनां च दायादः

03.7.14 परजातः संस्कर्तुरेव न बन्धूनाम्

03.7.15 तत्सधर्मा मातापितृभ्यां अद्भिर्मुक्तो दत्तः

03.7.16 स्वयं बन्धुभिर्वा पुत्रभाव उपगत उपगतः

03.7.17 पुत्रत्वेऽधिकृतः कृतकः

03.7.18 परिक्रीतः क्रीतः इति |

03.7.19 औरसे तु उत्पन्ने सवर्णाः तृतीयांशहराः, असवर्णा ग्रासाच्छादनभागिनः

03.7.20 ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णाः, एकान्तरा असवर्णाः

03.7.21 ब्राह्मणस्य वैश्यायां अम्बष्ठः, शूद्रायां निषादः पारशवो वा

03.7.22 क्षत्रियस्य शूद्रायां उग्रः

03.7.23 शूद्र एव वैश्यस्य

03.7.24 सवर्णासु च एषां अचरितव्रतेभ्यो जाता व्रात्याः

03.7.25 इत्यनुलोमाः

03.7.26 शूद्राद् आयोगवक्षत्तचण्डालाः

03.7.27 वैश्यान् मागधवैदेहकौ

03.7.28 क्षत्रियात् सूतः

03.7.29 पौराणिकः त्वन्यः सूतो मागधश्च, ब्रह्मक्षत्राद् विशेषः

03.7.30 त एते प्रतिलोमाः स्वधर्मातिक्रमाद् राज्ञः सम्भवन्ति

03.7.31 उग्रान्नैषाद्यां कुक्कुटः, विपर्यये पुल्कसः

03.7.32 वैदेहिकायां अम्बष्ठाद् वैणः, विपर्यये कुशीलवः

03.7.33 क्षत्तायां उग्रात्श्वपाकः

03.7.34 इत्येतेऽन्ये चान्तरालाः

03.7.35 कर्मणा वैश्यो रथकारः

03.7.36 तेषां स्वयोनौ विवाहः, पूर्वापरगामित्वं वृत्तानुवृत्तं च

03.7.37 शूद्रसधर्माणो वा, अन्यत्र चण्डालेभ्यः

03.7.38 केवलं एवं वर्तमानः स्वर्गं आप्नोति राजा, नरकं अन्यथा

03.7.39 सर्वेषां अन्तरालानां समो विभागः

03.7.40ab देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वाऽपि यः ।

03.7.40chd उचितः तस्य तेन एव दायधर्मं प्रकल्पयेत् (इति)

Chapt | Immovable propertय्
Dwelling-places

03.8.01 सामन्तप्रत्यया वास्तुविवादाः

03.8.02 गृहं क्षेत्रं आरामः सेतुबन्धः तटाकं आधारो वा वास्तुः

03.8.03 कर्णकीलायससम्बन्धोऽनुगृहं सेतुः

03.8.04 यथासेतुभोगं वेश्म कारयेत्

03.8.05 अभूतं वा परकुड्याद् अपक्रम्य द्वावरत्नी त्रिपदीं वा देशबन्धं कारयेत्

03.8.06 अवस्करं भ्रमं उदपानं वा न गृह उचिताद् अन्यत्र, अन्यत्र सूतिकाकूपाद् आनिर्दशाहाद् इति

03.8.07 तस्यातिक्रमे पूर्वः साहसदण्डः

03.8.08 तेन इन्धनावघातनकृतं कल्याणकृत्येष्वाचाम उदकमार्गाश्च व्याख्याताः

03.8.09 त्रिपदीप्रतिक्रान्तं अध्यर्धं अरत्निं वा गाढप्रसृतं उदकमार्गं प्रस्रवणप्रपातं वा कारयेत्

03.8.10 तस्यातिक्रमे चतुष्पञ्चाशत्पणो दण्डः

03.8.11 एकपदीप्रतिक्रान्तं अरत्निं वा चक्रिचतुष्पदस्थानं अग्निष्ठं उदञ्जरस्थानं रोचनीं कुट्टनीं वा कारयेत्

03.8.12 तस्यातिक्रमे चतुर्विंशतिपणो दण्डः

03.8.13 सर्ववास्तुकयोः प्राक्षिप्सकयोर्वा शालयोः किष्कुरन्तरिका त्रिपदी वा

03.8.14 तयोश्चतुर्ऽङ्गुलं नीप्रान्तरम् नीव्रान्तरम्? समारूढकं वा

03.8.15 किष्कुमात्रं आणिद्वारं अन्तरिकायां खण्डफुल्लार्थं असम्पातं कारयेत्

03.8.16 प्रकाशार्थं अल्पं ऊर्ध्वं वातायनं कारयेत्

03.8.17 तद्ऽवसिते वेश्मनिच्छादयेत्

03.8.18 सम्भूय वा गृहस्वामिनो यथा इष्टं कारयेयुः, अनिष्टं वारयेयुः

03.8.19 वानलट्याश्च ऊर्ध्वं आवार्यभागं कटप्रच्छन्नं अवमर्शभित्तिं वा कारयेद् वर्षाबाधभयात्

03.8.20 तस्यातिक्रमे पूर्वः साहसदण्डः, प्रतिलोमद्वारवातायनबाधायां च, अन्यत्र राजमार्गरथ्याभ्यः

03.8.21 खातसोपानप्रणालीनिश्रेण्यऽवस्करभागैर्बहिर्बाधायां भोगनिग्रहे च

03.8.22 परकुड्यं उदकेन उपघ्नतो द्वादशपणो दण्डः, मूत्रपुरीष उपघाते द्विगुणः

03.8.23 प्रणालीमोक्षो वर्षति, अन्यथा द्वादशपणो दण्डः

03.8.24 प्रतिषिद्धस्य च वसतः, निरस्यतश्चावक्रयिणं अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्यः

03.8.25 स्वयंऽभिप्रस्थितो वर्षावक्रयशेषं दद्यात्

03.8.26 सामान्ये वेश्मनि साहाय्यं अप्रयच्छतः, सामान्यं उपरुन्धतो भोगं च गृहे द्वादशपणो दण्डः

03.8.27 विनाशयतः तद्द्विगुणः

03.8.28ab कोष्ठकाङ्गणवर्चानां अग्निकुट्टनशालयोः ।

03.8.28chd विवृतानां च सर्वेषां सामान्यो भोग इष्यते (इति)

Chapt | sale of immovable property Fixing of boundaries Enchroachment and Damage

03.9.01 ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुं अभ्याभवेयुः

03.9.02 ततोऽन्ये बाह्याः

03.9.03 सामन्तचत्वारिंशत्कुल्येषु गृहप्रतिमुखे वेश्म श्रावयेयुः, सामन्तग्रामवृद्धेषु क्षेत्रं आरामं सेतुबन्धं तटाकं आधारं वा मर्यादासु यथासेतुभोगं अनेनार्घेण कः क्रेता इति

03.9.04 त्रिराघुषितं अव्याहृतं क्रेता क्रेतुं लभेत

03.9.05 स्पर्धया वा मूल्यवर्धने मूल्यवृद्धिः स-शुल्का कोशं गच्छेत्

03.9.06 विक्रयप्रतिक्रोष्टा शुल्कं दद्यात्

03.9.07 अस्वामिप्रतिक्रोशे चतुर्विंशतिपणो दण्डः

03.9.08 सप्तरात्राद् ऊर्ध्वं अनभिसरतः प्रतिक्रुष्टो विक्रीणीत

03.9.09 प्रतिक्रुष्टातिक्रमे वास्तुनि द्विशतो दण्डः, अन्यत्र चतुर्विंशतिपणो दण्डः इति वास्तुविक्रयः |

03.9.10 सीमविवादं ग्रामयोरुभयोः सामन्ता पञ्चग्रामी दशग्रामी वा सेतुभिः स्थावरैः कृत्रिमैर्वा कुर्यात्

03.9.11 कर्षकगोपालकवृद्धाः पूर्वभुक्तिका वा बाह्याः सेतूनां अभिज्ञा बहव एको वा निर्दिश्य सीमसेतून् विपरीतवेषाः सीमानं नयेयुः

03.9.12 उद्दिष्टानां सेतूनां अदर्शने सहस्रं दण्डः |

03.9.13 तद् एव नीते सीमापहारिणां सेतुच्छिदां च कुर्यात्

03.9.14 प्रनष्टसेतुभोगं वा सीमानं राजा यथा उपकारं विभजेत् इति सीमविवादः |

03.9.15 क्षेत्रविवादं सामन्तग्रामवृद्धाः कुर्युः

03.9.16 तेषां द्वैधीभावे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः मध्यं वा गृह्णीयुः

03.9.17 तद्.उभयपरा उक्तं वास्तु राजा हरेत्, प्रनष्टस्वामिकं च

03.9.18 यथा उपकारं वा विभजेत्

03.9.19 प्रसह्यादाने वास्तुनि स्तेयदण्डः

03.9.20 कारणादाने प्रयासं आजीवं च परिसङ्ख्याय बन्धं दद्यात् इति क्षेत्रविवादः ।

03.9.21 मर्यादाऽपहरणे पूर्वः साहसदण्डः

03.9.22 मर्यादाभेदे चतुर्विंशतिपणः

03.9.23 तेन तपोवनविवीतमहापथश्मशानदेवकुलयजनपुण्यस्थानविवादा व्याख्याताः इति मर्यादास्थापनम् ।

03.9.24 सर्व एव विवादाः सामन्तप्रत्ययाः

03.9.25 विवीतस्थलकेदारषण्डखलवेश्मवाहनकोष्ठानां पूर्वम्पूर्वं आबाधं सहेत

03.9.26 ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जाः स्थलप्रदेशाः

03.9.27 आधारपरिवाहकेदार उपभोगैः परक्षेत्रकृष्टबीजहिंसायां यथा उपघातं मूल्यं दद्युः

03.9.28 केदारारामसेतुबन्धानां परस्परहिंसायां हिंसाद्विगुणो दण्डः

03.9.29 पश्चान्निविष्टं अधरतटाकं न उपरितटाकस्य केदारं उदकेनाप्लावयेत्

03.9.30 उपरिनिविष्टं नाधरतटाकस्य पूरास्रावं वारयेद्, अन्यत्र त्रिवर्ष उपरतकर्मणः

03.9.31 तस्यातिक्रमे पूर्वः साहसदण्डः, तटाकवामनं च

03.9.32 पञ्चवर्ष उपरतकर्मणः सेतुबन्धस्य स्वाम्यं लुप्येत, अन्यत्रापद्भ्यः

03.9.33 तटाकसेतुबन्धानां नवप्रवर्तने पाञ्चवर्षिकः परिहारः, भग्न उत्सृष्टानां चातुर्वर्षिकः, समुपारूढानां त्रैवर्षिकः, स्थलस्य द्वैवर्षिकः

03.9.34 स्वात्माधाने विक्रये च

03.9.35 खातप्रावृत्तिं अनदीनिबन्धायतनतटाककेदारारामषण्डवापानां सस्यवर्णभाग उत्तरिकं अन्येभ्यो वा यथा उपकारं दद्युः

03.9.36 प्रक्रयावक्रयाधिभागभोगनिषृष्ट उपभोक्तारश्च एषां प्रतिकुर्युः

03.9.37 अर्पतीकारे हीनद्विगुणो दण्डः

03.9.38ab सेतुभ्यो मुञ्चतः तोयं अवारे षट्पणो दमः ।

03.9.38chd वारे वा तोयं अन्येषां प्रमादेन उपरुन्धतः (इति)

Chapt | Damage to pastures, fields and roads

03.10.01 कर्म उदकमार्गं उचितं रुन्धतः कुर्वतोऽनुचितं वा पूर्वः साहसदण्डः, सेतुकूपपुण्यस्थानचैत्यदेवायतनानि च परभूमौ निवेशयतः

03.10.02 पूर्वानुवृत्तं धर्मसेतुं आधानं विक्रयं वा नयतो नाययतो वा मध्यमः साहसदण्डः, श्रोतृणां उत्तमः, अन्यत्र भग्न उत्सृष्टात्

03.10.03 स्वाम्यभावे ग्रामाः पुण्यशीला वा प्रतिकुर्युः

03.10.04 पथिप्रमाणं दुर्गनिवेशे व्याख्यातम्

03.10.05 क्षुद्रपशुमनुष्यपथं रुन्धतो द्वादशपणो दण्डः, महापशुपथं चतुर्विंशतिपणः, हस्तिक्षेत्रपथं चतुष्पञ्चाशत्पणः, सेतुवनपथं षट्शतः, श्मशानग्रामपथं द्विशतः, द्रोणमुखपथं पञ्चशतः, स्थानीयराष्ट्रविवीतपथं साहस्रः

03.10.06 अतिकर्षणे च एषां दण्डचतुर्था दण्डाः

03.10.07 कर्षणे पूर्व उक्ताः

03.10.08 क्षेत्रिकस्याक्षिपतः क्षेत्रं उपवासस्य वा त्यजतो बीजकाले द्वादशपणो दण्डः, अन्यत्र दोष उपनिपाताविषह्येभ्यः

03.10.09 करदाः करदेष्वाधानं विक्रयं वा कुर्युः, ब्रह्मदेयिका ब्रह्मदेयिकेषु

03.10.10 अन्यथा पूर्वः साहसदण्डः

03.10.11 करदस्य वाऽकरदग्रामं प्रविशतः

03.10.12 करदं तु प्रविशतः सर्वद्रव्येषु प्राकाम्यं स्यात्, अन्यत्रागारात्

03.10.13 तद् अप्यस्मै दद्यात्

03.10.14 अनादेयं अकृषतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात्

03.10.15 अकरदाः परत्र वसन्तो भोगं उपजीवेयुः

03.10.16 ग्रामार्थेन ग्रामिकं व्रजन्तं उपवासाः पर्यायेणानुगच्छेयुः

03.10.17 अननुगच्छन्तः पणार्धपणिकं योजनं दद्युः

03.10.18 ग्रामिकस्य ग्रामाद् अस्तेनपारदारिकं निरस्यतश्चतुर्विंशतिपणो दण्डः, ग्रामस्य उत्तमः

03.10.19 निरस्तस्य प्रवेशो ह्यभिगमेन व्याख्यातः

03.10.20 स्तम्भैः समन्ततो ग्रामाद् धनुःशतापकृष्टं उपसालं कारयेत्

03.10.21 पशुप्रचारार्थं विवीतं आलवनेन उपजीवेयुः

03.10.22 विवीतं भक्षयित्वाऽपसृतानां उष्ट्रमहिषाणां पादिकं रूपं गृह्णीयुः, गवाश्वखराणां चार्धपादिकं, क्षुद्रपशूनां षोडशभागिकम्

03.10.23 भक्षयित्वा निषण्णानां एत एव द्विगुणा दण्डाः, परिवसतां चतुर्गुणाः

03.10.24 ग्रामदेववृषा वाऽनिर्दशाह्ना वा धेनुरुक्षाणो गोवृषाश्चादण्ड्याः

03.10.25 सस्यभक्षणे सस्य उपघातं निष्पत्तितः परिसङ्ख्याय द्विगुणं दापयेत्

03.10.26 स्वामिनश्चानिवेद्य चारयतो द्वादशपणो दण्डः, प्रमुञ्चतश्चतुर्विंशतिपणः

03.10.27 पालिनां अर्धदण्डाः

03.10.28 तद् एव षण्डभक्षणे कुर्यात्

03.10.29 वाटभेदे द्विगुणः वेश्मखलवलयगतानां च धान्यानां भक्षणे

03.10.30 हिंसाप्रतीकारं कुर्यात्

03.10.31 अभयवनमृगाः परिगृहीता वा भक्षयन्तः स्वामिनो निवेद्य यथाऽवध्याः तथा प्रतिषेद्धव्याः

03.10.32 पशवो रश्मिप्रतोदाभ्यां वारयितव्याः

03.10.33 तेषां अन्यथा हिंसायां दण्डपारुष्यदण्डाः

03.10.34 प्रार्थयमाना दृष्टापराधा वा सर्व उपायैर्नियन्तव्याः इति क्षेत्रपथहिंसा ।

03.10.35 कर्षकस्य ग्रामं अभ्युपेत्याकुर्वतो ग्राम एवात्ययं हरेत्

03.10.36 कर्माकरणे कर्मवेतनद्विगुणं, हिरण्यादाने प्रत्यंशद्विगुणं, भक्ष्यपेयादाने च प्रहवणेषु द्विगुणं अंशं दद्यात्

03.10.37 प्रेक्षायां अनंशदः, स-स्वजनो न प्रेक्षेत

03.10.38 प्रच्छन्नश्रवण ईक्षणे च सर्वहिते च कर्मणि निग्रहेण द्विगुणं अंशं दद्यात्

03.10.39 सर्वहितं एकस्य ब्रुवतः कुर्युराज्ञाम्

03.10.40 अकरणे द्वादशपणो दण्डः

03.10.41 तं चेत् सम्भूय वा हन्युः पृथग् एषां अपराधद्विगुणो दण्डः

03.10.42 उपहन्तृषु विशिष्टः

03.10.43 ब्राह्मणश्च एषां ज्यैष्ठ्यं नियम्येत

03.10.44 प्रहवणेषु च एषां ब्राह्मणा नाकामाः कुर्युः, अंशं च लभेरन्

03.10.45 तेन देशजातिकुलसङ्घानां समयस्यानपाकर्म व्याख्यातम्

03.10.46ab राजा देशहितान् सेतून् कुर्वतां पथि सङ्क्रमान् ।
03.10.46chd ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत् (इति)

Chapt | Non-payment of debts

03.11.01 सपादपणा धर्म्या मासवृद्धिः पणशतस्य, पञ्चपणा व्यावहारिकी, दशपणा कान्तारगाणां, विंशतिपणा सामुद्राणाम्

03.11.02 ततः परं कर्तुः कारयितुश्च पूर्वः साहसदण्डः, श्रोतृणां एक एकं प्रत्यर्धदण्डः

03.11.03 राजन्ययोगक्षेमावहे तु धनिकधारणिकयोश्चरित्रं अवेक्षेत

03.11.04 धान्यवृद्धिः सस्यनिष्पत्तावुपार्धा, परं मूल्यकृता वर्धेत

03.11.05 प्रक्षेपवृद्धिरुदयाद् अर्धं सम्निधानसन्ना वार्षिकी देया

03.11.06 चिरप्रवासः स्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात्

03.11.07 अकृत्वा वृद्धिं साधयतो वर्धयतो वा, मूल्यं वा वृद्धिं आरोप्य श्रावयतो बन्धचतुर्गुणो दण्डः

03.11.08 तुच्छश्रावणायां अभूतचतुर्गुणः

03.11.09 तस्य त्रिभागं आदाता दद्यात्, शेषं प्रदाता

03.11.10 दीर्घसत्त्रव्याधिगुरुकुल उपरुद्धं बालं असारं वा नऋणं अनुवर्धेत

03.11.11 मुच्यमानं ऋणं अप्रतिगृह्णतो द्वादशपणो दण्डः

03.11.12 कारणापदेशेन निवृत्तवृद्धिकं अन्यत्र तिष्ठेत्

03.11.13 दशवर्ष उपेक्षितं ऋणं अप्रतिग्राह्यं, अन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः

03.11.14 प्रेतस्य पुत्राः कुसीदं दद्युः, दायादा वा रिक्थहराः, सहग्राहिणः, प्रतिभुवो वा

03.11.15 न प्रातिभाव्यं अन्यत्

03.11.16 असारं बालप्रातिभाव्यम्

03.11.17 असङ्ख्यातदेशकालं तु पुत्राः पौत्रा दायादा वा रिक्थं हरमाणा दद्युः

03.11.18 जीवितविवाहभूमिप्रातिभाव्यं असङ्ख्यातदेशकालं तु पुत्राः पौत्रा वा वहेयुः

03.11.19 नानाऋणसमवाये तु न एकं द्वौ युगपद् अभिवदेयातां, अन्यत्र प्रतिष्ठमानात्

03.11.20 तत्रापि गृहीतानुपूर्व्या राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत्

03.11.21 दम्पत्योः पितापुत्रयोः भ्रातृणां चाविभक्तानां परस्पर.कृतं ऋणं असाध्यम्

03.11.22 अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च

03.11.23 स्त्री चाप्रतिश्राविणी पतिकृतं ऋणं, अन्यत्र गोपालकार्धसीतिकेभ्यः

03.11.24 पतिः तु ग्राह्यः स्त्रीकृतं ऋणं, अप्रतिविधाय प्रोषित इति

03.11.25 सम्प्रतिपत्तावुत्तमः

03.11.26 अस्मप्रतिपत्तौ तु साक्षिणः प्रमाणं प्रात्ययिकाः शुचयोऽनुमता वा त्रयोऽवराध्र्याः

03.11.27 पक्षानुमतौ वा द्वौ, ऋणं प्रति न त्वेव एकः

03.11.28 प्रतिषिद्धाः स्यालसहायान्वर्थिधनिकधारणिकवैरिन्यङ्गधृतदण्डाः, पूर्वे चाव्यवहार्याः

03.11.29 राजश्रोत्रियग्रामभृतककुष्ठिव्रणिनः पतितचण्डालकुत्सितकर्माणोऽन्धबधिरमूकाहंवादिनः स्त्रीराजपुरुषाश्च, अन्यत्र स्ववर्गेभ्यः

03.11.30 पारुष्यस्तेयसङ्ग्रहणेषु तु वैरिस्यालसहायवर्जाः

03.11.31 रहस्यव्यवहारेष्वेका स्त्री पुरुष उपश्रोता उपद्रष्टा वा साक्षी स्याद् राजतापसवर्जम्

03.11.32 स्वामिनो भृत्यानां ऋत्विग्ऽअचार्याः शिष्याणां मातापितरौ पुत्राणां चानिग्रहेण साक्ष्यं कुर्युः, तेसां इतरे वा

03.11.33 परस्पराभियोगे च एषां उत्तमाः परा उक्ता दशबन्धं दद्युः, अवराः पञ्चबन्धम् इति साक्ष्य्ऽधिकारः ||

03.11.34 ब्राह्मण उदकुम्भाग्निसकाशे साक्षिणः परिगृह्णीयात्

03.11.35 तत्र ब्राह्मणं ब्रूयात् सत्यं ब्रूहि इति

03.11.36 राजन्यं वैश्यं वा मा तव इष्टापूर्तफलं, कपालहस्तः शत्रुकुलं भिक्षाऽर्थी गच्छेः इति

03.11.37 शूद्रं जन्ममरणान्तरे यद् वः पुण्यफलं तद् राजानं गच्छेद्, राज्ञश्च किल्बिषं युष्मान् अन्यथावादे, दण्डश्चानुबद्धः, पश्चाद् अपि ज्ञायेत यथादृष्टश्रुतं, एकमन्त्राः सत्यं उपहरत इति

03.11.38 अनुपहरतां सप्तरात्राद् ऊर्ध्वं द्वादशपणो दण्डः, त्रिपक्षाद् ऊर्ध्वं अभियोगं दद्युः

03.11.39 साक्षिभेदे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः, मध्यं वा गृह्णीयुः

03.11.40 तद् वा द्रव्यं राजा हरेत्

03.11.41 साक्षिणश्चेद् अभियोगाद् ऊनं ब्रूयुरतिरिक्तस्याभियोक्ता बन्धं दद्यात्

03.11.42 अतिरिक्तं वा ब्रूयुः तद्ऽतिरिक्तं राजा हरेत्

03.11.43 बालिश्याद् अभियोक्तुर्वा दुष्श्रुतं दुर्लिखितं प्रेताभिनिवेशं वा समीक्ष्य साक्षिप्रत्ययं एव स्यात्

03.11.44 साक्षिबालिष्येष्वेव पृथग्ऽनुयोगे देशकालकार्याणां पूर्वमध्यम उत्तमा दण्डाः इत्यौशनसाः

03.11.45 कूटसाक्षिणो यं अर्थं अभूतं कुर्युर्भूतं वा नाशयेयुः तद् दशगुणं दण्डं दद्युः इति मानवाः

03.11.46 बालिश्याद् वा विसंवादयतां चित्रो घातः इति बार्हस्पत्याः

03.11.47 न इति कौटिल्यः

03.11.48 ध्रुवं हि साक्षिभिः श्रोतव्यम्

03.11.49 अशृण्वतां चतुर्विंशतिपणो दण्डः, ततोऽर्धं अब्रुवाणानाम्

03.11.50ab देशकालाविदूरस्थान् साक्षिणः प्रतिपादयेत् ।

03.11.50chd दूरस्थान् अप्रसारान् वा स्वामिवाक्येन साधयेत् (इति)

Chapt | Deposits

03.12.01 उपनिधिरृणेन व्याख्यातः

03.12.02 परचक्राटविकाभ्यां दुर्गराष्ट्रविलोपे वा, प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे, चक्रयुक्तनाशे वा, ग्राममध्याग्न्य्.उदकाबाधे ज्वालावेग उपरुद्धे वा, नावि निमग्नायां मुषितायां वा स्वयं उपरूढो न उपनिधिं अभ्यावहेत्

03.12.03 उपनिधिभोक्ता देशकालानुरूपं भोगवेतनं दद्यात्, द्वादशपणं च दण्डम्

03.12.04 उपभोगनिमित्तं नष्टं विनष्टं वाऽभ्यावहेत्, चतुर्विंशतिपणश्च दण्डः, अन्यथा वा निष्पतने

03.12.05 प्रेतं व्यसनगतं वा न उपनिधिं अभ्यावहेत्

03.12.06 आधानविक्रयापव्ययनेषु चास्य चतुर्गुणपञ्चबन्धो दण्डः

03.12.07 परिवर्तने निष्पातने वा मूल्यसमः

03.12.08 तेनाधिप्रणाश उपभोगविक्रयाधानापहारा व्याख्याताः

03.12.09 नाधिः स-उपकारः सीदेत्, न चास्य मूल्यं वर्धेत, अन्यत्र निसर्गात्

03.12.10 निरुपकारः सीदेत्, मूल्यं चास्य वर्धेत

03.12.11 उपस्थितस्याधिं अप्रयच्छतो द्वादशण्पणो दण्डः

03.12.12 प्रयोजकासम्निधाने वा ग्रामवृद्धेषु स्थापयित्वा निष्क्रयं आधिं प्रतिपद्येत

03.12.13 निवृत्तवृद्धिको वाऽऽधिः तत्कालकृतमूल्यः तत्र एवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा

03.12.14 धारणिकासम्निधाने वा विनाशभयाद् उद्गतार्घं धर्मस्थानुज्ञातो विक्रीणीत, आधिपालप्रत्ययो वा

03.12.15 स्थावरः तु प्रयासभोग्यः फलभोग्यो वा प्रक्षेपवृद्धिमूल्यशुद्धं आजीवं अमूल्यक्षयेण उपनयेत्

03.12.16 अनिसृष्ट उपभोक्ता मूल्यशुद्धं आजीवं बन्धं च दद्यात्

03.12.17 शेषं उपनिधिना व्याख्यातम्

03.12.18 एतेनादेशोऽन्वाधिश्च व्याख्यातौ

03.12.19 सार्थेनान्वाधिहस्तो वा प्रदिष्टां भूमिं अप्राप्तश्चोरैर्भग्न उत्सृष्टो वा नान्वाधिं अभ्यावहेत्

03.12.20 अन्तरे वा मृतस्य दायादोऽपि नाभ्यावहेत्

03.12.21 शेषं उपनिधिना व्यकह्यातम्

03.12.22 याचितकं अवक्रीतकं वा यथाविधं गृह्णीयुः तथाविधं एवार्पयेयुः

03.12.23 श्रेष उपनिपाताभ्यां देशकाल उपरोधि दत्तं नष्टं विनष्टं वा नाभ्यावहेयुः

03.12.24 शेषं उपनिधिना व्याख्यातम्

03.12.25 वैयावृत्यविक्रयः तु - वैयावृत्यकरा यथादेशकालं विक्रीणानाः पण्यं यथाजातं मूल्यं उदयं च दद्युः

03.12.26 देशकालातिपातने वा परिहीणं सम्प्रदानकालिकेनार्घेण मूल्यं उदयं च दद्युः

03.12.27 यथासम्भाषितं वा विक्रीणाना न उदयं अधिगच्छेयुः, मूल्यं एव दद्युः

03.12.28 अर्घपतने वा परिहीणं यथापरिहीणं मूल्यं ऊनं दद्युः

03.12.29 सांव्यवहारिकेषु वा प्रात्ययिकेष्वराजवाच्येषु भ्रेष उपनिपाताभ्यां नष्टं विनष्टं वा मूल्यं अपि न दद्युः

03.12.30 देशकालान्तरितानां तु पण्यानां क्षयव्ययविशुद्धं मूल्यं उदयं च दद्युः, पण्यसमवायानां च प्रत्यंशम्

03.12.31 शेषं उपनिधिना व्याख्यातम्

03.12.32 एतेन वैयावृत्यविक्रयो व्याख्यातः

03.12.33 निक्षेपश्च उपनिधिना

03.12.34 तं अन्येन निक्षिप्तं अन्यस्यार्पयतो हीयेत

03.12.35 निक्षेपापहारे पूर्वापदानं निक्षेप्तारश्च प्रमाणम्

03.12.36 अशुचयो हि कारवः

03.12.37 न एषां करणपूर्वो निक्षेपधर्मः

03.12.38 करणहीनं निक्षेपं अपव्ययमानं गूढभित्तिन्यस्तान् साक्षिणो निक्षेप्ता रहसि प्रणिपातेन प्रज्ञापयेत्, वनान्ते वा मद्यप्रहवणविश्वासेन

03.12.39 रहसि वृद्धो व्याधितो वा वैदेहकः कश्चित् कृतलक्षणं द्रव्यं अस्य हस्ते निक्षिप्यापगच्छेत्

03.12.40 तस्य प्रतिदेशेन पुत्रो भ्राता वाऽभिगम्य निक्षेपं याचेत

03.12.41 दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात्

03.12.42 प्रव्रज्याऽभिमुखो वा श्रद्धेयः कश्चित् कृतलक्षणं द्रव्यं अस्य हस्ते निक्षिप्य प्रतिष्ठेत

03.12.43 ततः कालान्तरागतो याचेत

03.12.44 दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात्

03.12.45 कृतलक्षणेन वा द्रव्येण प्रत्यानयेद् एनम्

03.12.46 बालिशजातीयो वा रात्रौ राजदायिकाक्षणभीतः सारं अस्य हस्ते निक्षिप्यापगच्छेत्

03.12.47 स एनं बन्धनागारगतो याचेत

03.12.48 दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात्

03.12.49 अभिज्ञानेन चास्य गृहे जनं ऽभयं याचेत

03.12.50 अन्यतर्तादाने यथा ऽक्तं पुरस्तात्

03.12.51 द्रव्यभोगानां आगमं चास्यानुयुञ्जीत, तस्य चार्थस्य व्यवहार ऽपलिङ्गनं, अभियोक्तुश्चार्थसामर्थ्यम्

03.12.52 एतेन मिथःसमवायो व्याख्यातः

03.12.53ab तस्मात् साक्षिमद् अच्छन्नं कुर्यात् सम्यग्विभाषितम् ।

03.12.53chd स्वे परे वा जने कार्यं देशकालाग्रवर्णतः (इति)

Chapt | Law concerning slaves and labourers

03.13.01 ऽदरदासवर्जं आर्यप्राणं अप्राप्तव्यवहारं शूद्रं विक्रयाधानं नयतः स्वजनस्य द्वादशपणो दण्डः, वैश्यं द्विगुणः, क्षत्रियं त्रिगुणः, ब्राह्मणं चतुर्गुणः

03.13.02 परजनस्य पूर्वमध्यम ऽत्तमवधा दण्डाः, क्रेतृश्रोतृणां च

03.13.03 म्लेच्छानां अदोषः प्रजां विक्रेतुं आधातुं वा

03.13.04 न त्वेवार्यस्य दासभावः

03.13.05 अथवाऽऽर्यं आधाय कुलबन्धन आर्याणां आपदि, निष्क्रयं चाधिगम्य बालं साहाय्यदातारं वा पूर्वं निष्क्रीणीरन्

03.13.06 सकृद्ऽअत्माधाता निष्पतितः सीदेत्, द्विरन्येनाहितकः, सकृद् ऽभौ परविषयाभिमुखौ

03.13.07 वित्तापहारिणो वा दासस्यार्यभावं अपहरतोऽर्धदण्डः

03.13.08 निष्पतितप्रेतव्यसनिनां आधाता मूल्यं भजेत

03.13.09 प्रेतविण्मूत्र ऽच्छिष्टग्राहणं आहितस्य नग्नस्नापनं दण्डप्रेषणं अतिक्रमणं च स्त्रीणां मूल्यनाशकरं, धात्रीपरिचारिकार्धसीतिक ऽपचारिकाणां च मोक्षकरम्

03.13.10 सिद्धं ऽपचारकस्याभिप्रजातस्यापक्रमणम्

03.13.11 धात्रीं आहितिकां वाऽकामां स्ववशां गच्छतः पूर्वः साहसदण्डः, परवशां मध्यमः

03.13.12 कन्यां आहितिकां वा स्वयं अन्येन वा दुषयतो मूल्यनाशः शुल्कं तद्द्विगुणश्च दण्डः

03.13.13 आत्मविक्रयिणः प्रजां आर्यां विद्यात्

03.13.14 आत्माधिगतं स्वामिकर्माविरुद्धं लभेत, पित्र्यं च दायम्

03.13.15 मूल्येन चार्यत्वं गच्छेत्

03.13.16 तेन ऽदरदासाहितकौ व्याख्यातौ

03.13.17 प्रक्षेपानुरूपश्चास्य निष्क्रयः

03.13.18 दण्डप्रणीतः कर्मणा दण्डं ऽपनयेत्

03.13.19 आर्यप्राणो ध्वजाहृतः कर्मकालानुरूपेण मूल्यार्धेन वा विमुच्येत

03.13.20 गृहेजातदायागतलब्धक्रीतानां अन्यतमं दासं ऊनाष्टवर्षं विबन्धुं अकामं नीचे कर्मणि विदेशे दासीं वा सगर्भां अप्रतिविहितगर्भभर्मण्यां विक्रयाधानं नयतः पूर्वः साहसदण्डः, क्रेतृश्रोतृणां च

03.13.21 दासं अनुरूपेण निष्क्रयेणार्यं अकुर्वतो द्वादशपणो दण्डः, संरोधश्चाकरणात्

03.13.22 दासद्रव्यस्य ज्ञातयो दायादाः, तेषां अभावे स्वामी

03.13.23 स्वामिनः स्वस्यां दास्यां जातं समातृकं अदासं विद्यात्

03.13.24 गृह्या चेत् कुटुम्बार्थचिन्तनी माता भ्राता भगिनी चास्या अदासाः स्युः

03.13.25 दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्डः, अन्यत्र स्वयंवादिभ्यः इति दासकल्पः ।

03.13.26 कर्मकरस्य कर्मसम्बन्धं आसन्ना विद्युः

03.13.27 यथासम्भाषितं वेतनं लभेत, कर्मकालानुरूपं असम्भाषितवेतनः

03.13.28 कर्षकः सस्यानां गोपालकः सर्पिषां वैदेहकः पण्यानां आत्मना व्यवहृतानां दशभागं असम्भाषितवेतनो लभेत

03.13.29 सम्भाषितवेतनः तु यथासम्भाषितम्

03.13.30 कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिराशाकारिकवर्गः तु यथाऽन्यः तद्विधः कुर्याद् यथा वा कुशलाः कल्पयेयुः तथा वेतनं लभेत

03.13.31 साक्षिप्रत्ययं एव स्यात्

03.13.32 साक्षिणां अभावे यतः कर्म ततोऽनुयुञ्जीत

03.13.33 वेतनादाने दशबन्धो दण्डः, षट्पणो वा

03.13.34 अपव्ययमाने द्वादशपणो दण्डः, पञ्चबन्धो वा

03.13.35 नदीवेगज्वालास्तेनव्याल उपरुद्धः सर्वस्वपुत्रदारात्मदानेनार्तः त्रातारं आहूय निष्तीर्णः कुशलप्रदिष्टं वेतनं दद्यात्

03.13.36 तेन सर्वत्रार्तदानानुशया व्याख्याताः

03.13.37ab लभेत पुंश्चली भोगं सङ्गमस्य उपलिङ्गनात् ।

03.13.37chd अतियाच्ना तु जीयेत दौर्मत्याविनयेन वा (इति)

Chapt | Duties of servants Undertaking in partnership

03.14.01 गृहीत्वा वेतनं कर्माकुर्वतो भृतकस्य द्वादशपणो दण्डः, संरोधश्चाकरणात्

03.14.02 अशक्तः कुत्सिते कर्मणि व्याधौ व्यसने वाऽनुशयं लभेत, परेण वा कारयितुम्

03.14.03 तस्यव्ययकर्मणा लभेत भर्ता वा कारयितुम्

03.14.04 नान्यः त्वया कारयितव्यो, मया वा नान्यस्य कर्तव्यम् इत्यवरोधे भर्तुरकारयतो भृतकस्याकुर्वतो वा द्वादशपणो दण्डः

03.14.05 कर्मनिष्ठापने भर्तुरन्यत्र गृहीतवेतनो नासकामः कुर्यात्

03.14.06 उपस्थितं अकारयतः कृतं एव विद्याद् इत्याचार्याः

03.14.07 न इति कौटिल्यः

03.14.08 कृतस्य वेतनं नाकृतस्यास्ति

03.14.09 स चेद् अल्पं अपि कारयित्वा न कारयेत् कृतं एवास्य विद्यात्

03.14.10 देशकालातिपातनेन कर्मणां अन्यथाकरणे वा नासकामः कृतं अनुमन्येत

03.14.11 सम्भाषिताद् अधिकक्रियायां प्रयासं न मोघं कुर्यात्

03.14.12 तेन सङ्घभृता व्याख्याताः

03.14.13 तेषां आधिः सप्तरात्रं आसीत

03.14.14 ततोऽन्यं उपस्थापयेत्, कर्मनिष्पाकं च

03.14.15 न चानिवेद्य भर्तुः सङ्घः कञ्चित् परिहरेद् उपनयेद् वा

03.14.16 तस्यातिक्रमे चतुर्विंशतिपणो दण्डः

03.14.17 सङ्घेन परिहृतस्यार्धदण्डः इति भृतकाधिकारः ||

03.14.18 सङ्घभृताः सम्भूयसमुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन्

03.14.19 कर्षणवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः

03.14.20 पुरुष उपस्थाने समग्रं अंशं दद्युः

03.14.21 संसिद्धे तु उद्धृतपण्ये सन्नस्य तदानीं एव प्रत्यंशं दद्युः

03.14.22 सामान्या हि पथिसिद्धिश्चासिद्धिश्च

03.14.23 प्रक्रान्ते तु कर्मणि स्वस्थस्यापक्रामतो द्वादशपणो दण्डः

03.14.24 न च प्राकाम्यं अपक्रमणे

03.14.25 चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेद्, दद्यात् प्रत्यंशं अभयं च

03.14.26 पुनःस्तेये प्रवासनं, अन्यत्रगमने च

03.14.27 महाऽपराधे तु दूष्यवद् आचरेत्

03.14.28 याजकाः स्वाप्रचारद्रव्यवर्जं यथासम्भाषितं वेतनं समं वा विभजेरन्

03.14.29 अग्निष्टोमादिषु च क्रतुषु दीक्षणाद् ऊर्ध्वं तृतीयं अंशं, मध्यम उपसद ऊर्ध्वं अर्धं अंशं, सुत्ये प्रातःसवनाद् ऊर्ध्वं पाद ऊनं अंशम्

03.14.30 माध्यन्दिनात् सवनाद् ऊर्ध्वं समग्रं अंशं लभेत

03.14.31 नीता हि दक्षिणा भवन्ति

03.14.32 बृहस्पतिसववर्जं प्रतिसवनं हि दक्षिणा दीयन्ते

03.14.33 तेनाहर्गणदक्षिणा व्याख्याताः

03.14.34 सनानां आदशाहोरात्रात्शेषभृताः कर्म कुर्युः, अन्ये वा स्वप्रत्ययाः

03.14.35 कर्मण्यसमाप्ते तु यजमानः सीदेद्, ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः

03.14.36 असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वः साहसदण्डः

03.14.37ab अनाहिताग्निः शतगुरुयज्वा च सहस्रगुः ।

03.14.37chd सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः

03.14.38ab असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।

03.14.38chd अदोषः त्यक्तुं अन्योन्यं कर्मसङ्करनिश्चयात् (इति)

Chapt | Rescission of sale and purchase

03.15.01 विक्रीय पण्यं अप्रयच्छतो द्वादशपणो दण्डः, अन्यत्र दोष उपनिपातविषह्येभ्यः

03.15.02 पण्यदोषो दोषः

03.15.03 राजचोराग्न्य्.उदकबाध उपनिपातः

03.15.04 बहुगुणहीनं आर्तकृतं वाऽविषह्यम्

03.15.05 वैदेहकानां एकरात्रं अनुशयः, कर्षकाणां त्रिरात्रं, गोरक्षकाणां पञ्चरात्रम्

03.15.06 व्यामिश्राणां उत्तमानां च वर्णानां वृत्तिविक्रये सप्तरात्रम्

03.15.07 आतिपातिकानां पण्यानां अन्यत्राविक्रेयम् इत्यवरोधेनानुशयो देयः

03.15.08 तस्यातिक्रमे चतुर्विंशतिपणो दण्डः, पण्यदशभागो वा

03.15.09 क्रीत्वा पण्यं अप्रतिगृह्णतो द्वादशपणो दण्डः, अन्यत्र दोष उपनिपातविषह्येभ्यः

03.15.10 समानश्चानुशयो विक्रेतुरनुशयेन

03.15.11 विवाहानां तु त्रयाणां पूर्वेषां वर्णानां पाणिग्रहणात् सिद्धं उपावर्तनं, शूद्राणां च प्रकर्मणः

03.15.12 वृत्तपाणिग्रहणयोरपि दोषं औपशायिकं दृष्ट्वा सिद्धं उपावर्तनम्

03.15.13 न त्वेवाभिप्रजातयोः

03.15.14 कन्यादोषं औपशायिकं अनाख्याय प्रयच्छतः कन्यां षण्ँअवतिर्दण्डः, शुल्कस्त्रीधनप्रतिदानं च

03.15.15 वरयितुर्वा वरदोषं अनाख्याय विन्दतो द्विगुणः, शुल्कस्त्रीधननाशश्च

03.15.16 द्विपदचतुष्पदानां तु कुण्ठव्याधिताशुचीनां उत्साहस्वास्थ्यशुचीनां आख्याने द्वादशपणो दण्डः

03.15.17 आत्रिपक्षाद् इति चतुष्पदानां उपावर्तनं, आसंवत्सराद् इति मनुष्याणाम्

03.15.18 तावता हि कालेन शक्यं शौचाशौचे ज्ञातुम्

03.15.19ab दाता प्रतिग्रहीता च स्यातां न उपहतौ यथा ।

03.15.19chd दाने क्रये वाऽनुशयं तथा कुर्युः सभासदः (इति)

Chapt | Non-conveyance of gifts
sale without ownership
Relation of ownership

03.16.01 दत्तस्याप्रदानं ऋणादानेन व्याख्यातम्

03.16.02 दत्तं अव्यवहार्यं एकत्रानुशये वर्तेत

03.16.03 सर्वस्वं पुत्रदारं आत्मानं वा प्रदायानुशयिनः प्रयच्छेत्

03.16.04 धर्मदानं असाधुषु कर्मसु चाउपघातिकेषु वा, अर्थदानं अनुपकारिष्वपकारिषु वा, कामदानं अनर्हेषु च

03.16.05 यथा च दाता प्रतिग्रहीता च न उपहतौ स्यातां तथाऽनुशयं कुशलाः कल्पयेयुः

03.16.06 दण्डभयाद् आक्रोशभयाद् अनर्थभयाद् वा भयदानं प्रतिगृह्णतः स्तेयदण्डः, प्रयच्छतश्च

03.16.07 रोषदानं परहिंसायां, राज्ञां उपरि दर्पदानं च

03.16.08 तत्र उत्तमो दण्डः

03.16.09 प्रातिभाव्यं दण्डशुल्कशेषं आक्षिकं सौरिकं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् इति दत्तस्यानपाकर्म ।

03.16.10 अस्वामिविक्रयः तु - नष्टापहृतं आसाद्य स्वामी धर्मस्थेन ग्राहयेत्

03.16.11 देशकालातिपत्तौ वा स्वयं गृहीत्वा उपहरेत्

03.16.12 धर्मस्थश्च स्वामिनं अनुयुञ्जीत कुतः ते लब्धम् इति

03.16.13 स चेद् आचारक्रमं दर्शयेत, न विक्रेतारं, तस्य द्रव्यस्यातिसर्गेण मुच्येत

03.16.14 विक्रेता चेद् दृश्येत, मूल्यं स्तेयदण्डं च दद्यात्

03.16.15 स चेद् अपसारं अधिगच्छेद् अपसरेद् आऽपसारक्षयात्

03.16.16 क्षये मूल्यं स्तेयदण्डं च दद्यात्

03.16.17 नाष्टिकश्च स्वकरणं कृत्वा नष्टप्रत्याहृतं लभेत

03.16.18 स्वकरणाभावे पञ्चबन्धो दण्डः

03.16.19 तच्च द्रव्यं राजधर्म्यं स्यात्

03.16.20 नष्टापहृतं अनिवेद्य उत्कर्षतः स्वामिनः पूर्वः साहसदण्डः

03.16.21 शुल्कस्थाने नष्टापहृत उत्पन्नं तिष्ठेत्

03.16.22 त्रिपक्षाद् ऊर्ध्वं अनभिसारं राजा हरेत्, स्वामी वा स्वकरणेन

03.16.23 पञ्चपणिकं द्विपदरूपस्य निष्क्रयं दद्यात्, चतुष्पणिकं एकखुरस्य, द्विपणिकं गोमहिषस्य, पादिकं क्षुद्रपशूनाम्

03.16.24 रत्नसारफल्गुकुप्यानां पञ्चकं शतं दद्यात्

03.16.25 परचक्राटवीहृतं तु प्रत्यानीय राजा यथास्वं प्रयच्छेत्

03.16.26 चोरहृतं अविद्यमानं स्वद्रव्येभ्यः प्रयच्छेत्, प्रत्यानेतुं अशक्तो वा

03.16.27 स्वयङ्ग्राहेणाहृतं प्रत्यानीय तन्निष्क्रयं वा प्रयच्छेत्

03.16.28 परविषयाद् वा विक्रमेणानीतं यथाप्रदिष्टं राज्ञा भुञ्जीत, अन्यत्रार्यप्राणेभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्च इत्यस्वामिविक्रयः ।

03.16.29 स्वस्वामिसम्बन्धः तु - भोगानुवृत्तिरुच्छिन्नदेशानां यथास्वं द्रव्याणाम्

03.16.30 यत् स्वं द्रव्यं अन्यैर्भुज्यमानं दश वर्षाण्युपेक्षेत, हीयेतास्य, अन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः

03.16.31 विंशतिवर्ष उपेक्षितं अनवसितं वास्तु नानुयुञ्जीत

03.16.32 ज्ञातयः श्रोत्रियाः पाषण्डा वा राज्ञां असंनिधौ परवास्तुषु विवसन्तो न भोगेन हरेयुः, उपनिधिं आधिं निधिं निक्षेपं स्त्रियं सीमानं राजश्रोत्रियद्रव्याणि च

03.16.33 आश्रमिणः पाषण्डा वा महत्यवकाशे परस्परं अबाधमाना वसेयुः

03.16.34 अल्पां बाधां सहेरन्

03.16.35 पूर्वागतो वा वासपर्यायं दद्यात्

03.16.36 अप्रदाता निरस्येत

03.16.37 वानप्रस्थयतिब्रह्मचारिणां आचार्यशिष्यधर्मभ्रातृसमानतीर्थ्या रिक्थभाजः क्रमेण

03.16.38 विवादपदेषु च एषां यावन्तः पणा दण्डाः तावती रात्रीः क्षपणाभिषेकाग्निकार्यमहाकच्छवर्धनानि राज्ञश्चरेयुः

03.16.39 अहिरण्यसुवर्णाः पाषढाः साधवः

03.16.40 ते यथास्वं उपवासव्रतैराराधयेयुः, अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणेभ्यः

03.16.41 तेषु यथा उक्ता दण्डाः कार्याः

03.16.42ab प्रव्रज्यासु वृथाऽऽचारान् राजा दण्डेन वारयेत् ।

03.16.42chd धर्मो ह्यधर्म उपहतः शास्तारं हन्त्युपेक्षितः (इति)

Chapt | Forcible seizure

03.17.01 साहसं अन्वयवत् प्रसभकर्म

03.17.02 निरन्वये स्तेयं, अपव्ययने च

03.17.03 रत्नसारफल्गुकुप्यानां साहसे मूल्यसमो दण्डः इति मानवाः

03.17.04 मूल्यद्विगुणः इत्यौशनसाः

03.17.05 यथाऽपराध इति कौटिल्यः

03.17.06 पुष्पफलशाकमूलकन्दपक्वान्नचर्मवेणुमृद्भाण्डादीनां क्षुद्रकद्रव्याणां द्वाद्शपणावरश्चतुर्विंशतिपणपरो दण्डः

03.17.07 कालायसकाष्ठरज्जुद्रव्यक्षुद्रपशुपटादीनां स्थूलकद्रव्याणां चतुर्विंशतिपणावरोऽष्टचत्वारिंशत्पणपरो दण्डः

03.17.08 ताम्रवृत्तकंसकाचदन्तभाण्डादीनां स्थूलकद्रव्याणां अष्टचत्वारिंशत्पणावरः षण्ँअवतिपरः पूर्वः साहसदण्डः

03.17.09 महापशुमनुष्यक्षेत्रगृहहिरण्यसुवर्णसूक्ष्मवस्त्रादीनां स्थूलकद्रव्याणां द्विशतावरः पञ्चशतपरो मध्यमः साहसदण्डः

03.17.10 स्त्रियं पुरुषं वाऽभिषह्य बध्नतो बन्धयतो बन्धं वा मोक्षयतः पञ्चशतावरः सहस्रपर उत्तमः साहसदण्डः इत्याचार्याः ।।

03.17.11 यः साहसं प्रतिपत्ता इति कारयति स द्विगुणं दद्यात्

03.17.12 यावद् ह्रिरण्यं उपयोक्ष्यते तावद् दास्यामि इति स चतुर्गुणं दण्डं दद्यात्

03.17.13 यः एतावद् हिरण्यं दास्यामि इति प्रमाणं उद्दिश्य कारयति स यथा उक्तं हिरण्यं दण्डं च दद्यात् इति बार्हस्पत्याः

03.17.14 स चेत् कोपं मदं मोहं वाऽपदिशेद् यथा उक्तवद् दण्डं एनं कुर्याद् इति कौटिल्यः

03.17.15ab दण्डकर्मसु सर्वेषु रूपं अष्टपणं शतम् ।

03.17.15chd शतात् परेषु व्याजीं च विद्यात् पञ्चपणं शतम्

03.17.16ab प्रजानां दोषबाहुल्याद् राज्ञां वा भावदोषतः ।

03.17.16chd रूपव्याज्यावधर्मिष्ठे धर्म्या तु प्रकृतिः स्मृता (इति)

Chapt | Verbal iJNjurय्

03.18.01 वाक्पारुष्यं उपवादः कुत्सनं अभिभर्त्सनं इति

03.18.02 शरीरप्रकृतिश्रुतवृत्तिजनपदानां शरीर उपवादे काणखञ्जादिभिः सत्ये त्रिपणो दण्डः, मिथ्या उपवादे षट्पणो दण्डः

03.18.03 शोभनाक्षिमन्तः इति काणखञ्जादीनां स्तुतिनिन्दायां द्वादशपणो दण्डः

03.18.04 कुष्ठ उन्मादक्लैब्यादिभिः कुत्सायां च सत्यमिथ्यास्तुतिनिन्दासु द्वादशपण उत्तरा दण्डाः तुल्येषु

03.18.05 विशिष्टेषु द्विगुणाः, हीनेष्वर्धदण्डाः, परस्त्रीषु द्विगुणाः, प्रमादमदमोहादिभिरर्धदण्डाः

03.18.06 कुष्ठ उन्मादयोश्चिकित्सकाः संनिकृष्टा पुमांसश्च प्रमाणं, क्लीबभावे स्त्रियो मूत्रफेनोऽप्सु विष्ठानिमज्जनं च

03.18.07 प्रकृत्य्.उपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनां अपरेण पूर्वस्य त्रिपण उत्तरा दण्डाः, पूर्वेणापरस्य द्विपणाधराः, कुब्राह्मणादिभिश्च कुत्सायाम्

03.18.08 तेन श्रुत उपवादो वाग्जीवनानां, कारुकुशीलवानां वृत्त्य्.उपवादः, प्राज्जूणकगान्धारादीनां च जनपद उपवादा व्याख्याताः

03.18.09 यः परं एवं त्वां करिष्यामि इति करणेनाभिभर्त्सयेद्, अकरणे यः तस्य करणे दण्डः ततोऽर्धदण्डं दद्यात्

03.18.10 अशक्तः कोपं मदं मोहं वाऽपदिशेद् द्वादशपणं दण्डं दद्यात्

03.18.11 जातवैराशयः शक्तश्चापकर्तुं यावज्जीविकावस्थं दद्यात्

03.18.12ab स्वदेशग्रामयोः पूर्वं मध्यमं जातिसङ्घयोः ।

03.18.12chd आक्रोशाद् देवचैत्यानां उत्तमं दण्डं अर्हति (इति)

Chapt | Physical iJNjurय्

03.19.01 दण्डपारुष्यं स्पर्शनं अवगूर्णं प्रहतं इति

03.19.02 नाभेरधःकायं हस्तपङ्कभस्मपांसुभिरिति स्पृशतः त्रिपणो दण्डः, तैरेवामेध्यैः पादष्ठीविकाभ्यां च षट्पणः, छर्दिमूत्रपुरीषादिभिर्द्वादशपणः

03.19.03 नाभेरुपरि द्विगुणाः, शिरसि चतुर्गुणाः समेषु

03.19.04 विशिष्टेषु द्विगुणाः, हीनेष्वर्धदण्डाः, परस्त्रीषु द्विगुणाः, प्रमादमदमोहादिभिरर्धदण्डाः

03.19.05 पादवस्त्रहस्तकेशावलम्बनेषु षट्पण उत्तरा दण्डाः

03.19.06 पीडनावेष्टनाञ्चनप्रकर्षणाध्यासनेषु पूर्वः साहसदण्डः

03.19.07 पातयित्वाऽपक्रामतोऽर्धदण्डः

03.19.08 शूद्रो येनाङ्गेन ब्राह्मणं अभिहन्यात् तद् अस्यच्छेदयेत्

03.19.09 अवगूर्णे निष्क्रयः, स्पर्शेऽर्धदण्डः

03.19.10 तेन चण्डालाशुचयो व्याख्यातः

03.19.11 हस्तेनावगूर्णे त्रिपणावरो द्वादशपणपरो दण्डः, पादेन द्विगुणः, दुःख उत्पादनेन द्रव्येण पूर्वः साहसदण्डः, प्राणाबाधिकेन मध्यमः

03.19.12 काष्ठलोष्टपाषाणलोहदण्डरज्जुद्रव्याणां अन्यतमेन दुःखं अशोणितं उत्पादयतश्चतुर्विंशतिपणो दण्डः, शोणित उत्पादने द्विगुणः, अन्यत्र दुष्टशोणितात्

03.19.13 मृतकल्पं अशोणितं घ्नतो हस्तपादपारञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः, पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे च्च, अन्यत्र दुष्टव्रणेभ्यः

03.19.14 सक्थिग्रीवाभञ्जने नेत्रभेदने वा वाक्यचेष्टाभोजन उपरोधेषु च मध्यमः साहसदण्डः समुत्थानव्ययश्च

03.19.15 विपत्तौ कण्टकशोधनाय नीयेत

03.19.16 महाजनस्य एकं घ्नतः प्रत्येकं द्विगुणो दण्डः

03.19.17 पर्युषितः कलहोऽनुप्रवेशो वा नाभियोज्यः इत्याचार्याः

03.19.18 नास्त्यपकारिणो मोक्ष इति कौटिल्यः

03.19.19 कलहे पूर्वागतो जयति, अक्षममाणो हि प्रधावति इत्याचार्याः

03.19.20 न इति कौटिल्यः

03.19.21 पूर्वं पश्चाद् वाऽभिगतस्य साक्षिणः प्रमाणं, असाक्षिके घातः कलह उपलिङ्गनं वा

03.19.22 घाताभियोगं अप्रतिब्रुवतः तद् अहरेव पश्चात्कारः

03.19.23 कलहे द्रव्यं अपहरतो दशपणो दण्डः, क्षुद्रकद्रव्यहिंसायां तच्च तावच्च दण्डः, स्थूलकद्रव्यहिंसायां तच्च द्विगुणश्च दण्डः, वस्त्राभरणहिरण्यसुवर्णभाण्डहिंसायां तच्च पूर्वश्च साहसदण्डः

03.19.24 परकुड्यं अभिघातेन क्षोभयतः त्रिपणो दण्डः, छेदनभेदने षट्पणः, प्रतीकारश्च

03.19.25 दुःख उत्पादनं द्रव्यं अन्यवेश्मनि प्रक्षिपतो द्वादशपणो दण्डः, प्राणाबाधिकं पूर्वः साहसदण्डः

03.19.26 क्षुद्रपशूनां काष्ठादिभिर्दुःख उत्पादने पणो द्विगुणो वा दण्डः, शोणित उत्पादने द्विगुणः

03.19.27 महापशूनां एतेष्वेव स्थानेष्विद्विगुणो दण्डः समुत्थानव्ययश्च

03.19.28 पुर उपवनवनस्पतीनां पुष्पफलच्छायावतां प्ररोहच्छेदने षट्पणः, क्षुद्रशाखाच्छेदने द्वादशपणः, पीनशाखाच्च्छेदने चतुर्विंशतिपणः, स्कन्धवधे पूर्वः साहसदण्डः, समुच्छित्तौ मध्यमः

03.19.29 पुष्पफलच्छायावद्गुल्मलतास्वर्धदण्डाः, पुण्यस्थानतपोवनश्मशानद्रुमेषु च

03.19.30ab सीमवृक्षेषु चैत्येषु द्रुमेष्वालक्षितेषु च ।

03.19.30chd त एव द्विगुणा दण्डाः कार्या राजवनेषु च (इति)

Chapt | Gambling and betting Mischellaneous

03.20.01 द्यूताध्यक्षो द्यूतं एकमुखं कारयेत्

03.20.02 अन्यत्र दीव्यतो द्वादशपणो दण्डो गूढाजीविज्ञापनार्थम्

03.20.03 द्यूताभियोगे जेतुः पूर्वः साहसदण्डः, पराजितस्य मध्यमः

03.20.04 बालिशजातीयो ह्येष जेतुकामः पराजयं न क्षमते इत्याचार्याः

03.20.05 न इत्यौकौटिल्यः

03.20.06 पराजितश्चेद् द्विगुणदण्डः क्रियेत न कश्चन राजानं अभिसरिष्यति

03.20.07 प्रायशो हि कितवाः कूटदेविनः

03.20.08 तेषां अध्यक्षाः शुद्धाः काकणीरक्षांश्च स्थापयेयुः

03.20.09 काकण्यऽक्षाणां अन्य उपधाने द्वादशपणो दण्डः, कूटकर्मणि पूर्वः साहसदण्डो जितप्रत्यादानं, उपधौ स्तेयदण्डश्च

03.20.10 जितद्रव्याद् अध्यक्षः पञ्चकं शतं आददीत, काकण्यऽक्षारालाशलाकाऽवक्रयं उदकभूमिकर्मक्रयं च

03.20.11 द्रव्याणां आधानं विक्रयं च कुर्यात्

03.20.12 अक्षभूमिहस्तदोषाणां चाप्रतिषेधने द्विगुणो दण्डः

03.20.13 तेन समाह्वयो व्याख्यातः, अन्यत्र विद्याशिल्पसमाह्वयात् । इति

03.20.14 प्रकीर्णकं तु - याचितकावक्रीतकाहितकनिक्षेपकाणां यथादेशकालं अदाने, यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने, गुल्मतरदेयं ब्राह्मणं साधयतः, प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च द्वादशपणो दण्डः

03.20.15 सन्दिष्टं अर्थं अप्रयच्छतो, भ्रातृभार्यां हस्तेन लङ्घयतो, रूपाजीवां अन्य उपरुद्धां गच्छतः, परवक्तव्यं पण्यं क्रीणानस्य, समुद्रं गृहं उद्भिन्दतः, सामन्तचत्वारिंशत्कुल्याबाधां आचरतश्चाष्टचत्वारिंशत्पणो दण्डः

03.20.16 कुलनीवीग्राहकस्यापव्ययने, विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यां स्पृशतः, प्रत्यासन्नं आपद्यनभिधावतो, निष्कारणं अभिधावनं कुर्वतः, शाक्याजीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः

03.20.17 शपथवाक्यानुयोगं अनिषृष्टं कुर्वतः, युक्तकर्म चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्व उपघातिनः, दास्या गर्भं औषधेन पातयतश्च पूर्वः साहसदण्डः

03.20.18 पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभगिनेययोः शिष्याचार्ययोर्वा परस्परं अपतितं त्यजतः, सार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः, कान्तारे मध्यमः, तन्निमित्तं भ्रेषयत उत्तमः, सहप्रस्थायिष्वन्येष्वर्धदण्डाः

03.20.19 पुरुषं अबन्धनीयं बध्नतो बन्धयतो बन्धं वा मोक्षयतो, बालं अप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रं दण्डः

03.20.20 पुरुषापराधविशेषेण दण्डविशेषः कार्यः

03.20.21 तीर्थकरः तपस्वी व्याधितः क्षुत्पिपासाऽध्वक्लान्तः तिरोजनपदो दण्डखेदी निष्किञ्चनश्चानुग्राह्याः

03.20.22 देवब्राह्मणतपस्विस्त्रीबालवृद्धव्याधितानां अनाथानां अनभिसरतां धर्मस्थाः कार्याणि कुर्युः, न च देशकालभोगच्छलेनातिहरेयुः

03.20.23 पूज्या विद्याबुद्धिपौरुषाभिजनकर्मातिशयतश्च पुरुषाः

03.20.24ab एवं कार्याणि धर्मस्थाः कुर्युरच्छलदर्शिनः ।

03.20.24chd समाः सर्वेषु भावेषु विश्वास्या लोकसम्प्रियाः (इति)

Book | suppression of criminals
Chapt | keeping a watch over artisans

04.1.01 प्रदेष्टारः त्रयः त्रयोऽमात्याः कण्टकशोधनं कुर्युः

04.1.02 अर्थ्यप्रतीकाराः कारुशासितारः संनिक्षेसारः स्ववित्तकारवः श्रेणीप्रमाणा निक्षेपं गृह्णीयुः

04.1.03 विपत्तौ श्रेणी निक्षेपं भजेत

04.1.04 निर्दिष्टदेशकालकार्यं च कर्म कुर्युः, अनिर्दिष्टदेशकालं कार्यापदेशम्

04.1.05 कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः

04.1.06 अन्यत्र भ्रेष उपनिपाताभ्यां नष्टं विनष्टं वाऽभ्यावहेयुः

04.1.07 कार्यस्यान्यथाकरणे वेतननाशः तद्द्विगुणश्च दण्डः

04.1.08 तन्तुवाया दश एकादशिकं सूत्रं वर्धयेयुः

04.1.09 वृद्धिच्छेदे छेदद्विगुणो दण्डः

04.1.10 सूत्रमूल्यं वानवेतनं, क्षौमकौशेयानां अध्यर्धगुणं, पत्त्र ऊर्णाकम्बलदुकूलानां द्विगुणम्

04.1.11 मानहीने हीनावहीनं वेतनं तद्द्विगुणश्च दण्डः, तुलाहीने हीनचतुर्गुणो दण्डः, सूत्रपरिवर्तने मूल्यद्विगुणः

04.1.12 तेन द्विपटवानं व्याख्यातम्

04.1.13 ऊर्णातुलायाः पञ्चपलिको विहननच्छेदो रोमच्छेदश्च

04.1.14 रजकाः काष्ठफलकश्लक्ष्णशिलासु वस्त्राणि नेनिज्युः

04.1.15 अन्यत्र नेनिजतो वस्त्र उपघातं षट्पणं च दण्डं दद्युः

04.1.16 मुद्गराङ्काद् अन्यद् वासः परिदधानाः त्रिपणं दण्डं दद्युः

04.1.17 परवस्त्रविक्रयावक्रयाधानेषु च द्वादशपणो दण्डः, परिवर्तने मूल्यद्विगुणो वस्त्रदानं च

04.1.18 मुकुलावदातं शिलापट्टशुद्धं धौतसूत्रवर्णं प्रमृष्टश्वेतं च एकरात्र उत्तरं दद्युः

04.1.19 पञ्चरात्रिकं तनुरागं, षड्रात्रिकं नीलं, पुष्पलाक्षामञ्जिष्ठारक्तं गुरुपरिकर्म यत्र उपचार्यं जात्यं वासः सप्तरात्रिकम्

04.1.20 ततः परं वेतनहानिं प्राप्नुयुः

04.1.21 श्रद्धेया रागविवादेषु वेतनं कुशलाः कल्पयेयुः

04.1.22 पराध्र्यानां पणो वेतनं, मध्यमानां अर्धपणः, प्रत्यवराणां पादः, स्थूलकानां माषकद्विमाषकं, द्विगुणं रक्तकानाम्

04.1.23 प्रथमनेजने चतुर्भागः क्षयः, द्वितीये पञ्चभागः

04.1.24 तेन उत्तरं व्याख्यातम्

04.1.25 रजकैः तुन्नवाया व्याख्याताः

04.1.26 सुवर्णकाराणां अशुचिहस्ताद् रूप्यं सुवर्णं अनाख्याय सरूपं क्रीणतां द्वादशपणो दण्डः, विरूपं चतुर्विंशतिपणः, चोरहस्ताद् अष्टचत्वारिंशत्पणः

04.1.27 प्रच्छन्नविरूपमूल्यहीनक्रयेषु स्तेयदण्डः, कृतभाण्ड उपधौ च

04.1.28 सुवर्णान् माषकं अपहरतो द्विशतो दण्डः, रूप्यधरणान् माषकं अपहरतो द्वादशपणः

04.1.29 तेन उत्तरं व्याख्यातम्

04.1.30 वर्ण उत्कर्षं अपसारणं योगं वा साधयतः पञ्चशतो दण्डः

04.1.31 तयोरपचरणे रागस्यापहारं विद्यात्

04.1.32 माषको वेतनं रूप्यधरणस्य, सुवर्णस्याष्टभागः

04.1.33 शिक्षाविशेषेण द्विगुणो वेतनवृद्धिः

04.1.34 तेन उत्तरं व्याख्यातम्

04.1.35 ताम्रवृत्तकंसवैकृन्तकारकूटकानां पञ्चकं शतं वेतनम्

04.1.36 ताम्रपिण्डो दशभागक्षयः

04.1.37 पलहीने हीनद्विगुणो दण्डः

04.1.38 तेन उत्तरं व्याख्यातम्

04.1.39 सीसत्रपुपिण्डो विंशतिभागक्षयः

04.1.40 काकणी चास्य पलवेतनम्

04.1.41 कालायसपिण्डः पञ्चभागक्षयः

04.1.42 काकणीद्वयं चास्य पलवेतनम्

04.1.43 तेन उत्तरं व्याख्यातम्

04.1.44 रूपदर्शकस्य स्थितां पणयात्रां अकोप्यां कोपयतः कोप्यां अकोपयतो द्वादशपणो दण्डः

04.1.45 व्याजीपरिशुद्धौ पणयात्रा

04.1.46 पणान् माषकं उपजीवतो द्वादशपणो दण्डः

04.1.47 तेन उत्तरं व्याख्यातम्

04.1.48 कूटरूपं कारयतः प्रतिगृह्णतो निर्यापयतो वा सहस्रं दण्डः, कोशे प्रक्षिपतो वधः

04.1.49 चरकपांसुधावकाः सारत्रिभागं, द्वौ राजा रत्नं च

04.1.50 रत्नापहार उत्तमो दण्डः

04.1.51 खनिरत्ननिधिनिवेदनेषु षष्ठं अंशं निवेत्ता लभेत, द्वादशं अंशं भृतकः

04.1.52 शतसहस्राद् ऊर्ध्वं राजगामी निधिः

04.1.53 ऊने षष्ठं अंशं दद्यात्

04.1.54 पौर्वपौरुषिकं निधिं जानपदः शुचिः स्वकरणेन समग्रं लभेत

04.1.55 स्वकरणाभावे पञ्चशतो दण्डः, प्रच्छन्नादाने सहस्रम्

04.1.56 भिषजः प्राणाबाधिकं अनाख्याय उपक्रममाणस्य विपत्तौ पूर्वः साहसदण्डः, कर्मापराधेन विपत्तौ मध्यमः

04.1.57 मर्मवधवैगुण्यकरणे दण्डपारुष्यं विद्यात्

04.1.58 कुशीलवा वर्षारात्रं एकस्था वसेयुः

04.1.59 कामदानं अतिमात्रं एकस्यातिवादं च वर्जयेयुः

04.1.60 तस्यातिक्रमे द्वादशपणो दण्डः

04.1.61 कामं देशजातिगोत्रचरणमैथुनावहासेन नर्मयेयुः

04.1.62 कुशीलवैश्चारणा भिक्षुकाश्च व्याख्याताः

04.1.63 तेषां अयःशूलेन यावतः पणान् अभिवदेयुः तावन्तः शिफाप्रहारा दण्डाः

04.1.64 शेषाणां कर्मणां निष्पत्तिवेतनं शिल्पिनां कल्पयेत्

04.1.65ab एवं चोरान् अचोराख्यान् वणिक्कारुकुशीलवान् ।

04.1.66chd भिक्षुकान् कुहकांश्चान्यान् वारयेद् देशपीडनात् (इति)

Chapt | keeping a watch overtraders

04.2.01 संस्थाऽध्यक्षः पण्यसंस्थायां पुराणभाण्डानां स्वकरणविशुद्धानां आधानं विक्रयं वा स्थापयेत्

04.2.02 तुलामानभाण्डानि चावेक्षेत पौतवापचारात्

04.2.03 परिमाणीद्रोणयोरर्धपलहीनातिरिक्तं अदोषः

04.2.04 पलहीनातिरिक्ते द्वादशपणो दण्डः

04.2.05 तेन पल उत्तरा दण्डवृद्धिर्व्याख्याता

04.2.06 तुलायाः कर्षहीनातिरिक्तं अदोषः

04.2.07 द्विकर्षहीनातिरिक्ते षट्पणो दण्डः

04.2.08 तेन कर्ष उत्तरा दण्डवृद्धिर्व्याख्याता

04.2.09 आढकस्यार्धकर्षहीनातिरिक्तं अदोषः

04.2.10 कर्षहीनातिरिक्ते त्रिपणो दण्डः

04.2.11 तेन कर्ष उत्तरा दण्डवृद्धिर्व्याख्याता

04.2.12 तुलामानविशेषाणां अतोऽन्येषां अनुमानं कुर्यात्

04.2.13 तुलामानाभ्यां अतिरिक्ताभ्यां क्रीत्वा हीनाभ्यां विक्रीणानस्य त एव द्विगुणा दण्डाः

04.2.14 गण्यपण्येष्वष्टभागं पण्यमूल्येष्वपहरतः षण्ँअवतिर्दण्डः

04.2.15 काष्ठलोहमणिमयं रज्जुचर्ममृण्मयं सूत्रवल्करोममयं वा जात्यं इत्यजात्यं विक्रयाधानं नयतो मूल्याष्टगुणो दण्डः

04.2.16 सारभाण्डं इत्यसारभाण्डं तज्जातं इत्यतज्जातं राधायुक्तं इत्युपधियुक्तं समुद्गपरिवर्तिमं वा विक्रयाधानं नयतो हीनमूल्यं चतुष्पञ्चाशत्पणो दण्डः, पणमूल्यं द्विगुणो, द्विपणमूल्यं द्विशतः

04.2.17 तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता

04.2.18 कारुशिल्पिनां कर्मगुणापकर्षं आजीवं विक्रयक्रय उपघातं वा सम्भूय समुत्थापयतां सहस्रं दण्डः

04.2.19 वैदेहकानां वा सम्भूय पण्यं अवरुन्धतां अनर्घेण विक्रीणतां वा सहस्रं दण्डः

04.2.20 तुलामानान्तरं अर्घवर्णान्तरं वा - धरकस्य मायकस्य वा पणमूल्याद् अष्टभागं हस्तदोषेणाचरतो द्विशतो दण्डः

04.2.21 तेन द्विशत उत्तरा दण्डवृद्धिर्व्याख्याता

04.2.22 धान्यस्नेहक्षारलवणगन्धभैषज्यद्रव्याणां समवर्ण उपधाने द्वादशपणो दण्डः

04.2.23 यन्निषृष्टं उपजीवेयुः तद् एषां दिवससञ्जातं सङ्ख्याय वणिक् स्थापयेत्

04.2.24 क्रेतृविक्रेत्रोरन्तरपतितं आदायाद् अन्यद् भवति

04.2.25 तेन धान्यपण्यनिचयांश्चानुज्ञाताः कुर्युः

04.2.26 अन्यथानिचितं एषां पण्याध्यक्षो गृह्णीयात्

04.2.27 तेन धान्यपण्यविक्रये व्यवहरेतानुग्रहेण प्रजानाम्

04.2.28 अनुज्ञातक्रयाद् उपरि च एषां स्वदेशीयानां पण्यानां पञ्चकं शतं आजीवं स्थापयेत्, परदेशीयानां दशकम्

04.2.29 ततः परं अर्घं वर्धयतां क्रये विक्रये वा भावयतां पणशते पञ्चपणाद् द्विशतो दण्डः

04.2.30 तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता

04.2.31 सम्भूयक्रये च एषां अविक्रीते नान्यं सम्भूयक्रयं दद्यात्

04.2.32 पण्य उपघाते च एषां अनुग्रहं कुर्यात्

04.2.33 पण्यबाहुल्यात् पण्याध्यक्षः सर्वपण्यान्येकमुखानि विक्रीणीत

04.2.34 तेष्वविक्रीतेषु नान्ये विक्रीणीरन्

04.2.35 तानि दिवसवेतनेन विक्रीणीरन्न् अनुग्रहेण प्रजानाम्

04.2.36ab देशकालान्तरितानां तु पण्यानां - प्रक्षेपं पण्यनिष्पत्तिं शुल्कं वृद्धिं अवक्रयम् ।

04.2.36chd व्ययान् अन्यांश्च सङ्ख्याय स्थापयेद् अर्घं अर्घवित् (इति)

04.3.01 दैवान्यष्टौ महाभयानि - अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसि इति

04.3.02 तेभ्यो जनपदं रक्षेत्

04.3.03 ग्रीष्मे बहिर्ऽधिश्रयणं ग्रामाः कुर्युः, दशमूलीसङ्ग्रहेणाधिष्ठिता वा

04.3.04 नागरिकप्रणिधावग्निप्रतिषेधो व्याख्यातः, निशान्तप्रणिधौ राजपरिग्रहे च

04.3.05 बलिहोमस्वस्तिवाचनैः पर्वसु चाग्निपूजाः कारयेत्

04.3.06 वर्षारात्रं आनूपग्रामाः पूरवेलां उत्सृज्य वसेयुः

04.3.07 काष्ठवेणुनावश्च उपगृह्णीयुः

04.3.08 उह्यमानं अलाबुदृतिप्लवगण्डिकावेणिकाभिः तारयेयुः

04.3.09 अनभिसरतां द्वादशपणो दण्डः, अन्यत्र प्लवहीनेभ्यः

04.3.10 पर्वसु च नदीपूजाः कारयेत्

04.3.11 मायायोगविदो वेदविदो वा वर्षं अभिचरेयुः

04.3.12 वर्षावग्रहे शचीनाथगङ्गापर्वतमहाकच्छपूजाः कारयेत्

04.3.13 व्याधिभयं औपनिषदिकैः प्रतीकारैः प्रतिकुर्युः, औषधैश्चिकित्सकाः शान्तिप्रायश्चित्तैर्वा सिद्धतापसाः

04.3.14 तेन मरको व्याख्यातः

04.3.15 तीर्थाभिऽएचनं महाकच्छवर्धनं गवां श्मशानावदोहनं कबन्धदहनं देवरात्रिं च कारयेत्

04.3.16 पशुव्याधिमरके स्थानार्थनीराजनं स्वदैवतपूजनं च कारयेत्

04.3.17 दुर्भिक्षे राजा बीजभक्त उपग्रहं कृत्वाऽनुग्रहं कुर्यात्, दुर्गसेतुकर्म वा भक्तानुग्रहेण, भक्तसंविभागं वा, देशनिक्षेपं वा

04.3.18 मित्राणि वा व्यपाश्रयेत, कर्शनं वमनं वा कुर्यात्

04.3.19 निष्पन्नसस्यं अन्यविषयं वा सजनपदो यायात्, समुद्रसरस्तटाकानि वा संश्रयेत

04.3.20 धान्यशाकमूलफलावापान् वा सेतुषु कुर्वीत,
मृगपशुपक्षिव्यालमत्स्यारम्भान् वा
04.3.21 मूषिकभये मार्जारनकुल उत्सर्गः
04.3.22 तेषां ग्रहणहिंसायां द्वादशपणो दण्डः, शुनां अनिग्रहे चान्यत्रारण्यचरेभ्यः
04.3.23 स्नुहिक्षीरलिप्तानि धान्यानि विसृजेद्, उपनिषद्योगयुक्तानि वा
04.3.24 मूषिककरं वा प्रयुञ्जीत
04.3.25 शान्तिं वा सिद्धतापसाः कुर्युः
04.3.26 पर्वसु च मूषिकपूजाः कारयेत्
04.3.27 तेन शलभपक्षिक्रिमिभयप्रतीकारा व्याख्याताः
04.3.28 व्यालभये मदनरसयुक्तानि पशुशवानि प्रसृजेत्,
मदनकोद्रवपूर्णान्यौदर्याणि वा
04.3.29 लुब्धकाः श्वगणिनो वा कूटपञ्जरावपातैश्चरेयुः
04.3.30 आवरणिनः शस्त्रपाणयो व्यालान् अभिहन्युः
04.3.31 अनभिसर्तुर्द्वादशपणो दण्डः
04.3.32 स एव लाभो व्यालघातिनः
04.3.33 पर्वसु च पर्वतपूजाः कारयेत्
04.3.34 तेन मृगपशुपक्षिसङ्घग्राहप्रतीकारा व्याख्याताः
04.3.35 सर्पभये मन्त्रैरोषधिभिश्च जाङ्गुलीविदश्चरेयुः
04.3.36 सम्भूय वाऽपि सर्पान् हन्युः
04.3.37 अथर्ववेदविदो वाऽभिचरेयुः
04.3.38 पर्वसु च नागपूजाः कारयेत्
04.3.39 तेन उदकप्राणिभयप्रतीकारा व्याख्याताः
04.3.40 रक्षोभये रक्षोघ्नान्यथर्ववेदविदो मायायोगविदो वा कर्माणि कुर्युः
04.3.41 पर्वसु च वितर्दिच्छत्र उल्लोपिकाहस्तपताकाच्छाग उपहारैश्चैत्यपूजाः
कारयेत्
04.3.42 चरुं वश्चरामः इत्येवं सर्वभयेष्वहोरात्रं चरेयुः
04.3.43 सर्वत्र च उपहृतान् पिता इवानुगृह्णीयात्
04.3.44ab मायायोगविदः तस्माद् विषये सिद्धतापसाः ।

04.3.44chd वसेयुः पूजिता राज्ञा दैवापत्प्रतिकारिणः (इति)

Chapt | Guarding against persons with secret means of income

04.4.01 समाहर्तृप्रणिधौ जनपदरक्षणं उक्तम्

04.4.02 तस्य कण्टकशोधनं वक्ष्यामः

04.4.03 समाहर्ता जनपदे सिद्धतापसप्रव्रजितचक्रचरचारणकुहकप्रच्छन्दककार्तान्तिकनैमित्तिकमौहूर्तिकचिकित्सक उन्मत्तमूकबधिरजडान्धवैदेहककारुशिल्पिकुशीलववेशशौण्डिकापूपिकपाक्वमांसिकाउदनिक व्यञ्जनान् प्रणिदध्यात्

04.4.04 ते ग्रामाणां अध्यक्षाणां च शौचाशौचं विद्युः

04.4.05 यं चात्र गूढाजीविनं शङ्केत तं सत्त्रिणाऽपसर्पयेत्

04.4.06 धर्मस्थं विश्वास उपगतं सत्त्री ब्रूयात् - असौ मे बन्धुरभियुक्तः, तस्यायं अनर्थः प्रतिक्रियतां, अयं चार्थः प्रतिगृह्यताम् इति

04.4.07 स चेत् तथा कुर्याद् उपदाग्राहक इति प्रवास्येत

04.4.08 तेन प्रदेष्टारो व्याख्याताः

04.4.09 ग्रामकूटं अध्यक्षं वा सत्त्री ब्रूयात् - असौ जाल्मः प्रभूतद्रव्यः, तस्यायं अनर्थः, तेन एनं आहारयस्व इति

04.4.10 स चेत् तथा कुर्याद् उत्कोचक इति प्रवास्येत

04.4.11 कृतकाभियुक्तो वा कूटसाक्षिणोऽभिज्ञातानर्थवैपुल्येनारभेत

04.4.12 ते चेत् तथा कुर्युः कूटसाक्षिण इति प्रवास्येरन्

04.4.13 तेन कूटश्रावणकारका व्याख्याताः

04.4.14 यं वा मन्त्रयोगमूलकर्मभिः श्माशानिकैर्वा संवदनकरकं मन्येत तं सत्त्री ब्रूयात् - अमुष्य भार्यां स्नुषां दुहितरं वा कामये, सा मां प्रतिकामयतां, अयं चार्थः प्रतिगृह्यताम् इति

04.4.15 स चेत् तथा कुर्यात् संवदनकारक इति प्रवास्येत

04.4.16 तेन कृत्याभिचारशीलौ व्याख्यातौ

04.4.17 यं वा रसस्य कर्तारं क्रेतारं विक्रेतारं भैषज्याहारव्यवहारिणं वा रसदं मन्येत तं सत्त्री ब्रूयात् - असौ मे शत्रुः, तस्य उपघातः क्रियतां, अयं चार्थः प्रतिगृह्यताम् इति

04.4.18 स चेत् तथा कुर्याद् रसद इति प्रवास्येत

04.4.19 तेन मदनयोगव्यवहारी व्याख्यातः

04.4.20 यं वा नानालोहक्षाराणां अङ्गारभस्मासन्दंशमुष्टिकाधिकरणीबिम्ब.टङ्कमूषाणां अभीक्ष्णक्रेतारं मषीभस्मधूमदिग्धहस्तवस्त्रलिङ्गं कर्मार उपकरणसंसर्गं कूटरूपकारकं मन्येत तं सत्त्री शिष्यत्वेन संव्यवहारेण चानुप्रविश्य प्रज्ञापयेत्

04.4.21 प्रज्ञातः कूटरूपकारक इति प्रवास्येत

04.4.22 तेन रागस्यापहर्ता कूटसुवर्णव्यवहारी च व्याख्यातः

04.4.23ab आरब्धारः तु हिंसायां गूढाजीवाः त्रयोदश ।

04.4.23chd प्रवास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः (इति)

Chapt | Detection of criminals througH secret agents in the disguise of holymen

04.5.01 सत्त्रिप्रयोगाद् ऊर्ध्वं सिद्धव्यञ्जना माणवान् माणवविद्याभिः प्रलोभयेयुः, प्रस्वापनान्तर्धानद्वारापोहमन्त्रेण प्रतिरोधकान्, संवदनमन्त्रेण पारतल्पिकान्

04.5.02 तेषां कृत उत्साहानां महान्तं सङ्घं आदाय रात्रावन्यं ग्रामं उद्दिश्यान्यं ग्रामं कृतकस्त्रीपुरुषं गत्वा ब्रूयुः - इह एव विद्याप्रभावो दृश्यतां, कृच्छ्रः परग्रामो गन्तुम् इति

04.5.03 ततो द्वारापोहमन्त्रेण द्वाराण्यपोह्य प्रविश्यताम् इति ब्रूयुः

04.5.04 अन्तर्धानमन्त्रेण जाग्रतां आरक्षिणां मध्येन माणवान् अतिक्रामयेयुः

04.5.05 प्रस्वापनमन्त्रेण प्रस्वापयित्वा रक्षिणः शयाभिर्माणवैः सञ्चारयेयुः

04.5.06 संवदनमन्त्रेण भार्याव्यञ्जनाः परेषां माणवैः सम्मोदयेयुः

04.5.07 उपलब्धविद्याप्रभावाणां पुरश्चरणाऽऽद्यादिशेयुरभिज्ञानार्थम्

04.5.08 कृतलक्षणद्रव्येषु वा वेश्मसु कर्म कारयेयुः

04.5.09 अनुप्रविष्टा वा एकत्र ग्राहयेयुः

04.5.10 कृतलक्षणद्रव्यक्रयविक्रयाधानेषु योगसुरामत्तान् वा ग्राहयेयुः

04.5.11 गृहीतान् पूर्वापदानसहायान् अनुयुञ्जीत

04.5.12 पुराणचोरव्यञ्जना वा चोरान् अनुप्रविष्टाः तथा एव कर्म कारयेयुर्ग्राहयेयुश्च

04.5.13 गृहीतान् समाहर्ता पौरजानपदानां दर्शयेत् - चोरग्रहणीं विद्यां अधीते राजा, तस्य उपदेशाद् इमे चोरा गृहीताः, भूयश्च ग्रहीष्यामि, वारयितव्यो वः स्वजनः पापाचारह् इति

04.5.14 यं चात्रापसर्प उपदेशेन शम्याप्रतोदादीनां अपहर्तारं जानीयात् तं एषां प्रत्यादिशेत् एष राज्ञः प्रभावः इति

04.5.15 पुराणचोरगोपालकव्याधश्वगणिनश्च वनचोराटविकान् अनुप्रविष्टाः प्रभूतकूटहिरण्यकुप्यभाण्डेषु सार्थव्रजग्रामेष्वेनान् अभियोजयेयुः

04.5.16 अभियोगे गूढबलैर्घातयेयुः, मदनरसयुक्तेन वा पथ्यऽदनेन

04.5.17 गृहीतलोप्त्रभारान् आयतगतपरिश्रान्तान् प्रस्वपतः प्रहवणेषु योगसुरामत्तान् वा ग्राहयेयुः

04.5.18ab पूर्ववच्च गृहीत्वा एनान् समाहर्ता प्ररूपयेत् ।

04.5.18chd सर्वज्ञख्यापनं राज्ञः कारयन् राष्ट्रवासिषु (इति)

Chapt | Arrest on suspicion, with the stolen article and by indication of the act

04.6.01 सिद्धप्रयोगाद् ऊर्ध्वं शङ्कारूपकर्माभिग्रहः

04.6.02a क्षीणदायकुटुम्बं, अल्पनिर्वेशं, विपरीतदेशजातिगोत्रनामकर्मापदेशं, प्रच्छन्नवृत्तिकर्माणं,

04.6.02b मांससुराभक्ष्यभोजनगन्धमाल्यवस्त्रविभूषणेषु प्रसक्तं, अतिव्ययकर्तारं, पुंश्चलीद्यूतशौण्डिकेषु प्रसक्तं,

04.6.02ch अभीक्ष्णप्रवासिनं, अविज्ञातस्थानगमनं, एकान्तारण्यनिष्कुटविकालचारिणं, प्रच्छन्ने सामिषे वा देशे बहुमन्त्रसंनिपातं,

04.6.02d सद्यःक्षतव्रणानां गूढप्रतीकारकारयितारं, अन्तर्गृहनित्यं, अभ्यधिगन्तारं, कान्तापरं,

04.6.02e परपरिग्रहाणां परस्त्रीद्रव्यवेश्मनां अभीक्ष्णप्रष्टारं, कुत्सितकर्मशास्त्र उपकरणसंसर्गं,

04.6.02f विरात्रे छन्नकुड्यच्छायासञ्चारिणं, विरूपद्रव्याणां अदेशकालविक्रेतारं, जातवैरशयं, हीनकर्मजातिं,

04.6.02g विगूहमानरूपं, लिङ्गेनालिङ्गिनं, लिङ्गिनं वा भिन्नाचारं, पूर्वकृतापदानं, स्वकर्मभिरपदिष्टं,

04.6.02h नागरिकमहामात्रदर्शने गुह्यमानं अपसरन्तं अनुच्छ्वास उपवेशिनं आविग्नं शुष्कभिन्नस्वरमुखवर्णं,

04.6.02i शस्त्रहस्तमनुष्यसम्पातत्रासिनं,

हिंस्रस्तेननिधिनिक्षेपापहारपरप्रयोगगूढाजीविनां अन्यतमं शङ्केत इति शङ्काऽभिग्रहः ||

04.6.03 रूपाभिग्रहः तु - नष्टापह्रतं अविद्यमानं तज्जातव्यवहारिषु निवेदयेत्

04.6.04 तच्चेन्निवेदितं आसाद्य प्रच्छादयेयुः साचिव्यकरदोषं आप्नुयुः

04.6.05 अजानन्तोऽस्य द्रव्यस्यातिसर्गेण मुच्येरन्

04.6.06 न चानिवेद्य संस्थाऽध्यक्षस्य पुराणभाण्डानां आधानं विक्रयं वा कुर्युः

04.6.07 तच्चेन्निवेदितं आसाद्येत, रूपाभिगृहीतं आगमं पृच्छेत् कुतः ते लब्धम् इति

04.6.08 स चेत् ब्रूयात् दायाद्याद् अवाप्तं, अमुष्माल्लब्धं क्रीतं कारितं आधिप्रच्छन्नं, अयं अस्य देशः कालश्च उपसम्प्राप्तेः, अयं अस्यार्घः प्रमाणं लक्षणं मूल्यं च इति, तस्यागमसमाधौ मुच्येत

04.6.09 नाष्टिकश्चेत् तद् एव प्रतिसन्दध्यात्, यस्या पूर्वो दीर्घश्च परिभोगः शुचिर्वा देशः तस्य द्रव्यं इति विद्यात्

04.6.10 चतुष्पदद्विपदानां अपि हि रूपलिङ्गसामान्यं भवति, किं अङ्ग पुनरेकयोनिद्रव्यकर्तृप्रसूतानां कुप्याभरणभाण्डानां इति

04.6.11 स चेद् ब्रूयात् याचितकं अवक्रीतकं आहितकं निक्षेपं उपनिधिं वैयावृत्यकर्म वाऽमुष्य इति, तस्यापसारप्रतिसन्धानेन मुच्येत

04.6.12 न एवम् इत्यपसारो वा ब्रूयात्, रूपाभिगृहीतः परस्य दानकारणं आत्मनः प्रतिग्रहकारणं उपलिङ्गनं वा दायकदापकनिबन्धकप्रतिग्राहक उपद्रष्टृभिरुपश्रोतृभिर्वा प्रतिसमानयेत्

04.6.13 उज्झितप्रनष्टनिष्पतित उपलब्धस्य देशकाललाभ उपलिङ्गनेन शुद्धिः

04.6.14 अशुद्धः तच्च तावच्च दण्डं दद्यात्

04.6.15 अन्यथा स्तेयदण्डं भजेत इति रूपाभिग्रहः ।

04.6.16 कर्माभिग्रहः तु - मुषितवेश्मनः प्रवेशनिष्कसनं अद्वारेण, द्वारस्य सन्धिना बीजेन वा वेधं, उत्तमागारस्य जालवातायननीप्रवेधं, आरोहणावतरणे च कुड्यस्य वेधं, उपखननं वा गूढद्रव्यनिक्षेपणग्रहण उपायं, उपदेश उपलभ्यं अभ्यन्तरच्छेद उत्करपरिमर्द उपकरणं अभ्यन्तरकृतं विद्यात्

04.6.17 विपर्यये बाह्यकृतं, उभयत उभयकृतम्

04.6.18a अभ्यन्तरकृते पुरुषं आसन्नं व्यसनिनं क्रूरसहायं तस्कर उपकरणसंसर्गं, स्त्रियं वा दरिद्रकुलां अन्यप्रसक्तां वा,

04.6.18b परिचारकजनं वा तद्विधाचारं, अतिस्वप्नं, निद्राक्लान्तं, आविग्नं । शुष्कभिन्नस्वरमुखवर्णं, अनवस्थितं,

04.6.18ch अतिप्रलापिनं, उच्चारोहणसंरब्धगात्रं, विलूननिघृष्टभिन्नपाटितशरीरवस्त्रं, जातकिणसंरब्धहस्तपादं,

04.6.18d पांसुपूर्णकेशनखं विलूनभुग्नकेशनखं वा, सम्यक्स्नातानुलिप्तं तैलप्रमृष्टगात्रं सद्योदौतहस्तपादं वा,

04.6.18e पांसुपिच्छिलेषु तुल्यपादपदनिक्षेपं, प्रवेशनिष्कसनयोर्वा तुल्यमाल्यमद्यगन्धवस्त्रच्छेदविलेपनस्वेदं परीक्षेत

04.6.19 चोरं पारदारिकं वा विद्यात्

04.6.20ab सगोपस्थानिको बाह्यं प्रदेष्टा चोरमार्गणम् ।

04.6.20chd कुर्यान्नागरिकश्चान्तर्दुर्गे निर्दिष्टहेतुभिः (इति)

Chapt | In quest of sudden deaths

04.7.01 तैलाभ्यक्तं आशुमृतकं परीक्षेत

04.7.02 निष्कीर्णमूत्रपुरीषं वातपूर्णकोष्ठत्वक्कं शूनपादपाणिमान् मीलिताक्षं सव्यञ्जनकण्ठं पीटननिरुद्ध उच्छ्वासहतं विद्यात्

04.7.03 तं एव सङ्कुचितबाहुसक्थिं उद्बन्धहतं विद्यात्

04.7.04 शूनपाणिपाद उदरं अपगताक्षं उद्वृत्तनाभिं अवरोपितं विद्यात्

04.7.05 निस्तब्धगुदाक्षं सन्दष्टजिह्वं आध्मात उदरं उदकहृतं विद्यात्

04.7.06 शोणितानुसिक्तं भग्नभिन्नगात्रं काष्ठैरश्मभिर्वा हतं विद्यात्

04.7.07 सम्भग्नस्फुटितगात्रं अवक्षिप्तं विद्यात्

04.7.08 श्यावपाणिपाददन्तनखं शिथिलमांसरोमचर्माणं फेन उपदिग्धमुखं विषहृतं विद्यात्

04.7.09 तं एव स-शोणितदंशं सर्पकीटहृतं विद्यात् ।

04.7.10 विक्षिप्तवस्त्रगात्रं अतिवन्तविरिक्तं मदनयोगहृतं विद्यात्

04.7.11 अतोऽन्यतमेन कारणेन हृतं हृत्वा वा दण्डभयाद् उद्बद्धनिकृत्तकण्ठं विद्यात्

04.7.12 विषहृतस्य भोजनशेषं वयोभिः परीक्षेत

04.7.13 हृदयाद् उद्धृत्याग्नौ प्रक्षिप्तं चिटिचिटायद्.इन्द्रधनुर्वर्णं वा विषयुक्तं विद्यात्, दग्धस्य हृदयं अदग्धं दृष्ट्वा वा

04.7.14 तस्य परिचारकजनं वाग्दण्डपारुष्यातिलब्धं मार्गेत, दुःख उपहृतं अन्यप्रसक्तं वा स्त्रीजनं, दायवृत्तिस्त्रीजनाभिमन्तारं वा बन्धुम्

04.7.15 तद् एव हृत उद्बद्धस्य परीक्षेत

04.7.16 स्वयं उद्बद्धस्य वा विप्रकारं अयुक्तं मार्गेत

04.7.17 सर्वेषां वा स्त्रीदायाद्यदोषः कर्मस्पर्धा प्रतिपक्षद्वेषः पण्यसंस्थासमवायो वा विवादपदानां अन्यतमद् वा रोषस्थानम्

04.7.18 रोषनिमित्तो घातः

04.7.19 स्वयंऽअदिष्टपुरुषैर्वा, चोरैरर्थनिमित्तं, सादृश्याद् अन्यवैरिभिर्वा हतस्य घातं आसन्नेभ्यः परीक्षेत

04.7.20 येनाहूतः सह स्थितः प्रस्थितो हृतभूमिं आनीतो वा तं अनुयुञ्जीत

04.7.21 ये चास्य हृतभूमावासन्नचराः तान् एक एकशः पृच्छेत् केनायं इहानीतो हृतो वा, कः सशस्त्रः सङ्गूहमान उद्विग्नो वा युष्माभिर्दृष्टः इति

04.7.22 ते यथा ब्रूयुः तथाऽनुयुञ्जीत

04.7.23ab अनाथस्य शरीरस्थं उपभोगं परिच्छदम् ।

04.7.23chd वस्त्रं वेषं विभूषां वा दृष्ट्वा तद्व्यवहारिणः

04.7.24ab अनुयुञ्जीत संयोगं निवासं वासकारणम् ।

04.7.24chd कर्म च व्यवहारं च ततो मार्गणं आचरेत्

04.7.25ab रज्जुशस्त्रविषैर्वाऽपि कामक्रोधवशेन यः ।

04.7.25chd घातयेत् स्वयं आत्मानं स्त्री वा पापेन मोहिता

04.7.26ab रज्जुना राजमार्गे तांश्चण्डालेनापकर्षयेत् ।

04.7.26chd न श्मशानविधिः तेषां न सम्बन्धिक्रियाः तथा

04.7.27ab बन्धुः तेषां तु यः कुर्यात् प्रेतकार्यक्रियाविधिम् ।

04.7.27chd तद्गतिं स चरेत् पश्चात् स्वजनाद् वा प्रमुच्यते

04.7.28ab संवत्सरेण पतति पतितेन समाचरन् ।

04.7.28chd याजनाध्यापनाद् यौनात् तैश्चान्योऽपि समाचरन् (इति)

Chapt | Investigation througH interrogation and througH torture

04.8.01 मुषितसंनिधौ बाह्यानां अभ्यन्तराणां च साक्षिणां अभिशस्तस्य देशजातिगोत्रनामकर्मसारसहायनिवासान् अनुयुञ्जीत

04.8.02 तांश्चापदेशैः प्रतिसमानयेत्

04.8.03 ततः पूर्वस्याह्नः प्रचारं रात्रौ निवासं च<चा> ग्रहणाद् इत्यनुयुञ्जीत

04.8.04 तस्यापसारप्रतिसन्धाने शुद्धः स्यात्, अन्यथा कर्मप्राप्तः

04.8.05 त्रिरात्राद् ऊर्ध्वं अग्राह्यः शङ्कितकः पृच्छाऽभावाद् अन्यत्र उपकरणदर्शनात्

04.8.06 अचोरं चोर इत्यभिव्याहरतश्चोरसमो दण्डः, चोरं प्रच्छादयतश्च

04.8.07 चोरेणाभिशस्तो वैरद्वेषाभ्यां अपदिष्टकः शुद्धः स्यात्

04.8.08 शुद्धं परिवासयतः पूर्वः साहसदण्डः

04.8.09 शङ्कानिष्पन्नं उपकरणमन्त्रिसहायरूपवैयावृत्यकरान्निष्पादयेत्

04.8.10 कर्मणश्च प्रदेशद्रव्यादानांशविभागैः प्रतिसमानयेत्

04.8.11 एतेषां कारणानां अनभिसन्धाने विप्रलपन्तं अचोरं विद्यात्

04.8.12 दृश्यते ह्यचोरोऽपि चोरमार्गे यदृच्छया संनिपाते चोरवेषशस्त्रभाण्डसामान्येन गृह्यमाणश्चोरभाण्डस्य उपवासेन वा, यथाऽणिमाण्डव्यः कर्मक्लेशभयाद् अचोरः चोरोऽस्मि इति ब्रुवाणः

04.8.13 तस्मात् समाप्तकरणं नियमयेत्

04.8.14 मन्दापराधं बालं वृद्धं व्याधितं मत्तं उन्मत्तं क्षुत्पिपासाऽध्वक्लान्तं अत्याशितं आमकाशितं दुर्बलं वा न कर्म कारयेत्

04.8.15 तुल्य शीलपुंश्चलीप्रापाविककथाऽवकाशभोजनदातृभिरपसर्पयेत्

04.8.16 एवं अतिसन्दध्यात्, यथा वा निक्षेपापहारे व्याख्यातम्

04.8.17 आप्तदोषं कर्म कारयेत्, न त्वेव स्त्रियं गर्भिणीं सूतिकां वा मासावरप्रजाताम्

04.8.18 स्त्रियाः त्वर्धकर्म, वाक्यानुयोगो वा

04.8.19 ब्राह्मणस्य सत्त्रिपरिग्रहः श्रुतवतः तपस्विनश्च

04.8.20 तस्यातिक्रम उत्तमो दण्डः कर्तुः कारयितुश्च, कर्मणा व्यापादनेन च

04.8.21 व्यावहारिकं कर्मचतुष्कं - षड् दण्डाः, सप्त कशाः, द्वावुपरिनिबन्धौ, उदकनालिका च

04.8.22 परं पापकर्मणां नव वेत्रलताः, द्वादश कशाः, द्वावूरुवेष्टौ, विंशतिर्नक्तमाललताः, द्वात्रिंशत्तलाः, द्वौ वृश्चिकबन्धौ, उल्लम्बने च द्वे, सूची हस्तस्य, यवागूपीतस्य एकपर्वदहनं अङ्गुल्याः, स्नेहपीतस्य प्रतापनं एकं अहः, शिशिररात्रौ बल्बजाग्रशय्या च

04.8.23 इत्यष्टादशकं कर्म

04.8.24 तस्य उपकरणं प्रमाणं प्रहरणं प्रधरणं अवधारणं च खरपट्टाद् आगमयेत्

04.8.25 दिवसान्तरं एक एकं च कर्म कारयेत्

04.8.26 पूर्वकृतापदानं प्रतिज्ञायापहरन्तं एकदेशदृष्टद्रव्यं कर्मणा रूपेण वा गृहीतं राजकोशं अवस्तृणन्तं कर्मवध्यं वा राजवचनात् समस्तं व्यस्तं अभ्यस्तं वा कर्म कारयेत्

04.8.27 सर्वापराधेष्वपीडनीयो ब्राह्मणः

04.8.28 तस्याभिशस्ताङ्को ललाटे स्याद् व्यवहारपतनाय, स्तेयो श्वा, मनुष्यवधे कबन्धः, गुरुतल्पे भगं, सुरापाने मद्यध्वजः

04.8.29ab ब्राह्मणं पापकर्माणं उद्वुष्याङ्ककृतव्रणम् ।

04.8.29chd कुर्यान्निर्विषयं राजा वासयेद् आकरेषु वा (इति)

Chapt | keeping a watch over officers of all departments

04.9.01 समाहर्तृप्रदेष्टारः पूर्वं अध्यक्षाणां अध्यक्षपुरुषाणां च नियमनं कुर्युः

04.9.02 खनिसारकर्मान्तेभ्यः सारं रत्नं वाऽपहरतः शुद्धवधः

04.9.03 फल्गुद्रव्यकर्मान्तेभ्यः फल्गु द्रव्यं ऽपस्करं वा पूर्वः साहसदण्डः

04.9.04 पण्यभूमिभ्यो वा राजपण्यं माषमूल्याद् ऊर्ध्वं आपादमूल्याद् इत्यपहरतो द्वादशपणो दण्डः, आद्विपादमूल्याद् इति चतुर्विंशतिपणः, आत्रिपादमूल्याद् इति षट्त्रिंशत्पणः, आपणमूल्याद् इत्यष्टचत्वारिंशत्पणः, आद्विपणमूल्याद् इति पूर्वः साहसदण्डः, आचतुष्पणमूल्याद् इति मध्यमः, आऽष्टपणमूल्याद् इत्युत्तमः, आदशपणमूल्याद् इति वधः

04.9.05 कोष्ठपण्यकुप्यायुधागारेभ्यः कुप्यभाण्ड ऽपस्करापहारेष्वर्धमूल्येषु एत एव दण्डाः

04.9.06 कोशभाण्डागाराक्षशालाभ्यश्चतुर्भागमूल्येषु एत एव द्विगुणा दण्डाः

04.9.07 चोराणां अभिप्रधर्षणे चित्रो घातः

04.9.08 इति राजपरिग्रहेषु व्याख्यातम्

04.9.09 बाह्येषु तु - प्रच्छन्नं अहनि क्षेत्रखलवेश्मापणेभ्यः कुप्यभाण्डं ऽपस्करं वा माषमूल्याद् ऊर्ध्वं आपादमूल्याद् इत्यपहरतः त्रिपणो दण्डः, गोमयप्रदेहेन वा प्रलिप्यावघोषणम् आद्विपादमूल्याद् इति षट्पणः, गोमयभस्मना वा प्रलिप्यावघोषणं, आत्रिपादमूल्याद् इति नवपणः, गोमयभस्मना वा प्रलिप्यावघोषणं, शरावमेखलया वाऽअपणमूल्याद् इति द्वादशपणः, मुण्डनं प्रव्राजनं वाऽअद्विपणमूल्याद् इति चतुर्विंशतिपणः, मुण्डस्य इष्टकाशकलेन प्रव्राजनं वाऽअचतुष्पणमूल्याद् इति षट्त्रिंशत्पणः आपञ्चपणमूल्याद् इत्यष्टचत्वारिंशत्पणः, आदशपणमूल्याद् इति पूर्वः साहसदण्डः आविंशतिपणमूल्याद् इत् द्विशतः आत्रिंशत्पणमूल्याद् इति पञ्चशतः आचत्वारिंशत्पणमूल्याद् इति साहस्रः आपञ्चाशत्पणमूल्याद् इति वधः

04.9.10 प्रसह्य दिवा रात्रौ वाऽऽन्तर्यामिकं अपहरतोऽर्धमूल्येषु एत एव दण्डाः

04.9.11 प्रसह्य दिवा रात्रौ वा स-शस्त्रस्यापहरतश्चतुर्भागमूल्येषु एत एव द्विगुणा दण्डाः

04.9.12 कुटुम्बिकाध्यक्षमुख्यस्वामिनां कूटशासनमुद्राकर्मसु पूर्वमध्य उत्तमवधा दण्डाः, यथाऽपराधं वा

04.9.13 धर्मस्थश्चेद् विवदमानं पुरुषं तर्जयति भर्त्सयत्यपसारयत्यभिग्रसते वा पूर्वं अस्मै साहसदण्डं कुर्यात्, वाक्पारुष्ये द्विगुणम्

04.9.14 पृच्छ्यं न पृच्छति, अपृच्छ्यं पृच्छति, पृष्ट्वा वा विसृजति, शिक्षयति, स्मारयति, पूर्वं ददाति वा, इति मध्यमं अस्मै साहसदण्डं कुर्यात्

04.9.15 देयं देशं न पृच्छति, अदेयं देशं पृच्छति, कार्यं अदेशेनातिवाहयति, छलेनातिहरति, कालहरणेन श्रान्तं अपवाहयति, मार्गापन्नं वाक्यं उत्क्रमयति, मतिसाहाय्यं साक्षिभ्यो ददाति, तारितानुशिष्टं कार्यं पुनरपि गृह्णाति, उत्तमं अस्मै साहसदण्डं कुर्यात्

04.9.16 पुनर्ऽपराधे द्विगुणं स्थानाद् व्यवरोपणं च

04.9.17 लेखकश्चेद् उक्तं न लिखति, अनुक्तं लिखति, दुरुक्तं उपलिखति, सूक्तं उल्लिखति, अर्थ उत्पत्तिं वा विकल्पयति, इति पूर्वं अस्मै साहसदण्डं कुर्याद्, यथाऽपराधं वा

04.9.18 धर्मस्थः प्रदेष्टा वा हैरण्यदण्डं अदण्ड्ये क्षिपति क्षेपद्विगुणं अस्मै दण्डं कुर्यात्, हीनातिरिक्ताष्टगुणं वा

04.9.19 शरीरदण्डं क्षिपति शारीरं एव दण्डं भजेत, निष्क्रयद्विगुणं वा

04.9.20 यं वा भूतं अर्थं नाशयति अभूतं अर्थं करोति तद्ऽष्टगुणं दण्डं दद्यात्

04.9.21 धर्मस्थीये चारके बन्धनागारे वा शय्याऽऽसनभोजन उच्चारसञ्चाररोधबन्धनेषु त्रिपण उत्तरा दण्डाः कर्तुः कारयितुश्च

04.9.22 चारकाद् अभियुक्तं मुञ्चतो निष्पातयतो वा मध्यमः साहसदण्डः, अभियोगदानं च, बन्धनागारात् सर्वस्वं वधश्च

04.9.23 बन्धनागाराध्यक्षस्य संरुद्धकं अनाख्याय चारयतश्चतुर्विंशतिपणो दण्डः, कर्म कारयतो द्विगुणः, स्थानान्यत्वं गमयतोऽन्नपानं वा रुन्धतः षण्ँअवतिर्दण्डः, परिक्लेशयत उत्कोटयतो वा मध्यमः साहसदण्डः, घ्नतः साहस्रः

04.9.24 परिगृहीतां दासीं आहितिकां वा संरुद्धिकां अधिचरतः पूर्वः साहसदण्डः, चोरड़ामरिकभार्यां मध्यमः, संरुद्धिकां आर्यां उत्तमः

04.9.25 संरुद्धस्य वा तत्र एव घातः

04.9.26 तद् एवाक्षणगृहीतायां आर्यायां विद्यात्, दास्यां पूर्वः साहसदण्डः

04.9.27 चारकं अभित्त्वा निष्पातयतो मध्यमः, भित्त्वा वधः, बन्धनागारात् सर्वस्वं वधश्च

04.9.28ab एवं अर्थचरान् पूर्वं राजा दण्डेन शोधयेत् ।

04.9.28chd शोधयेयुश्च शुद्धाः ते पौरजानपदान् दमैः (इति)

Chapt | Redemption from the cutting of individual limbs

04.10.01 तीर्थघातग्रन्थिभेद ऊर्ध्वकराणां प्रथमेऽपराधे सन्देशच्छेदनं चतुष्पञ्चाशत्पणो वा दण्डः, द्वितीये छेदनं पणस्य शत्यो वा दण्डः, तृतीये दक्षिणहस्तवधश्चतुःशतो वा दण्डः, चतुर्थे यथाकामी वधः

04.10.02 पञ्चविंशतिपणावरेषु कुक्कुटनकुलमार्जारश्वसूकरस्तेयेषु हिंसायां वा चतुष्पञ्चाशत्पणो दण्डः, नासाग्रच्छेदनं वाचण्डालारण्यचराणां अर्धदण्डाः

04.10.03 पाशजालकूटावपातेषु बद्धानां मृगपशुपक्षिव्यालमत्स्यानां आदाने तच्च तावच्च दण्डः

04.10.04 मृगद्रव्यवनान् मृगद्रव्यापहारे शात्यो दण्डः

04.10.05 बिम्बविहारमृगपक्षिस्तेये हिंसायां वा द्विगुणो दण्डः

04.10.06 कारुशिल्पिकुशीलवतपस्विनां क्षुद्रकद्रव्यापहारे शत्यो दण्डः, स्थूलकद्रव्यापहारे द्विशतः, कृषिद्रव्यापहारे च

04.10.07 दुर्गं अकृतप्रवेशस्य प्रविशतः प्राकारच्छिद्राद् वा निक्षेपं गृहीत्वाऽपसरतः काण्डरावधो, द्विशातो वा दण्डः

04.10.08 चक्रयुक्तं नावं क्षुद्रपशुं वाऽपहरत एकपादवधः, त्रिशतो वा दण्डः

04.10.09 कूटकाकण्य्ऽक्षारालाशलाकाहस्तविषमकारिण एकहस्तवधः, चतुःशतो वा दण्डः

04.10.10 स्तेनपारदारिकयोः साचिव्यकर्मणि स्त्रियाः सङ्गृहीतायाश्च कर्णनासाच्छेदनं, पञ्चशतो वा दण्डः, पुंषो द्विगुणः

04.10.11 महापशुं एकं दासं दासीं वाऽपहरतः प्रेतभाण्डं वा विक्रीणानस्य द्विपादवधः, षट्छतो वा दण्डः

04.10.12 वर्ण उत्तमानां गुरूणां च हस्तपादलङ्घने राजयानवाहनाद्यऽअरोहणे च एकहस्तपादवधः, सप्तशतो वा दण्डः

04.10.13 शूद्रस्य ब्राह्मणवादिनो देवद्रव्यं अवस्तृणतो राजद्विष्टं आदिशतो द्विनेत्रभेदिनश्च योगाञ्जनेनान्धत्वं, अष्टशतो वा दण्डः

04.10.14 चोरं पारदारिकं वा मोक्षयतो राजशासनं ऊनं अतिरिक्तं वा लिखतः कन्यां दासीं वा स-हिरण्यं अपरहृतः कूटव्यवहारिणो विमांसविक्रयिणश्च वामहस्तद्विपादवधो, नवशतो वा दण्डः

04.10.15 मानुषमांसविक्रये वधः

04.10.16 देवपशुप्रतिमामनुष्यक्षेत्रगृहहिरण्यसुवर्णरत्नसस्यापहारिण उत्तमो दण्डः, शुद्धवधो वा

04.10.17ab पुरुषं चापराधं च कारणं गुरुलाघवम् ।

04.10.17chd अनुबन्धं तदात्वं च देशकालौ समीक्ष्य च

04.10.18ab उत्तमावरमध्यत्वं प्रदेष्टा दण्डकर्मणि ।

04.10.18chd राज्ञश्च प्रकृतीनां च कल्पयेद् अन्तरा स्थितः (इति)

Chapt | Law of capital punishment, simple and with torture

04.11.01 कलहे घ्नतः पुरुषं चित्रो घातः

04.11.02 सप्तरात्रस्यान्तर्मृते शुद्धवधः, पक्षस्यान्तरुत्तमः, मासस्यान्तः पञ्चशतः समुत्थानव्ययश्च

04.11.03 शस्त्रेण प्रहरत उत्तमो दण्डः

04.11.04 मदेन हस्तवधः, मोहेन द्विशतः

04.11.05 वधे वधः

04.11.06 प्रहारेण गर्भं पातयत उत्तमो दण्डः, भैषज्येन मध्यमः, परिक्लेशेन पूर्वः साहसदण्डः

04.11.07 प्रसभस्त्रीपुरुषघातकाभिसारकनिग्राहकावघोषकावस्कन्दक उपवेधकान् पथिवेश्मप्रतिरोधकान् राजहस्त्यऽश्वरथानां हिंसकान् स्तेनान् वा शूलान् आरोहयेयुः

04.11.08 यश्च एनान् दहेद् अपनयेद् वा स तं एव दण्डं लभेत, साहसं उत्तमं वा

04.11.09 हिंस्रस्तेनानां भक्तवास उपकरणाग्निमन्त्रदानवैयावृत्यकर्मसु उत्तमो दण्डः, परिभाषणं अविज्ञाते

04.11.10 हिंस्रस्तेनानां पुत्रदारं असमन्त्रं विसृजेत्, समन्त्रं आददीत

04.11.11 राज्यकामुकं अन्तःपुरप्रधर्षकं अटव्य्sमित्र उत्साहकं दुर्गराष्ट्रदण्डकोपकं वा शिरोहस्तप्रदीपिकं घातयेत्

04.11.12 ब्राह्मणं तमः प्रवेशयेत्

04.11.13 मातृपितृपुत्रभ्रात्र्sअचार्यतपस्विघातकं वाऽत्वक्षिरःप्रादीपिकं घातयेत्

04.11.14 तेषां आक्रोशे जिह्वाच्छेदः, अङ्गाभिरदने तद्sङ्गान् मोच्यः

04.11.15 यदृच्छाघाते पुंसः पशुयूथस्तेये च शुद्धवधः

04.11.16 दशावरं च यूथं विद्यात्

04.11.17 उदकधारणं सेतुं भिन्दतः तत्र एवाप्सु निमज्जनं, अनुदकं उत्तमः साहसदण्डः, भग्न उत्सृष्टकं मध्यमः

04.11.18 विषदायकं पुरुषं स्त्रियं च पुरुषघ्नीं अपः प्रवेशयेद् अगर्भिणीं, गर्भिणीं मासावरप्रजाताम्

04.11.19 पतिगुरुप्रजाघातिकां अग्निविषदां सन्धिच्छेदिकां वा गोभिः पाटयेत्

04.11.20 विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपिकं अग्निना दाहयेत्

04.11.21 राजाक्रोशकमन्त्रभेदकयोरनिष्टप्रवृत्तिकस्य ब्राह्मणमहानसावलेहिनश्च जिह्वां उत्पाटयेत्

04.11.22 प्रहरणावरणस्तेनं अनायुधीयं इषुभिर्घातयेत्

04.11.23 आयुधीयस्य उत्तमः

04.11.24 मेढ्रफल उपघातिनः तद् एवच्छेदयेत्

04.11.25 जिह्वानास उपघाते सन्दंशवधः

04.11.26ab एते शास्त्रेष्वनुगताः क्लेशदण्डा महात्मनाम् ।

04.11.26chd अक्लिष्टानां तु पापानां धर्म्यः शुद्धवधः स्मृतः (इति)

Chapt | Violation of maidens

04.12.01 सवर्णां अप्राप्तफलां प्रकुर्वतो हस्तवधः, चतुःशतो वा दण्डः

04.12.02 मृतायां वधः

04.12.03 प्राप्तफलां प्रकुर्वतो मध्यमाप्रदेशिनीवधो, द्विशतो वा दण्डः

04.12.04 पितुश्चावहीनं दद्यात्

04.12.05 न च प्राकाम्यं अकामायां लब्भेत

04.12.06 सकामायां चतुष्पञ्चाशत्पणो दण्डः, स्त्रियाः त्वर्धदण्डः

04.12.07 परशुल्कावरुद्धायां हस्तवधः, चतुःशतो वा दण्डः, शुल्कदानं च

04.12.08 सप्तार्तवप्रजातां वरणाद् ऊर्ध्वं अलभमानः प्रकृत्य प्राकामी स्यात्, न च पितुरवहीनं दद्यात्

04.12.09 ऋतुप्रतिरोधिभिः स्वाम्याद् अपक्रामति

04.12.10 त्रिवर्षप्रजातार्तवायाः तुल्यो गन्तुं अदोषः, ततः परं अतुल्योऽप्यनलङ्कृतायाः

04.12.11 पितृद्रव्यादाने स्तेयं भजेत

04.12.12 परं उद्दिश्यान्यस्य विन्दतो द्विशतो दण्डः

04.12.13 न च प्राकांयं अकामायां लभेत

04.12.14 कन्यां अन्यां दर्शयित्वाऽन्यां प्रयच्छतः शत्यो दण्डः तुल्यायां, हीनायां द्विगुणः

04.12.15 प्रकर्मण्यकुमार्याश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कव्ययकर्मणी च प्रतिदद्यात्

04.12.16 अवस्थाय तज्जातं पश्चात्कृता द्विगुणं दद्यात्

04.12.17 अन्यशोणित उपधाने द्विशतो दण्डः, मिथ्याऽभिशंसिनश्च पुंसः

04.12.18 शुल्कव्ययकर्मणी च जीयेत

04.12.19 न च प्राकांयं अकामायां लभेत

04.12.20 स्त्रीप्रकृता सकामा समाना द्वादशपणं दण्डं दद्यात्, प्रकर्त्री द्विगुणम्

04.12.21 अकामायाः शत्यो दण्ड आत्मरागार्थं, शुल्कदानं च

04.12.22 स्वयं प्रकृता राजदास्यं गच्छेत्

04.12.23 बहिर्ग्रामस्य प्रकृतायां मिथ्याऽभिशंसने च द्विगुणो दण्डः

04.12.24 प्रसह्य कन्यां अपहरतो द्विशतः, स-सुवर्णां उत्तमः

04.12.25 बहूनां कन्याऽपहारिणां पृथग् यथा उक्ता दण्डाः

04.12.26 गणिकादुहितरं प्रकुर्वतश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कं मातुर्भोगः षोडशगुणः

04.12.27 दासस्य दास्या वा दुहितरं अदासीं प्रकुर्वतश्चतुर्विंशतिपणो दण्डः शुल्काबन्ध्यदानं च

04.12.28 निष्क्रयानुरूपां दासीं प्रकुर्वतो द्वादशपणो दण्डो वस्त्राबन्ध्यदानं च

04.12.29 साचिव्यावकाशदाने कर्तृसमो दण्डः

04.12.30 प्रोषितपतिकां अपचरन्तीं पतिबन्धुः तत्पुरुषो वा सङ्गृह्णीयात्

04.12.31 सङ्गृहीता पतिं आकाङ्क्षेत

04.12.32 पतिश्चेत् क्षमेत विसृज्येत उभयम्

04.12.33 अक्षमायां स्त्रियाः कर्णनासाच्छेदनं, वधं जारश्च प्राप्नुयात्

04.12.34 जारं चोर इत्यभिहरतः पञ्चशतो दण्डः, हिरण्येन मुञ्चतः तद्ऽष्टगुणः

04.12.35 केशाकेशिकं सङ्ग्रहणं, उपलिङ्गनाद् वा शरीर उपभोगानां, तज्जातेभ्यः(तज्ज्ञातेभ्यः? chf.N12.60) , स्त्रीवचनाद् वा

04.12.36 परचक्राटवीहृतां ओघप्रव्यूढां अरण्येषु दुर्भिक्षे वा त्यक्तां प्रेतभाव उत्सृष्टां वा परस्त्रियं निस्तारयित्वा यथासम्भाषितं समुपभुञ्जीत

04.12.37 जातिविशिष्टां अकामां अपत्यवतीं निष्क्रयेण दद्यात्

04.12.38ab चोरहस्तान्नदीवेगाद् दुर्भिक्षाद् देशविभ्रमात् ।

04.12.38chd निस्तारयित्वा कान्तारान्नष्टां त्यक्तां मृता इति वा

04.12.39ab भुञ्जीत स्त्रियं अन्येषां यथासम्भाषितं नरः ।

04.12.39chd न तु राजप्रतापेन प्रमुक्तां स्वजनेन वा

04.12.40ab न च उत्तमां न चाकामां पूर्वापत्यवतीं न च ।

04.12.40chd ईदृशीं त्वनुरूपेण निष्क्रयेणापवाहयेत् (इति)

Chapt | Punishments for transgressions

04.13.01 ब्राह्मणं अपेयं अभक्ष्यं वा ग्रासयत उत्तमो दण्डः, क्षत्रियं मध्यमः, वैश्यं पूर्वः साहसदण्डः, शूद्रं चतुष्पञ्चाशत्पणो दण्डः

04.13.02 स्वयं ग्रसितारो निर्विषयाः कार्याः

04.13.03 परगृहाभिगमने दिवा पूर्वः साहसदण्डः, रात्रौ मध्यमः

04.13.04 दिवा रात्रौ वा सशस्त्रस्य प्रविशत उत्तमो दण्डः

04.13.05 भिक्षुकवैदेहकौ मत्त उन्मत्तौ बलाद् आपदि चातिसंनिकृष्टाः प्रवृत्तप्रवेशाश्चादण्ड्याः, अन्यत्र प्रतिषेधात्

04.13.06 स्ववेश्मनो विरात्राद् ऊर्ध्वं परिवारं आरोहतः पूर्वः साहसदण्डः, परवेश्मनो मध्यमः, ग्रामारामवाटभेदिनश्च

04.13.07 ग्रामेष्वन्तः सार्थिका ज्ञातसारा वसेयुः

04.13.08 मुषितं प्रवासितं च एषां अनिर्गतं रात्रौ ग्रामस्वामी दद्यात्

04.13.09 ग्रामान्तरेषु वा मुषितं प्रवासितं विवीताध्यक्षो दद्यात्

04.13.10 अविवीतानां चोररज्जुकः

04.13.11 तथाऽप्यगुप्तानां सीमावरोधेन विचयं दद्युः

04.13.12 असीमावरोधे पञ्चग्रामी दशग्रामी वा

04.13.13 दुर्बलं वेश्म शकटं अनुत्तब्धं ऊर्धस्तम्भं शस्त्रं अनपाश्रयं अप्रतिच्छन्नं श्वभ्रं कूपं कूटावपातं वा कृत्वा हिंसायां दण्डपारुष्यं विद्यात्

04.13.14 वृक्षच्छेदने दंयरश्मिहरणे चतुष्पदानां अदान्तसेवने वाहने वा काष्ठलोष्टपाषाणदण्डबाणबाहुविक्षेपणेषु याने हस्तिना च स्मघट्टने अपेहि इति प्रकोशन्न् अदण्ड्यः

04.13.15 हस्तिना रोषितेन हतो द्रोणान्नं मद्यकुम्भं माल्यानुलेपनं दन्तप्रमार्जनं च पटं दद्यात्

04.13.16 अश्वमेधावभृथस्नानेन तुल्यो हस्तिना वध इति पादप्रक्षालनम्

04.13.17 उदासीनवधे यातुरुत्तमो दण्डः

04.13.18 शृङ्गिणा दंष्ट्रिणा वा हिंस्यमानं अमोक्षयतः स्वामिनः पूर्वः साहसदण्डः, प्रतिक्रुष्टस्य द्विगुणः

04.13.19 शृङ्गिदंष्ट्रिभ्यां अन्योन्यं घातयतः तच्च तावच्च दण्डः

04.13.20 देवपशुं ऋषभं उक्षाणं गोकुमारीं वा वाहयतः पञ्चशतो दण्डः, प्रवासयत उत्तमः

04.13.21 लोमदोहवाहनप्रजनन उपकारिणां क्षुद्रपशूनां अदाने तच्च तावच्च दण्डः, प्रवासने च, अन्यत्र देवपितृकार्येभ्यः

04.13.22 छिन्ननस्यं भग्नयुगं तिर्यक्प्रतिमुखागतं प्रत्यासरद् वा चक्रयुक्तं याता पशुमनुष्यसम्बाधे वा हिंसायां अदण्ड्यः

04.13.23 अन्यथा यथा उक्तं मानुषप्राणिहिंसायां दण्डं अभ्यावहेत्

04.13.24 अमानुषप्राणिवधे प्राणिदानं च

04.13.25 बाले यातरि यानस्थः स्वामी दण्ड्यः, अस्वामिनि यानस्थः, प्राप्तव्यवहारो वा याता

04.13.26 बालाधिष्ठितं अपुरुषं वा यानं राजा हरेत्

04.13.27 कृत्याभिचाराभ्यां यत्परं आपादयेत् तद्ऽअपादयितव्यः

04.13.28 कामं भार्यायां अनिच्छन्त्यां कन्यायां वा दारार्थिनो भर्तरि भार्याया वा संवदनकरणम्

04.13.29 अन्यथाहिंसायां मध्यमः साहसदण्डः

04.13.30 मातापित्रोर्भगिनीं मातुलानीं आचार्याणीं स्नुषां दुहितरं भगिनीं वाऽधिचरतः त्रिलिङ्गच्छेदनं वधश्च

04.13.31 सकामा तद् एव लभेत, दासपरिचारकाहितकभुक्ता च

04.13.32 ब्राह्मण्यां अगुप्तायां क्षत्रियस्य उत्तमः, सर्वस्वं वैश्यस्य, शूद्रः कटाग्निना दह्येत

04.13.33 सर्वत्र राजभार्यागमने कुम्भीपाकः

04.13.34 श्वपाकीगमने कृतकबन्धाङ्कः परविषयं गच्छेत्, श्वपाकत्वं वा शूद्रः

04.13.35 श्वपाकस्यार्यागमने वधः, स्त्रियाः कर्णनासाच्छेदनम्

04.13.36 प्रव्रजितागमने चतुर्विंशतिपणो दण्डः

04.13.37 सकामा तद् एव लभेत

04.13.38 रूपाजीवायाः प्रसह्य उपभोगे द्वादशपणो दण्डः

04.13.39 बहूनां एकां अधिचरतां पृथक् चतुर्विंशतिपणो दण्डः

04.13.40 स्त्रियं अयोनौ गच्छतः पूर्वः साहसदण्डः, पुरुषं अधिमेहतश्च

04.13.41ab मैथुने द्वादशपणः तिर्यग्योनिष्वनात्मनः ।

04.13.41chd दैवतप्रतिमानां च गमने द्विगुणः स्मृतः

04.13.42ab अदण्ड्यदण्डने राज्ञो दण्डः त्रिंशद्गुणोऽम्भसि ।

04.13.42chd वरुणाय प्रदातव्यो ब्राह्मणेभ्यः ततः परम्

04.13.43ab तेन तत् पूयते पापं राज्ञो दण्डापचारजम् ।

04.13.43chd शास्ता हि वरुणो राज्ञां मिथ्या व्याचरतां नृषु (इति)

Book |
Chapt | Infliction of secret punishment

05.1.01 दुर्गराष्ट्रयोः कण्टकशोधनं उक्तम्

05.1.02 राजराज्ययोर्वक्ष्यामः

05.1.03 राजानं अवगृह्य उपजीविनः शत्रुसाधारणा वा ये मुख्याः तेषु गूढपुरुषप्रणिधिः कृत्यपक्ष उपग्रहो वा सिद्धिः यथा उक्तं पुरस्ताद्, उपजापोऽपसर्पो वा यथा पारग्रामिके वक्ष्यामः

05.1.04 राज्य उपघातिनः तु वल्लभाः संहता वा ये मुख्याः प्रकाशं अशक्याः प्रतिषेद्धुं दूष्याः तेषु धर्मरुचिरुपांशुदण्डं प्रयुञ्जीत

05.1.05 दूष्यमहामात्रभ्रातरं असत्कृतं सत्त्री प्रोत्साह्य राजानं दर्शयेत्

05.1.06 तं राजा दूष्यद्रव्य उपभोगातिसर्गेण दूष्ये विक्रमयेत्

05.1.07 शस्त्रेण रसेन वा विक्रान्तं तत्र एव घातयेद् भ्रातृघातकोऽयम् इति

05.1.08 तेन पारशवः परिचारिकापुत्रश्च व्याख्यातौ

05.1.09 दूष्यंमहामात्रं वा सत्त्रिप्रोत्साहितो भ्राता दायं याचेत

05.1.10 तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानं अन्यत्र वा वसन्तं तीक्ष्णो हन्ता ब्रूयाद् हतोऽयं दायकामुकः इति

05.1.11 ततो हतपक्षं उपगृह्य इतरं निगृह्णीयात्

05.1.12 दूष्यसमीपस्था वा सत्त्रिणो भ्रातरं दायं याचमानं घातेन परिभर्त्सयेयुः

05.1.13 तं रात्रौ इति समानम्

05.1.14 दूष्यमहामात्रयोर्वा यः पुत्रः पितुः पिता वा पुत्रस्य दारान् अधिचरति, भ्राता वा भ्रातुः, तयोः कापटिकमुखः कलहः पूर्वेण व्याख्यातः

05.1.15 दूष्यमहामात्रपुत्रं आत्मसम्भावितं वा सत्त्री राजपुत्रः त्वं, शत्रुभयाद् इह न्यस्तोऽसि इत्युपजपेत्

05.1.16 प्रतिपन्नं राजा रहसि पूजयेत् प्राप्तयौवराज्यकालं त्वां महामात्रभयान्नाभिषिञ्चामि इति

05.1.17 तं सत्त्री महामात्रवधे योजयेत्

05.1.18 विक्रान्तं तत्र एव घातयेत् पितृघातकोऽयम् इति

05.1.19 भिक्षुकी वा दूष्यभार्या सांवदनिकीभिरौषधीभिः संवास्य रसेनातिसन्दध्यात्

05.1.20 इत्याप्यप्रयोगः

05.1.21 दूष्यमहामात्रं अटवीं परग्रामं वा हन्तुं कान्तारव्यवहिते वा देशे राष्ट्रपालं अन्तपालं वा स्थापयितुं नागरस्थानं वा कुपितं अवग्राहितुं सार्थातिवाह्यं प्रत्यन्ते वा स-प्रत्यादेयं आदातुं फल्गुबलं तीक्ष्णयुक्तं प्रेषयेत्

05.1.22 रात्रौ दिवा वा युद्धे प्रवृत्ते तीक्ष्णाः प्रतिरोधकव्यञ्जना वा हन्युः अभियोगे हतः इति

05.1.23 यात्राविहारगतो वा दूष्यमहामात्रान् दर्शनायाह्वयेत्

05.1.24 ते गूढशस्त्रैः तीक्ष्णैः सह प्रविष्टा मध्यमकक्ष्यायां आत्मविचयं अन्तःप्रवेशनार्थं दद्युः

05.1.25 ततो दौवारिकाभिगृहीताः तीक्ष्णाः दूष्यप्रयुक्ताः स्म इति ब्रूयुः

05.1.26 ते तद्ऽभिविख्याप्य दूष्यान् हन्युः

05.1.27 तीक्ष्णस्थाने चान्ये वध्याः

05.1.28 बहिर्विहारगतो वा दूष्यान् आसन्नावासान् पूजयेत्

05.1.29 तेषां देवीव्यञ्जना वा दुःस्त्री रात्रावावासेषु गृह्येत इति समानं पूर्वेण

05.1.30 दूष्यमहामात्रं वा सूदो भक्षकारो वा ते शोभनः इति स्तवेन भक्ष्यभोज्यं याचेत, बहिर्वा क्वचिद् अध्वगतः पानीयम्

05.1.31 तद्.उभयं रसेन योजयित्वा प्रतिस्वादने तावेव उपयोजयेत्

05.1.32 तद्ऽभिविख्याप्य रसदौ इति घातयेत्

05.1.33 अभिचारशीलं वा सिद्धव्यञ्जनो गोधाकूर्मकर्कटककूटानां लक्षण्यानां अन्यतमप्राशनेन मनोरथान् अवाप्स्यसि इति ग्राहयेत्

05.1.34 प्रतिपन्नं कर्मणि रसेन लोहमुसलैर्वा घातयेत् कर्मव्यापदा हतः इति

05.1.35 चिकित्सकव्यञ्जनो वा दौरात्मिकं असाध्यं वा व्याधिं दूष्यस्य स्थापयित्वा भैषज्याहारयोगेषु रसेनातिसन्दध्यात्

05.1.36 सूदारालिकव्यञ्जना वा प्रणिहिता दूष्यं रसेनातिसन्दध्युः

05.1.37 इत्युपनिषत्प्रतिषेधः

05.1.38 उभयदूष्यप्रतिषेधः तु

05.1.39 यत्र दूष्यः प्रतिषेद्धव्यः तत्र दूष्यं एव फल्गुबलतीक्ष्णयुक्तं प्रेषयेत्, गच्छ, अमुष्मिन् दुर्गे राष्ट्रे वा सैन्यं उत्थापय हिरण्यं वा, वल्लभाद् वा हिरण्यं आहारय, वल्लभकन्यां वा प्रसह्यानय,
दुर्गसेतुवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मणां अन्यतमद् वा कारय राष्ट्रपाल्यं अन्तपाल्यं वायश्च त्वा प्रतिषेधयेन्न वा ते साहाय्यं दद्यात् स बन्धव्यः स्यात् इति

05.1.40 तथैव इतरेषां प्रेषयेद् अमुष्याविनयः प्रतिषेद्धव्यः इति

05.1.41 तं एतेषु कलहस्थानेषु कर्मप्रतिघातेषु वा विवदमानं तीक्ष्णाः शस्त्रं पातयित्वा प्रच्छन्नं हन्युः

05.1.42 तेन दोषेण इतरे नियन्तव्याः

05.1.43 पुराणां ग्रामाणां कुलानां वा दूष्याणां सीमाक्षेत्रखलवेश्ममर्यादासु द्रव्य उपकरणसस्यवाहनहिंसासु प्रेक्षाकृत्य उत्सवेषु वा समुत्पन्ने कलहे तीक्ष्णैरुत्पादिते वा तीक्ष्णाः शस्त्रं पातयित्वा ब्रूयुः एवं क्रियन्ते येऽमुना कलहायन्तेः इति

05.1.44 तेन दोषेण इतरे नियन्तव्याः

05.1.45 येषां वा दूष्याणां जातमूलाः कलहाः तेषां क्षेत्रखलवेश्मान्यादीपयित्वा बन्धुसम्बन्धिषु वाहनेषु वा तीक्ष्णाः शस्त्रं पातयित्वा तथैव ब्रूयुः अमुना प्रयुक्ताः स्मः इति

04.4.46 तेन दोषेण इतरे नियन्तव्याः

05.1.47 दुर्गराष्ट्रदूष्यान् वा सत्त्रिणः परस्परस्यावेशनिकान् कारयेयुः

05.1.48 तत्र रसदा रसं दद्युः

05.1.49 तेन दोषेण इतरे नियन्तव्याः

05.1.50 भिक्षुकी वा दूष्यराष्ट्रमुख्यं दूष्यराष्ट्रमुख्यस्य भार्या स्नुषा दुहिता वा कामयते इत्युपजपेत्

05.1.51 प्रतिपन्नस्याभरणं आदाय स्वामिने दर्शयेत् असौ ते मुख्यो यौवन उत्सिक्तो भार्या स्नुषां दुहितरं वाऽभिमन्यते इति

05.1.52 तयोः कलहो रात्रौ इति समानम्

05.1.53 दूष्यदण्ड उपनतेषु तु - युवराजः सेनापतिर्वा किञ्चिद् अपकृत्यापक्रान्तो विक्रमेत

05.1.54 ततो राजा दूष्यदण्ड उपनतान् एव प्रेषयेत् फल्गुबलतीक्ष्णयुक्तान् इति समानाः सर्व एव योगाः

05.1.55 तेषां च पुत्रेष्वनुक्षियत्सु यो निर्विकारः स पितृदायं लभेत

05.1.56 एवं अस्य पुत्रपौत्रान् अनुवर्तते राज्यं अपास्तपुरुषदोषम्

05.1.57ab स्वपक्षे परपक्षे वा तूष्णीं दण्डं प्रयोजयेत् ।

05.1.57chd आयत्यां च तदात्वे च क्षमावान् अविशङ्कितः (इति)

Chapt | Replenishment of the treasurय्

05.2.01 कोशं अकोशः प्रत्युत्पन्नार्थकृच्छ्रः सङ्गृह्णीयात्

05.2.02 जनपदं महान्तं अल्पप्रमाणं वाऽदेवमातृकं प्रभूतधान्यं धान्यस्यांशं तृतीयं चतुर्थं वा याचेत, यथासारं मध्यं अवरं वा

05.2.03 दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्म उपकारिणं प्रत्यन्तं अल्पप्रमाणं वा न याचेत

05.2.04 धान्यपशुहिरण्यादि निविशमानाय दद्यात्

05.2.05 चतुर्थं अंशं धान्यानां बीजभक्तशुद्धं च हिरण्येन क्रीणीयात्

05.2.06 अरण्यजातं श्रोत्रियस्वं च परिहरेत्

05.2.07 तद् अप्यनुग्रहेण क्रीणीयात्

05.2.08 तस्याकरणे वा समाहर्तृपुरुषा ग्रीष्मे कर्षकाणां उद्वापं कारयेयुः

05.2.09 प्रमादावस्कन्नस्यात्ययं द्विगुणं उदाहरन्तो बीजकाले बीजलेख्यं कुर्युः

05.2.10 निष्पन्ने हरितपक्वादानं वारयेयुः, अन्यत्र शाककटभङ्गमुष्टिभ्यां देवपितृपूजादानार्थं गवार्थं वा

05.2.11 भिक्षुकग्रामभृतकार्थं च राशिमूलं परिहरेयुः

05.2.12 स्वसस्यापहारिणः प्रतिपातोऽष्टगुणः

05.2.13 परसस्यापहारिणः पञ्चाशद्गुणः सीताऽत्ययः, स्ववर्गस्य, बाह्यस्य तु वधः

05.2.14 चतुर्थं अंशं धान्यानां षष्ठं वन्यानां तूलचलाक्षाक्षौमवल्ककार्पासरौमकौशेयकौषधगन्धपुष्पफलशाकपण्यानां काष्ठवेणुमांसवल्लूराणां च गृह्णीयुः, दन्ताजिनस्यार्धम्

05.2.15 तद् अनिसृष्टं विक्रीणानस्य पूर्वः साहसदण्डः

05.2.16 इति कर्षकेषु प्रणयः

05.2.17 सुवर्णरजतवज्रमणिमुक्ताप्रवालाश्वहस्तिपण्याः पञ्चाशत्कराः

05.2.18 सूत्रवस्त्रताम्रवृत्तकंसगन्धभैषज्यशीधुपण्याश्चत्वारिंशत्कराः

05.2.19 धान्यरसलोहपण्याः शकटव्यवहारिणश्च त्रिंशत्कराः

05.2.20 काचव्यवहारिणो महाकारवश्च विंशतिकराः

05.2.21 क्षुद्रकारवो बन्धकीपोषकाश्च दशकराः

05.2.22 काष्ठवेणुपाषाणमृद्भाण्डपक्वान्नहरितपण्याः पञ्चकराः

05.2.23 कुशीलवा रूपाजीवाश्च वेतनार्धं दद्युः

05.2.24 हिरण्यकरं कर्मण्यान् आहारयेयुः, न च एषां कञ्चिद् अपराधं परिहरेयुः

05.2.25 ते ह्यपरिगृहीतं अभिनीय विक्रीणीरन्

05.2.26 इति व्यवहारिषु प्रणयः

05.2.27 कुक्कुटसूकरं अर्धं दद्यात्, क्षुद्रपशवः षड्भागं, गोमहिषाश्वतरखर उष्ट्राश्च दशभागम्

05.2.28 बन्धकीपोषका राजप्रेष्याभिः परमरूपयौवनाभिः कोशं संहरेयुः

05.2.29 इति योनिपोषकेषु प्रणयः

05.2.30 सकृद् एव न द्विः प्रयोज्यः

05.2.31 तस्याकरणे वा समाहर्ता कार्यं अपदिश्य पौरजानपदान् भिक्षेत

05.2.32 योगपुरुषाश्चात्र पूर्वं अतिमात्रं दद्युः

05.2.33 एतेन प्रदेशेन राजा पौरजानपदान् भिक्षेत

05.2.34 कापटिकाश्च एनान् अल्पं प्रयच्छतः कुत्सयेयुः

05.2.35 सारतो वा हिरण्यं आढ्यान् याचेत, यथा उपकारं वा, स्ववशा वा यद् उपहरेयुः

05.2.36 स्थानच्छत्रवेष्टनविभूषाश्च एषां हिरण्येन प्रयच्छेत्

05.2.37 पाषण्डसङ्घद्रव्यं अश्रोत्रिय उपभोग्यं देवद्रव्यं वा कृत्यकराः प्रेतस्य दग्धगृहस्य वा हस्ते न्यस्तं इत्युपहरेयुः

05.2.38 देवताऽध्यक्षो दुर्गराष्ट्रदेवतानां यथास्वं एकस्थं कोशं कुर्यात्, तथैव च उपहरेत्

05.2.39 दैवतचैत्यं सिद्धपुण्यस्थानं औपपादिकं वा रात्रावुत्थाप्य यात्रासमाजाभ्यां आजीवेत्

05.2.40 चैत्य उपवनवृक्षेण वा देवताऽभिगमनं अनार्तवपुष्पफलयुक्तेन ख्यापयेत्

05.2.41 मनुष्यकरं वा वृक्षे रक्षोभयं प्ररूपयित्वा सिद्धव्यञ्जनाः पौरजानपदानां हिरण्येन प्रतिकुर्युः

05.2.42 सुरुङ्गायुक्ते वा कूपे नागं अनियतशिरस्कं हिरण्य उपहारेण दर्शयेत्

05.2.43 नागप्रतिमायां अन्तश्छन्नायां चैत्यच्छिद्रे वल्मीकच्छिद्रे वा सर्पदर्शनं आहारेण प्रतिबद्धसंज्ञं कृत्वा श्रद्दधानानां दर्शयेत्

05.2.44 अश्रद्दधानानां आचमनप्रोक्षणेषु रसं उपचार्य देवताऽभिशापं ब्रूयात्, अभित्यक्तं वा दंशयित्वा

05.2.45 योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्

05.2.46 वैदेहकव्यञ्जनो वा प्रभूतपण्यान्तेवासी व्यवहरेत

05.2.47 स यदा पण्यमूल्ये निक्षेपप्रयोगैरुपचितः स्यात् तदा एनं रात्रौ मोषयेत्

05.2.48 एतेन रूपदर्शकः सुवर्णकारश्च व्याख्यातौ

05.2.49 वैदेहकव्यञ्जनो वा प्रख्यातव्यवहारः प्रहवणनिमित्तं याचितकं अवक्रीतकं वा रूप्यसुवर्णभाण्डं अनेकं गृह्णीयात्

05.2.50 समाजे वा सर्वपण्यसन्दोहेन प्रभूतं हिरण्यसुवर्णं ऋणं गृह्णीयात्, प्रतिभाण्डमूल्यं च

05.2.51 तद् उभयं रात्रौ मोषयेत्

05.2.52 साध्वीव्यञ्जनाभिः स्त्रीभिर्दूष्यान् उन्मादयित्वा तासां एव वेश्मस्वभिगृह्य सर्वस्वान्याहरेयुः

05.2.53 दूष्यकुल्यानां वा विवादे प्रत्युत्पन्ने रसदाः प्रणिहिता रसं दद्युः

05.2.54 तेन दोषेण इतरे पर्यादातव्याः

05.2.55 दूष्यं अभित्यक्तो वा श्रद्धेयापदेशं पण्यं हिरण्यनिक्षेपं ऋणप्रयोगं दायं वा याचेत

05.2.56 दासशब्देन वा दूष्यं आलम्बेत, भार्यां अस्य स्नुषां दुहितरं वा दासीशब्देन भार्याशब्देन वा

05.2.57 तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानं अन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात् हतोऽयं अर्थकामुकः इति

05.2.58 तेन दोषेण इतरे पर्यादातव्याः

05.2.59 सिद्धव्यञ्जनो वा दूष्यं जम्भकविद्याभिः प्रलोभयित्वा ब्रूयात् अक्षयहिरण्यं राजद्वारिकं स्त्रीहृदयं अरिव्याधिकरं आयुष्यं पुत्रीयं वा कर्म जानामि इति

05.2.60 प्रतिपन्नं चैत्यस्थाने रात्रौ प्रभूतसुरामांसगन्धं उपहारं कारयेत्

05.2.61 एकरूपं चात्र हिरण्यं पूर्वनिखातं प्रेताङ्गं प्रेतशिशुर्वा यत्र निहितः स्यात्, ततो हिरण्यं अस्य दर्शयेद् अत्यल्पम् इति च ब्रूयात्

05.2.62 प्रभूतहिरण्यहेतोः पुनरुपहारः कर्तव्य इति स्वयं एव एतेन हिरण्येन श्वोभूते प्रभूतं औपहारिकं क्रीणीहि इति

05.2.63 स तेन हिरण्येनाऽउपहारिकक्रये गृह्णेत

05.2.64 मातृव्यञ्जनया वा पुत्रो मे त्वया हतः इत्यवकुपिता स्यात्

05.2.65 संसिद्धं एवास्य रात्रियागे वनयागे वनक्रीडायां वा प्रवृत्तायां तीक्ष्णा विशस्याभित्यक्तं अतिनयेयुः

05.2.66 दूष्यस्य वा भृतकव्यञ्जनो वेतनहिरण्ये कूटरूपं प्रक्षिप्य प्ररूपयेत्

05.2.67 कर्मकरव्यञ्जनो वा गृहे कर्म कुर्वाणः स्तेनकूटरूपकारक उपकरणं उपनिदध्यात्, चिकित्सकव्यञ्जनो वा गरं अगदापदेशेन

05.2.68 प्रत्यासन्नो वा दूष्यस्य सत्त्री प्रणिहितं अभिषेकभाण्डं अमित्रशासनं च कापटिकमुखेनाचक्षीत, कारणं च ब्रूयात्

05.2.69 एवं दूष्येष्वधार्मिकेषु च वर्तेत, न इतरेषु

05.2.70ab पक्वं पक्वं इवारामात् फलं राज्याद् अवाप्नुयात् ।

05.2.70chd आत्मच्छेदभयाद् आमं वर्जयेत् कोपकारकम् (इति)

Chapt | Salaries of state servants

05.3.01 दुर्गजनपदशक्त्या भृत्यकर्म समुदयपादेन स्थापयेत्, कार्यसाधनसहेन वा भृत्यलाभेन

05.3.02 शरीरं अवेक्षेत, न धर्मार्थौ पीडयेत्

05.3.03 ऋत्विग्ऽअचार्यमन्त्रिपुरोहितसेनापतियुवराजराजमातृराजमहिष्योऽष्टचत्वारिंशत्साहस्राः

05.3.04 एतावता भरणेनानास्पद्यत्वं अकोपकं च एषां भवति

05.3.05 दौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसंनिधातारश्चतुर्विंशतिसाहस्राः

05.3.06 एतावता कर्मण्या भवन्ति

05.3.07 कुमारकुमारमातृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषद्राष्ट्रान्तपालाश्च द्वादशसाहस्राः

05.3.08 स्वामिपरिबन्धबलसहाया ह्येतावता भवन्ति

05.3.09 श्रेणीमुख्या हस्त्य्ऽश्वरथमुख्याः प्रदेष्टारश्चाष्टसाहस्राः

05.3.10 स्ववर्गानुकर्षिणो ह्येतावता भवन्ति

05.3.11 पत्त्य्ऽश्वरथहस्त्य्ऽध्यक्षा द्रव्यहस्तिवनपालाश्च चतुःसाहस्राः

05.3.12 रथिकानीकस्थचिकित्सकाश्चदमकवर्धकयो योनिपोषकाश्च द्विसाहस्राः

05.3.13 कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिकसूतमागधाः पुरोहितपुरुषाः सर्वाध्यक्षाश्च साहस्राः

05.3.14 शिल्पवन्तः पादाताः सङ्ख्यायकलेखकादिवर्गश्च पञ्चशताः

05.3.15 कुशीलवाः त्वर्धतृतीयशताः, द्विगुणवेतनाश्च एषां तूर्यकराः

05.3.16 कारुशिल्पिनो विंशतिशतिकाः

05.3.17 चतुष्पदद्विपदपरिचारकपारिकर्मिकाऽउपस्थायिकपालकविष्टिबन्धकाः षष्टिवेतनाः, आर्ययुक्तारोहकमाणवकशैलखनकाः सर्व ऽउपस्थायिनश्च

05.3.18 आचार्या विद्यावन्तश्च पूजावेतनानि यथाऽर्हं लभेरन् पञ्चशतावरं सहस्रपरम्

05.3.19 दशपणिको योजने दूतो मध्यमः, दश ऽउत्तरे द्विगुणवेतन आयोजनशताद् इति

05.3.20 समानविद्येभ्यः त्रिगुणवेतनो राजा राजसूयादिषु क्रतुषु

05.3.21 राज्ञः सारथिः साहस्रः

05.3.22 कापटिक उदास्थितगृहपतिकवैदेहकतापसव्यञ्जनाः साहस्राः

05.3.23 ग्रामभृतकसत्त्रितीक्ष्णरसदभिक्षुक्यः पञ्चशताः

05.3.24 चारसञ्चारिणोऽर्धतृतीयशताः, प्रयासवृद्धवेतना वा

05.3.25 शतवर्गसहस्रवर्गाणां अध्यक्षा भक्तवेतनलाभं आदेशं विक्षेपं च कुर्युः

05.3.26 अविक्षेपो राजपरिग्रहदुर्गराष्ट्ररक्षावेक्षणेषु च

05.3.27 नित्यमुख्याः स्युरनेकमुख्याश्च

05.3.28 कर्मसु मृतानां पुत्रदारा भक्तवेतनं लभेरन्

05.3.29 बालवृद्धव्याधिताश्च एषां अनुग्राह्याः

05.3.30 प्रेतव्याधितसूतिकाकृत्येषु च एषां अर्थमानकर्म कुर्यात्

05.3.31 अल्पकोशः कुप्यपशुक्षेत्राणि दद्यात्, अल्पं च हिरण्यम्

05.3.32 शून्यं वा निवेशयितुं अभ्युत्थितो हिरण्यं एव दद्यात्, न ग्रामं ग्रामसञ्जातव्यवहारस्थापनार्थम्

05.3.33 एतेन भृतानां अभृतानां च विद्याकर्मभ्यां भक्तवेतनविशेषं च कुर्यात्

05.3.34 षष्टिवेतनस्याढकं कृत्वा हिरण्यानुरूपं भक्तं कुर्यात्

05.3.35 पत्त्यश्वरथद्विपाः सूर्य उदये बहिः सन्धिदिवसवर्जं शिल्पयोग्याः कुर्युः

05.3.36 तेषु राजा नित्ययुक्तः स्यात्, अभीक्ष्णं च एषां शिल्पदर्शनं कुर्यात्

05.3.37 कृतनर इन्द्राङ्कं शस्त्रावरणं आयुधागारं प्रवेशयेत्

05.3.38 अशस्त्राश्चरेयुः, अन्यत्र मुद्राऽनुज्ञातात्

05.3.39 नष्टंविनष्टं वा द्विगुणं दद्यात्

05.3.40 विध्वस्तगणनां च कुर्यात्

05.3.41 सार्थिकानां शस्त्रावरणं अन्तपाला गृह्णीयुः, समुद्रं अवचारयेयुर्वा

05.3.42 यात्रां अभ्युत्थितो वा सेनां उद्योजयेत्

05.3.43 ततो वैदेहकव्यञ्जनाः सर्वपण्यान्यायुधीयेभ्यो यात्राकाले द्विगुणप्रत्यादेयानि दद्युः

05.3.44 एवं राजपण्ययोगविक्रयो वेतनप्रत्यादानं च भवति

05.3.45 एवं अवेक्षितायव्ययः कोशदण्डव्यसनं नावाप्नोति

05.3.46 इति भक्तवेतनविकल्पः

05.3.47ab सत्त्रिणश्चायुधीयानां वेश्याः कारुकुशीलवाः ।

05.3.47chd दण्डवृद्धाश्च जानीयुः शौचाशौचं अतन्द्रिताः (इति)

Chapt | Proper conduct fora dependant

05.4.01 लोकयात्राविद् राजानं आत्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत

05.4.02 यं वा मन्येत यथाऽहं आश्रय ईप्सुरेवं असौ विनय ईप्सुराभिगामिकगुणयुक्तः इति, द्रव्यप्रकृतिहीनं अप्येनं आश्रयेत, न त्वेवानात्मसम्पन्नम्

05.4.03 अनात्मवा हि नीतिशास्त्रद्वेषाद् अनर्थ्यसंयोगाद् वा प्राप्यापि महद् ऐश्वर्यं न भवति

05.4.04 आत्मवति लब्धावकाशः शास्त्रानुयोगं दद्यात्

05.4.05 अविसंवादाद्द् हि स्थानस्थैर्यं अवाप्नोति

05.4.06 मतिकर्मसु पृष्ठः तदात्वे चायत्यां च धर्मार्थसंयुक्तं समर्थं प्रवीणवद् अपरिषद्भीरुः कथयेत्

05.4.07 ईप्सितः पणेत धर्मार्थानुयोगं अविशिष्टेषु बलवत्संयुक्तेषु दण्डधारणं मत्संयोगे तदात्वे च दण्डधारणं इति न कुर्याः, पक्षं वृत्तिं गुह्यं च मे न उपहन्याः, संज्ञया च त्वां कामक्रोधदण्डनेषु वारयेयम् इति

05.4.08 आदिष्टः प्रदिष्टायां भूमावनुज्ञातः प्रविशेत्, उपविशेच्च पार्श्वतः संनिकृष्टविप्रकृष्टः परासनम्

05.4.09 विगृह्य कथनं असभ्यं अप्रत्यक्षं अश्रद्धेयं अनृतं च वाक्यं उच्चैरनर्मणि हासं वातष्ठीवने च शब्दवती न कुर्यात्

05.4.10 मिथः कथनं अन्येन, जनवादे द्वन्द्वकथनं, राज्ञो वेषं उद्धतकुहकानां च, रत्नातिशयप्रकाशाभ्यर्थनं, एकाक्ष्य्.ओष्ठनिर्भोगं भ्रुकुटीकर्म वाक्यावक्षेपणं च ब्रुवति, बलवत् संयुक्तविरोधं, स्त्रीभिः स्त्रीदर्शिभिः सामन्तदूतैर्द्वेष्यपक्षावक्षिप्तान् अर्थ्यैश्च प्रतिसंसर्गं एकार्थचर्यां सङ्घातं च वर्जयेत्

05.4.11ab अहीनकालं राजार्थं स्वार्थं प्रियहितैः सह ।

05.4.11chd परार्थं देशकाले च ब्रूयाद् धर्मार्थसंहितम्

05.4.12ab पृष्टः प्रियहितं ब्रूयान्न ब्रूयाद् अहितं प्रियम् ।

05.4.12chd अप्रियं वा हितं ब्रूयात्शृण्वतोऽनुमतो मिथः

05.4.13ab तूष्णीं वा प्रतिवाक्ये स्याद् वेष्यादींश्च न वर्णयेत् ।

05.4.13chd अप्रिया अपि दक्षाः स्युः तद्भावाद् ये बहिष्कृताः

05.4.14ab अनर्थ्याश्च प्रिया दृष्टाश्चित्तज्ञानानुवर्तिनः ।

05.4.14chd अभिहास्येष्वभिहसेद् घोरहासांश्च वर्जयेत् (इति)

05.4.15ab परात् सङ्क्रामयेद् घोरं न च घोरं परे वदेत् ।

05.4.15chd तितिक्षेतात्मनश्चैव क्षमावान् पृथिवीसमः

05.4.16ab आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।

05.4.16chd अग्नाविव हि सम्प्रोक्ता वृत्ती राजा उपजीविनाम्

05.4.17ab एकदेशं दहेद् अग्निः शरीरं वा परं गतः ।

05.4.17chd स-पुत्रदारं राजा तु घातयेद् अर्धयेत वा (इति)

Chapt | Proper behaviour for a courtier

05.5.01 नियुक्तः कर्मसु व्ययविशुद्धं उदयं दर्शयेत्

05.5.02 आभ्यन्तरं बाह्यं गुह्यं प्रकाश्यं आत्ययिकं उपेक्षितव्यं वा कार्यं इदं एवम् इति विशेषयेच्च

05.5.03 मृगयाद्यूतमद्यस्त्रीषु प्रसक्तं न एनं अनुवर्तेत प्रशंसाभिः

05.5.04 आसन्नश्चास्य व्यसन उपघाते प्रयतेत, पर उपजापातिसन्धान उपधिभ्यश्च रक्षेत्

05.5.05 इङ्गिताकारौ चास्य लक्षयेत्

05.5.06 कामद्वेषहर्षदैन्यव्यवसायभयद्वन्द्वविपर्यासं इङ्गिताकाराभ्यां हि मन्त्रसंवरणार्थं आचरति प्राज्ञः

05.5.07 दर्शने प्रसीदति, वाक्यं प्रतिगृह्णाति, आसनं ददाति, विविक्तो दर्शयते, शङ्कास्थाने नातिशङ्कते, कथायां रमते, परिज्ञाप्येष्ववेक्षते, पथ्यं उक्तं सहते, स्मयमानो नियुङ्क्ते, हस्तेन स्पृशति, श्लाघ्ये न उपहसति, परोक्षं गुणं ब्रवीति, भक्ष्येषु स्मरति, सह विहारं याति, व्यसनेऽभ्युपपद्यते, तद्भक्तीन् पूजयति, गुह्यं आचष्टे, मानं वर्धयति, अर्थं करोति, अनर्थं प्रतिहन्ति - इति तुष्टज्ञानम्

05.5.08 एतद् एव विपरीतं अतुष्टस्य, भूयश्च वक्ष्यामः

05.5.09 सन्दर्शने कोपः, वाक्यस्याश्रवणप्रतिषेधौ, आसनचक्षुषोरदानं, वर्णस्वरभेदः, एकाक्षिभ्रुकुट्य्.ओष्ठनिर्भोगः, स्वेदश्वासस्मितानां अस्थान उत्पत्तिः, परमन्त्रणं, अकस्माद्व्रजनं, वर्धनं अन्यस्य, भूमिगात्रविलेखनं, अन्यस्य उपतोदनं, विद्यावर्णदेशकुत्सा, समदोषनिन्दा, प्रतिदोषनिन्दा, प्रतिलोमस्तवः, सुकृतानवेक्षणं, दुष्कृतानुकीर्तनं, पृष्ठावधानं, अतित्यागः, मिथ्याऽभिभाषणं, राजदर्शिनां च तद्वृत्तान्यत्वम्

05.5.10 वृत्तिविकारं चावेक्षेताप्यमानुषाणाम्

05.5.11 अयं उच्चैः सिञ्चति इति कात्यायनः प्रवव्राज, क्रौञ्चोऽपसव्यम् इति कणिङ्को भारद्वाजः, तृणम् इति दीर्घश्चारायणः, शीता शाटी इति घोटमुखः, हस्ती प्रत्यौक्षीत् इति किञ्जल्कः, रथाश्वं प्राशंसीत् इति पिशुनः, प्रतिरवणे शुनः पिशुनपुत्रः

05.5.12 अर्थमानावक्षेपे च परित्यागः

05.5.13 स्वामिशीलं आत्मनश्च किल्बिषं उपलभ्य वा प्रतिकुर्वीत

05.5.14 मित्रं उपकृष्टं वाऽस्य गच्छेत्

05.5.15ab तत्रस्थो दोषनिर्घातं मित्रैर्भर्तरि चाचरेत् ।

05.5.15chd ततो भर्तरि जीवे वा मृते वा पुनराव्रजेत् (इति)

Chapt | Continuance of the kingdom

Continuous sovereignty

05.6.01 राजव्यसनं एवं अमात्यः प्रतिकुर्वीत

05.6.02 प्राग् एव मरणाबाधभयाद् राज्ञः प्रियहित उपग्रहेण मासद्विमासान्तरं दर्शनं स्थापयेद् देशपीडाऽपहं अमित्रापहं आयुष्यं पुत्रीयं वा कर्म राजा साधयति इत्यपदेशेन

05.6.03 राजव्यञ्जनं अरूपवेलायां प्रकृतीनां दर्शयेत्, मित्रामित्रदूतानां च

05.6.04 तैश्च यथा उचितां सम्भाषां अमात्यमुखो गच्छेत्

05.6.05 दौवारिकान्तर्वंशिकमुखश्च यथा उक्तं राजप्रणिधिं अनुवर्तयेत्

05.6.06 अपकारिषु च हेडं प्रसादं वा प्रकृतिकान्तं दर्शयेत्, प्रसादं एव उपकारिषु

05.6.07 आप्तपुरुषाधिष्ठितौ दुर्गप्रत्यन्तस्थौ वा कोशदण्डावेकस्थौ कारयेत्, कुल्यकुमारमुख्यांश्चान्यापदेशेन

05.6.08 यश्च मुख्यः पक्षवान् दुर्गाटवीस्थो वा वैगुण्यं भजेत तं उपग्राहयेत्

05.6.09 बह्वऽअबाधं वा यात्रां प्रेषयेत्, मित्रकुलं वा

05.6.10 यस्माच्च सामन्ताद् आबाधं पश्येत् तं उत्सवविवाहहस्तिबन्धनाश्वपण्यभूमिप्रदानापदेशेनावग्राहयेत्, स्वमित्रेण वा

05.6.11 ततः सन्धिं अदूष्यं कारयेत्

05.6.12 आटविकामित्रैर्वा वैरं ग्राहयेत्

05.6.13 तत्कुलीनं अपरुद्धं वा भूंय्.एकदेशेन उपग्राहयेत्

05.6.14 कुल्यकुमारमुख्य उपग्रहं कृत्वा वा कुमारं अभिषिक्तं एव दर्शयेत्

05.6.15 दाण्डकर्मिकवद् वा राज्यकण्टकान् उद्धृत्य राज्यं कारयेत्

05.6.16 यदि वा कश्चिन् मुख्यः सामन्तादीनां अन्यतमः कोपं भजेत तं एहि, राजानं त्वा करिष्यामि इत्यावाहयित्वा घातयेत्

05.6.17 आपत्प्रतीकारेण वा साधयेत्

05.6.18 युवराजे वा क्रमेण राज्यभारं आरोप्य राजव्यसनं ख्यापयेत्

05.6.19 परभूमौ राजव्यसने मित्रेणामित्रव्यञ्जनेन शत्रोः सन्धिं अवस्थाप्यापगच्छेत्

05.6.20 सामन्तादीनां अन्यतमं वाऽस्य दुर्गे स्थापयित्वाऽपगच्छेत्

05.6.21 कुमारं अभिषिच्य वा प्रतिव्यूहेत

05.6.22 परेणाभियुक्तो वा यथा उक्तं आपत्प्रतीकारं कुर्यात्

05.6.23 एवं एकाइश्वर्यं अमात्यः कारयेद् इति कौटिल्यः

05.6.24 न एवम् इति भारद्वाजः

05.6.25 प्रम्रियमाणे वा राजन्यमात्यः कुल्यकुमारमुख्यान् परस्परं मुख्येषु वा विक्रमयेत्

05.6.26 विक्रान्तं प्रकृतिकोपेन घातयेत्

05.6.27 कुल्यकुमारमुख्यान् उपांशुदण्डेन वा साधयित्वा स्वयं राज्यं गृह्णीयात्

05.6.28 राज्यकारणाद्ध् हि पिता पुत्रान् पुत्राश्च पितरं अभिद्रुह्यन्ति, किं अङ्ग पुनरमात्यप्रकृतिर्ह्येकप्रग्रहो राज्यस्य

05.6.29 तत् स्वयं उपस्थितं नावमन्येत

05.6.30 स्वयं आरूढा हि स्त्री त्यज्यमानाऽभिशपति इति लोकप्रवादः

05.6.31ab कालश्च सकृद् अभ्येति यं नरं कालकाङ्क्षिणम् ।

05.6.31chd दुर्लभः स पुनः तस्य कालः कर्म चिकीर्षतः

05.6.32 प्रकृतिकोपकं अधर्मिष्ठं अनैकान्तिकं च एतद् इति कौटिल्यः

05.6.33 राजपुत्रं आत्मसम्पन्नं राज्ये स्थापयेत्

05.6.34 सम्पन्नाभावेऽव्यसनिनं कुमारं राजकन्यां गर्भिणीं देवीं वा पुरस्कृत्य महामात्रान् संनिपात्य ब्रूयात् अयं वो निक्षेपः, पितरं अस्यावेक्षध्वं सत्त्वाभिजनं आत्मनश्च, ध्वजमात्रोऽयं भवन्त एव स्वामिनः, कथं वा क्रियताम् इति

05.6.35 तथा ब्रुवाणं योगपुरुषा ब्रूयुः कोऽन्यो भवत्पुरोगाद् अस्माद् राज्ञश्चातुर्वर्ण्यं अर्हति पालयितुम् इति

05.6.36 तथा इत्यमात्यः कुमारं राजकन्यां गर्भिणीं देवीं वाऽधिकुर्वीत, बन्धुसम्बन्धिनां मित्रामित्रदूतानां च दर्शयेत्

05.6.37 भक्तवेतनविशेषं अमात्यानां आयुधीयानां च कारयेत्, भूयश्चायं वृद्धः करिष्यति इति ब्रूयात्

05.6.38 एवं दुर्गराष्ट्रमुख्यान् आभाषेत, यथाऽर्हं च मित्रामित्रपक्षम्

05.6.39 विनयकर्मणि च कुमारस्य प्रयतेत

05.6.40 कन्यायां समानजातीयाद् अपत्यं उत्पाद्य वाऽभिषिञ्चेत्

05.6.41 मातुश्चित्तक्षोभभयात् कुल्यं अल्पसत्त्वं छात्रं च लक्षण्यं उपनिदध्यात्

05.6.42 ऋतौ च एनां रक्षेत्

05.6.43 न चात्मार्थं कञ्चिद् उत्कृष्टं उपभोगं कारयेत्

05.6.44 राजार्थं तु यानवाहनाभरणवस्त्रस्त्रीवेश्मपरिवापान् कारयेत्

05.6.45ab यौवनस्थं च याचेत विश्रमं चित्तकारणात् ।

05.6.45chd परित्यजेद् अतुष्यन्तं तुष्यन्तं चानुपालयेत्

05.6.46ab निवेद्य पुत्ररक्षाऽर्थं गूढसारपरिग्रहान् ।

05.6.46chd अरण्यं दीर्घसत्त्रं वा सेवेतारुच्यतां गतः

05.6.47ab मुख्यैरवगृहीतं वा राजानं तत्प्रियाश्रितः ।

05.6.47chd इतिहासपुराणाभ्यां बोधयेद् अर्थशास्त्रवित्

05.6.48ab सिद्धव्यञ्जनरूपो वा योगं आस्थाय पार्थिवम् ।

05.6.48chd लभेत लब्ध्वा दूष्येषु दाण्डकर्मिकं आचरेत् (इति)

Book | मण्डलयोनिः षष्ठं अधिकरणम्

Chapt | षण्ँअवतितमं प्रकरणं - प्रकृतिसम्पदः

06.1.01 स्वाम्य्ऽमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः

06.1.02 तत्र स्वामिसम्पत्

06.1.03 महाकुलीनो दैवबुद्धिसत्त्वसम्पन्नो वृद्धदर्शी धार्मिकः सत्यवाग् अविसंवादकः कृतज्ञः स्थूललक्षो महा उत्साहोऽदीर्घसूत्रः शक्यसामन्तो दृढबुद्धिरक्षुद्रपरिषत्को विनयकाम इत्याभिगामिका गुणाः

06.1.04 शुश्रूषाश्रवणग्रहणधारणविज्ञान ऊहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः

06.1.05 शौर्यं अमर्षः शीघ्रता दाक्ष्यं च उत्साहगुणाः

06.1.06 वाग्मी प्रगल्भः स्मृतिमतिबलवान् उदग्रः स्व्ऽवग्रहः कृतशिल्पोऽव्यसनो दण्डनाय्युपकारापकारयोर्दृष्टप्रतीकारी ह्रीमान् आपत्प्रकृत्योर्विनियोक्ता दीर्घदूरदर्शी देशकालपुरुषकारकार्यप्रधानः सन्धिविक्रमत्यागसम्यमपणपरच्छिद्रविभागी संवृतोऽदीनाभिहास्यजिह्मभ्रुकुटीक्षणः कामक्रोधलोभस्तम्भचापल उपतापपैशुन्यहीनः शक्लः स्मित उदग्राभिभाषी वृद्ध उपदेशाचार इत्यात्मसम्पत्

06.1.07 अमात्यसम्पद् उक्ता पुरस्तात्

06.1.08 मध्ये चान्ते च स्थानवान् आत्मधारणः परधारणश्चापदि स्वारक्षः स्वाजीवः शत्रुद्वेषी शक्यसामन्तः पङ्कपाषाण उषरविषमकण्टकश्रेणीव्यालमृगाटवीहीनः कान्तः सीताखनिद्रव्यहस्तिवनवान् गव्यः पौरुषेयो गुप्तगोचरः पशुमान् अदेवमातृको वारिस्थलपथाभ्यां उपेतः सारचित्रबहुपण्यो दण्डकरसहः कर्मशीलकर्षकोऽबालिशस्वाम्य्ऽवरवर्णप्रायो भक्तशुचिमनुष्य इति जनपदसम्पत्

06.1.09 दुर्गसम्पद् उक्ता पुरस्तात्

06.1.10 धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्रस्थूलरत्नहिरण्यो दीर्घां अप्यापदं अनायतिं सहेत इति कोशसम्पत्

06.1.11 पितृपैतामहो नित्यो वश्यः तुष्टभृतपुत्रदारः प्रवासेष्वविसंवादितः सर्वत्राप्रतिहतो दुःखसहो बहुयुद्धः सर्वयुद्धप्रहरणविद्याविशारदः सहवृद्धिक्षयिकत्वाद् अद्वैध्यः क्षत्रप्राय इति दण्डसम्पत्

06.1.12 पितृपैतामहं नित्यं वश्यं अद्वैध्यं महल्लघुसमुत्थं इति मित्रसम्पत्

06.1.13 अराजबीजी लुब्धः क्षुद्रपरिषत्को विरक्तप्रकृतिरन्याय्यवृत्तिरयुक्तो व्यसनी निरुत्साहो दैवप्रमाणो यत्किञ्चनकार्यगतिरननुबन्धः क्लीबो नित्यापकारी च इत्यमित्रसम्पत्

06.1.14 एवम्भूतो हि शत्रुः सुखः समुच्छेत्तुं भवति

06.1.15ab अरिवर्जाः प्रकृतयः सप्त एताः स्वगुण उदयाः ।

06.1.15chd उक्ताः प्रत्यङ्गभूताः ताः प्रकृता राजसम्पदः

06.1.16ab सम्पादयत्यसम्पन्नाः प्रकृतीरात्मवान्नृपः ।

06.1.16chd विवृद्धाश्चानुरक्ताश्च प्रकृतीर्हन्त्यनात्मवान्

06.1.17ab ततः स दुष्टप्रकृतिश्चातुरन्तोऽप्यनात्मवान् ।

06.1.17chd हन्यते वा प्रकृतिभिर्याति वा द्विषतां वशम्

06.1.18ab आत्मवांः त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा ।

06.1.18chd नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते (इति)

Chapt । शमव्यायामिकम्

06.2.01 शमव्यायामौ योगक्षेमयोर्योनिः

06.2.02 कर्मारम्भाणां योगाराधनो व्यायामः

06.2.03 कर्मफल उपभोगानां क्षेमाराधनः शमः

06.2.04 शमव्यायामयोर्योनिः षाड्गुण्यम्

06.2.05 क्षयः स्थानं वृद्धिरित्युदयाः तस्य

06.2.06 मानुषं नयापनयौ, दैवं अयानयौ

06.2.07 दैवमानुषं हि कर्म लोकं यापयति

06.2.08 अदृष्टकारितं दैवम्

06.2.09 तस्मिन्न् इष्टेन फलेन योगोऽयः, अनिष्टेनानयः

06.2.10 दृष्टकारितं मानुषम्

06.2.11 तस्मिन् योगक्षेमनिष्पत्तिर्नयः, विपत्तिरपनयः

06.2.12 तच्चिन्त्यं, अचिन्त्यं दैवम्

06.2.13 राजा आत्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं विजिगीषुः

06.2.14 तस्य समन्ततो मण्डलीभूता भूम्य्ऽनन्तरा अरिप्रकृतिः

06.2.15 तथा एव भूम्य्.एकान्तरा मित्रप्रकृतिः

06.2.16 अरिसम्पद्युक्तः सामन्तः शत्रुः, व्यसनी यातव्यः, अनपाश्रयो दुर्बलाश्रयो वा उच्छेदनीयः, विपर्यये पीडनीयः कर्शनीयो वा

06.2.17 इत्यरिविशेषाः

06.2.18 तस्मान् मित्रं अरिमित्रं मित्रमित्रं अरिमित्रमित्रं चानन्तर्येण भूमीनां प्रसज्यन्ते पुरस्तात्, पश्चात् पार्ष्ण्िग्राह आक्रन्दः पार्ष्ण्िग्राहासार आक्रन्दासारः

06.2.19 भूम्य्sनन्तरः प्रकृतिमित्रः, तुल्याभिजनः सहजः, विरुद्धो विरोधयिता वा कृत्रिमः

06.2.20 भूम्य्.एकान्तरं प्रकृतिमित्रं, मातापितृसम्बद्धं सहजं, धनजीवितहेतोराश्रितं कृत्रिमम्

06.2.21 अरिविजिगीष्वोर्भूम्य्sनन्तरः संहतासंहतयोरनुग्रहसमर्थो निग्रहे चासंहतयोर्मध्यमः

06.2.22 अरिविजिगीषुमध्यानां बहिः प्रकृतिभ्यो बलवत्तरः संहतासंहतानां अरिविजिगीषुमध्यमानां अनुग्रहसमर्थो निग्रहे चासंहतानां उदासीनः

06.2.23 इति प्रकृतयः

06.2.24 विजिगीषुर्मित्रं मित्रमित्रं वाऽस्य प्रकृतयः तिस्रः

06.2.25 ताः पञ्चभिरमात्यजनपददुर्गकोशदण्डप्रकृतिभिरेक एकशः सम्युक्ता मण्डलं अष्टादशकं भवति

06.2.26 अनेन मण्डलपृथक्त्वं व्याख्यातं अरिमध्यम उदासीनानाम्

06.2.27 एवं चतुर्मण्डलसङ्क्षेपः

06.2.28 द्वादश राजप्रकृतयः षष्टिर्द्रव्यप्रकृतयः, सङ्क्षेपेण द्विसप्ततिः

06.2.29 तासां यथास्वं सम्पदः

06.2.30 शक्तिः सिद्धिश्च

06.2.31 बलं शक्तिः

06.2.32 सुखं सिद्धिः

06.2.33 शक्तिः त्रिविधा - ज्ञानबलं मन्त्रशक्तिः, कोशदण्डबलं प्रभुशक्तिः, विक्रमबलं उत्साहशक्तिः

06.2.34 एवं सिद्धिः त्रिविधा एव - मन्त्रशक्तिसाध्या मन्त्रसिद्धिः, प्रभुशक्तिसाध्या प्रभुसिद्धिः, उत्साहशक्तिसाध्या उत्साहसिद्धिः

06.2.35 ताभिरभ्युच्चितो ज्यायान् भवति, अपचितो हीनः, तुल्यशक्तिः समः

06.2.36 तस्मात्शक्तिं सिद्धिं च घटेतात्मन्यावेशयितुं, साधारणो वा द्रव्यप्रकृतिष्वानन्तर्येण शौचवशेन वा

06.2.37 दूष्यामित्राभ्यां वाऽपक्रष्टुं यतेत

06.2.38 यदि वा पश्येत् अमित्रो मे शक्तियुक्तो वाग्दण्डपारुष्यार्थदूषणैः प्रकृतीरुपहनिष्यति, सिद्धियुक्तो वा मृगयाद्यूतमद्यस्त्रीभिः प्रमादं गमिष्यति, स विरक्तप्रकृतिरुपक्षीणः प्रमत्तो वा साध्यो मे भविष्यति, विग्रहाभियुक्तो वा सर्वसन्दोहेन एकस्थोऽदुर्गस्थो वा स्थास्यति, स संहतसैन्यो मित्रदुर्गवियुक्तः साध्यो मे भविष्यति, बलवान् वा राजा परतः शत्रुं उच्छेत्तुकामः तं उच्छिद्य मां उच्छिन्द्याद् इति बलवता प्रार्थितस्य मे विपन्नकर्मारम्भस्य वा साहाय्यं दास्यति, मध्यमलिप्सायां च, इत्येवंऽअदिषु कारणेष्वमित्रस्यापि शक्तिं सिद्धिं च इच्छेत्

06.2.39ab नेमिं एकान्तरान् राज्ञः कृत्वा चानन्तरान् अरान् ।

06.2.39chd नाभिं आत्मानं आयच्छेन्नेता प्रकृतिमण्डले

06.2.40ab मध्ये ह्युपहितः शत्रुर्नेतुर्मित्रस्य च उभयोः ।

06.2.40chd उच्छेद्यः पीडनीयो वा बलवान् अपि जायते (इति)

Book |

Chapt | षाड्गुण्यसमुद्देशः - क्षयस्थानवृद्धिनिश्चयः

07.1.01 षाड्गुण्यस्य प्रकृतिमण्डलं योनिः

07.1.02 सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम् इत्याचार्याः

07.1.03 द्वैगुण्यम् इति वातव्याधिः

07.1.04 सन्धिविग्रहाभ्यां हि षाड्गुण्यं सम्पद्यते इति

07.1.05 षाड्गुण्यं एव एतद् अवस्थाभेदाद् इति कौटिल्यः

07.1.06 तत्र पणबन्धः सन्धिः

07.1.07 अपकारो विग्रहः

07.1.08 उपेक्षणं आसनम्

07.1.09 अभ्युच्चयो यानम्

07.1.10 परार्पणं संश्रयः

07.1.11 सन्धिविग्रह उपादानं द्वैधीभावः

07.1.12 इति षड्गुणाः

07.1.13 परस्माद्ध् हीयमानः सन्दधीत

07.1.14 अभ्युच्चीयमानो विगृह्णीयात्

07.1.15 न मां परो नाहं परं उपहन्तुं शक्तः इत्यासीत

07.1.16 गुणातिशययुक्तो यायात्

07.1.17 शक्तिहीनः संश्रयेत

07.1.18 सहायसाध्ये कार्ये द्वैधीभावं गच्छेत्

07.1.19 इति गुणावस्थापनम्

07.1.20 तेषां यस्मिन् वा गुणे स्थितः पश्येत् इहस्थः शक्ष्यामि दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्माण्यात्मनः प्रवर्तयितुं, परस्य च एतानि कर्माण्युपहन्तुम् इति तं आतिष्ठेत्

07.1.21 सा वृद्धिः

07.1.22 आशुतरा मे वृद्धिर्भूयस्तरा वृद्ध्य्.उदयतरा वा भविष्यति, विपरीता परस्य इति ज्ञात्वा परवृद्धिं उपेक्षेत

07.1.23 तुल्यकालफल उदयायां वा वृद्धौ सन्धिं उपेयात्

07.1.24 यस्मिन् वा गुणे स्थितः स्वकर्मणां उपघातं पश्येन्न इतरस्य तस्मिन्न तिष्ठेत्

07.1.25 एष क्षयः

07.1.26 चिरतरेणाल्पतरं वृद्ध्य्.उदयतरं वा क्षेष्ये, विपरीतं परः इति ज्ञात्वा क्षयं उपेक्षेत

07.1.27 तुल्यकालफल उदये वा क्षये सन्धिं उपेयात्

07.1.28 यस्मिन् वा गुणे स्थितः स्वकर्मवृद्धिं क्षयं वा नाभिपश्येद् एतत्स्थानम्

07.1.29 ह्रस्वतरं वृद्ध्य्.उदयतरं वा स्थास्यामि, विपरीतं परः इति ज्ञात्वा स्थानं उपेक्षेत

07.1.30 तुल्यकालफल उदये वा स्थाने सन्धिं उपेयाद् इत्याचार्याः

07.1.31 न एतद् विभाषितं इति कौटिल्यः

07.1.32a यदि वा पश्येत् सन्धौ स्थितो महाफलैः स्वकर्मभिः परकर्माण्युपहनिष्यामि, महाफलानि वा स्वकर्माण्युपभोक्ष्ये, परकर्माणि वा, सन्धिविश्वासेन वा योग उपनिषत्प्रणिधिभिः परकर्माण्युपहनिष्यामि, सुखं वा सानुग्रहपरिहारसौकर्यं फललाभभूयस्त्वेन स्वकर्मणां परकर्मयोगावहं जनं आस्रावयिष्यामि -

07.1.32b बलिनाऽतिमात्रेण वा संहितः परः स्वकर्म उपघातं प्राप्स्यति, येन वा विगृहीतो मयासन्धत्ते तेनास्य विग्रहं दीर्घं करिष्यामि, मया वा संहितस्य मद्द्वेषिणो जनपदं पीडयिष्यति -

07.1.32ch पर उपहतो वाऽस्य जनपदो मां आगमिष्यति, ततः कर्मसु वृद्धिं प्राप्स्यामि, विपन्नकर्मारम्भो वा विषमस्थः परः कर्मसु न मे विक्रमेत -

07.1.32d परतः प्रवृत्तकर्मारम्भो वा ताभ्यां संहितः कर्मसु वृद्धिं प्राप्स्यामि, शत्रुप्रतिबद्धं वा शत्रुणा सन्धिं कृत्वा मण्डलं भेत्स्यामि -

07.1.32e भिन्नं अवाप्स्यामि, दण्डानुग्रहेण वा शत्रुं उपगृह्य मण्डललिप्सायां विद्वेषं ग्राहयिष्यामि, विद्विष्टं तेन एव घातयिष्यामि इति सन्धिना वृद्धिं आतिष्ठेत्

07.1.33a यदि वा पश्येत् आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः शैलवननदीदुर्ग एकद्वारारक्षो वा शक्ष्यति पराभियोगं प्रतिहन्तुं, विषयान्ते दुर्गं अविषह्यं अपाश्रितो वा शक्ष्यामि परकर्माण्युपहन्तुं -

07.1.33b व्यसनपीड उपहत उत्साहो वा परः सम्प्राप्तकर्म उपघातकालः, विगृहीतस्यान्यतो वा शक्ष्यामि जनपदं अपवाहयितुम् इति विग्रहे स्थितो वृद्धिं आतिष्ठेत्

07.1.34 यदि वा मन्येत न मे शक्तः परः कर्माण्युपहन्तुं नाहं तस्य कर्म उपघाती वा, व्यसनं अस्य, श्वराहयोरिव कलहे वा, स्वकर्मानुष्ठानपरो वा वर्धिष्ये इत्यासनेन वृद्धिं आतिष्ठेत्

07.1.35 यदि वा मन्येत यानसाध्यः कर्म उपघातः शत्रोः, प्रतिविहितस्वकर्मारक्षश्चास्मि इति यानेन वृद्धिं आतिष्ठेत्

07.1.36 यदि वा मन्येत नास्मि शक्तः परकर्माण्युपहन्तुं, स्वकर्म उपघातं वा त्रातुम् इति, बलवन्तं आश्रितः स्वकर्मानुष्ठानेन क्षयात् स्थानं स्थानाद् वृद्धिं चाकाङ्क्षेत

07.1.37 यदि वा मन्येत सन्धिना एकतः स्वकर्माणि प्रवर्तयिष्यामि, विग्रहेण एकतः परकर्माण्युपहनिष्यामि इति द्वैधीभावेन वृद्धिं आतिष्ठेत्

07.1.38ab एवं षड्भिर्गुणैरेतैः स्थितः प्रकृतिमण्डले ।

07.1.38chd पर्येषेत क्षयात् स्थानं स्थानाद् वृद्धिं च कर्मसु (इति)

Chapt । संश्रयवृत्ति

07.2.01 सन्धिविग्रहयोः तुल्यायां वृद्धौ सन्धिं उपेयात्

07.2.02 विग्रहे हि क्षयव्ययप्रवासप्रत्यवाया भवन्ति

07.2.03 तेनासनयानयोरासनं व्याख्यातम्

07.2.04 द्वैधीभावसंश्रययोर्द्वैधीभावं गच्छेत्

07.2.05 द्वैधीभूतो हि स्वकर्मप्रधान आत्मन एव उपकरोति, संश्रितः तु परस्य उपकरोति, नात्मनः

07.2.06 यद्बलः सामन्तः तद्विशिष्टबलं आश्रयेत्

07.2.07 तद्विशिष्टबलाभावे तं एवाश्रितः कोशदण्डभूमीनां अन्यतमेनास्य उपकर्तुं अदृष्टः प्रयतेत

07.2.08 महादोषो हि विशिष्टबलसमागमो राज्ञां, अन्यत्रारिविगृहीतात्

07.2.09 अशक्ये दण्ड उपनतवद् वर्तेत

07.2.10 यदा चास्य प्राणहरं व्याधिं अन्तःकोपं शत्रुवृद्धिं मित्रव्यसनं उपस्थितं वा तन्निमित्तां आत्मनश्च वृद्धिं पश्येत् तदा सम्भाव्यव्याधिधर्मकार्यापदेशेनापयायात्

07.2.11 स्वविषयस्थो वा न उपगच्छेत्

07.2.12 आसन्नो वाऽस्य च्छिद्रेषु प्रहरेत्

07.2.13 बलीयसोर्वा मध्यगतः त्राणसमर्थं आश्रयेत, यस्य वाऽन्तर्धिः स्यात्, उभौ वा

07.2.14 कपालसंश्रयः तिष्ठेत्, मूलहरं इतरस्य इतरं अपदिशन्

07.2.15 भेदं उभयोर्वा परस्परापदेशं प्रयुञ्जीत, भिन्नयोरुपांशुदण्डम्

07.2.16 पार्श्वस्थो वा बलस्थयोरासन्नभयात् प्रतिकुर्वीत

07.2.17 दुर्गापाश्रयो वा द्वैधीभूतः तिष्ठेत्

07.2.18 सन्धिविग्रहक्रमहेतुभिर्वा चेष्टेत

07.2.19 दूष्यामित्राटविकान् उभयोरुपगृह्णीयात्

07.2.20 एतयोरन्यतरं गच्छंः तैरेवान्यतरस्य व्यसने प्रहरेत्

07.2.21 द्वाभ्यां उपहतो वा मण्डलापाश्रयः तिष्ठेत्, मध्यमं उदासीनं वा संश्रयेत

07.2.22 तेन सह एकं उपगृह्य इतरं उच्छिन्द्याद्, उभौ वा

07.2.23 द्वाभ्यां उच्छिन्नो वा मध्यम उदासीनयोः तत्पक्षीयाणां वा राज्ञां न्यायवृत्तिं आश्रयेत

07.2.24 तुल्यानां वा यस्य प्रकृतयः सुख्येयुरेनं, यत्रस्थो वा शक्नुयाद् आत्मानं उद्धर्तुं, यत्र वा पूर्वपुरुष उचिता गतिरासन्नः सम्बन्धो वा, मित्राणि भूयांस्यतिशक्तिमन्ति वा भवेयुः

07.2.25ab प्रियो यस्य भवेद् यो वा प्रियोऽस्य कतरः तयोः ।

07.2.25chd प्रियो यस्य स तं गच्छेद् इत्याश्रयगतिः परा (इति)

Chapt । समहीनज्यायसां गुणाभिनिवेशः - हीनसन्धयः

07.3.01 विजिगीषुः शक्त्यऽपेक्षः षाड्गुण्यं उपयुञ्जीत

07.3.02 समज्यायोभ्यां सन्धीयेत, हीनेन विगृह्णीयात्

07.3.03 विगृहीतो हि ज्यायसा हस्तिना पादयुद्धं इवाभ्युपैति

07.3.04 समेन चामं पात्रं आमेनाहतं इव उभयतः क्षयं करोति

07.3.05 कुम्भेन इवाश्मा हीनेन एकान्तसिद्धिं अवाप्नोति

07.3.06 ज्यायांश्चेन्न सन्धिं इच्छेद् दण्ड उपनतवृत्तं आबलीयसं वा योगं आतिष्ठेत्

07.3.07 समश्चेन्न सन्धिं इच्छेद् यावन्मात्रं अपकुर्यात् तावन्मात्रं अस्य प्रत्यपकुर्यात्

07.3.08 तेजो हि सन्धानकारणम्

07.3.09 नातप्तं लोहं लोहेन सन्धत्त इति

07.3.10 हीनश्चेत् सर्वत्रानुप्रणतः तिष्ठेत् सन्धिं उपेयात्

07.3.11 आरण्योऽग्निरिव हि दुःखामर्षजं तेजो विक्रमयति

07.3.12 मण्डलस्य चानुग्राह्यो भवति

07.3.13 संहितश्चेत् परप्रकृतयो लुब्धक्षीणापचरिताः प्रत्यादानभयाद् वा न उपगच्छन्ति इति पश्येद्द् हीनोऽपि विगृह्णीयात्

07.3.14 विगृहीतश्चेत् परप्रकृतयो लुब्धक्षीणापचरिता विग्रह उद्विग्ना वा मां न उपगच्छन्ति इति पश्येज् ज्यायान् अपि सन्धीयेत, विग्रह उद्वेगं वा शमयेत्

07.3.15 व्यसनयौगपद्येऽपि गुरुव्यसनोऽस्मि, लघुव्यसनः परः सुखेन प्रतिकृत्य व्यसनं आत्मनोऽभियुञ्ज्याद् इति पश्येज् ज्यायान् अपि सन्धीयेत

07.3.16 सन्धिविग्रहयोश्चेत् परकर्शनं आत्म उपचयं वा नाभिपश्येज् ज्यायान् अप्यासीत

07.3.17 परव्यसनं अप्रतिकार्यं चेत् पश्येद्द् हीनोऽप्यभियायात्

07.3.18 अप्रतिकार्यासन्नव्यसनो वा ज्यायान् अपि संश्रयेत

07.3.19 सन्धिना एकतो विग्रहेण एकतश्चेत् कार्यसिद्धिं पश्येज् ज्यायान् अपि द्वैधीभूतः तिष्ठेत्

07.3.20 एवं समस्य षाड्गुण्य उपयोगः

07.3.21 तत्र तु प्रतिविशेषः

07.3.22ab प्रवृत्तचक्रेणाक्रान्तो राज्ञा बलवताऽबलः ।

07.3.22chd सन्धिना उपनमेत् तूर्णं कोशदण्डात्मभूमिभिः

07.3.23ab स्वयं सङ्ख्यातदण्डेन दण्डस्य विभवेन वा ।

07.3.23chd उपस्थातव्यं इत्येष सन्धिरात्मामिषो मतः

07.3.24ab सेनापतिकुमाराभ्यां उपस्थातव्यं इत्ययम् ।

07.3.24chd पुरुषान्तरसन्धिः स्यान्नात्मना इत्यात्मरक्षणः

07.3.25ab एकेनान्यत्र यातव्यं स्वयं दण्डेन वा इत्ययम् ।

07.3.25chd अदृष्टपुरुषः सन्धिर्दण्डमुख्यात्मरक्षणः

07.3.26ab मुख्यस्त्रीबन्धनं कुर्यात् पूर्वयोः पश्चिमे त्वरिम् ।

07.3.26chd साधयेद् गूढं इत्येते दण्ड उपनतसन्धयः

07.3.27ab कोशदानेन शेषाणां प्रकृतीनां विमोक्षणम् ।

07.3.27chd परिक्रयो भवेत् सन्धिः स एव च यथासुखम्

07.3.28ab स्कन्ध उपनेयो बहुधा ज्ञेयः सन्धिरुपग्रहः ।

07.3.28chd निरुद्धो देशकालाभ्यां अत्ययः स्याद् उपग्रहः

07.3.29ab विषह्यदानाद् आयत्यां क्षमः स्त्रीबन्धनाद् अपि ।
07.3.29chd सुवर्णसन्धिर्विश्वासाद् एकीभावगतो भवेत्
07.3.30ab विपरीतः कपालः स्याद् अत्यादानाभिभाषितः ।
07.3.30chd पूर्वयोः प्रणयेत् कुप्यं हस्त्यश्वं वा गरान्वितम्
07.3.31ab तृतीये प्रणयेद् अर्थं कथयन् कर्मणां क्षयम् ।
07.3.31chd तिष्ठेच्चतुर्थ इत्येते कोश उपनतसन्धयः
07.3.32ab भूम्य्.एकदेशत्यागेन शेषप्रकृतिरक्षणम् ।
07.3.32chd आदिष्टसन्धिः तत्र इष्टो गूढस्तेन उपघातिनः
07.3.33ab भूमीनां आत्तसाराणां मूलवर्जं प्रणामनम् ।
07.3.33chd उच्छिन्नसन्धिः तत्र इष्टः परव्यसनकाङ्क्षिणः
07.3.34ab फलदानेन भूमीनां मोक्षणं स्याद् अवक्रयः ।
07.3.34chd फलातिमुक्तो भूमिभ्यः सन्धिः स परिदूषणः
07.3.35ab कुर्याद् अवेक्षणं पूर्वौ पश्चिमौ त्वाबलीयसम् ।
07.3.35chd आदाय फलं इत्येते देश उपनतसन्धयः
07.3.36ab स्वकार्याणां वशेन एते देशे काले च भाषिताः ।
07.3.36chd आबलीयसिकाः कार्याः त्रिविधा हीनसन्धयः (इति)

Chapt । विगृह्यासनं - सन्धायासनं - विगृह्ययानं - सन्धाययानं - सम्भूयप्रयाणम्

07.4.01 सन्धिविग्रहयोरासनं यानं च व्याख्यातम्
07.4.02 स्थानं आसनं उपेक्षणं च इत्यासनपर्यायाः
07.4.03 विशेषः तु - गुण एकदेशे स्थानं, स्ववृद्धिप्राप्त्यर्थं आसनं, उपायानां अप्रयोग उपेक्षणम्
07.4.04 अतिसन्धानकामयोररिविजिगीष्वोरुपहन्तुं अशक्तयोर्विगृह्यासनं सन्धाय वा
07.4.05 यदा वा पश्येत् स्वदण्डैर्मित्राटवीदण्डैर्वा समं ज्यायांसं वा कर्शयितुं उत्सहे इति तदा कृतबाह्याभ्यन्तरकृत्यो विगृह्यासीत

07.4.06 यदा वा पश्येत् उत्साहयुक्ता मे प्रकृतयः संहता विवृद्धाः स्वकर्माण्यव्याहताश्चरिष्यन्ति परस्य वा कर्माण्युपहनिष्यन्ति इति तदा विगृह्यासीत

07.4.07a यदा वा पश्येत् परस्यापचरिताः क्षीणा लुब्धाः स्वचक्रस्तेनाटवीव्यथिता वा प्रकृतयः स्वयं उपजापेन वा मां एष्यन्ति, सम्पन्ना मे वार्त्ता, विपन्ना परस्य, तस्य प्रकृतयो दुर्भिक्ष उपहता मां एष्यन्ति; विपन्ना मे वार्त्ता, सम्पन्ना परस्य, -

07.4.07b तं मे प्रकृतयो न गमिष्यन्ति, विगृह्य चास्य धान्यपशुहिरण्यान्याहरिष्यामि, स्वपण्य उपघातीनि वा परपण्यानि निवर्तयिष्यामि, -

07.4.07ch परवणिक्पथाद् वा सरवन्ति मां एष्यन्ति विगृहीते, न इतरं, दूष्यामित्राटवीनिग्रहं वा विगृहीतो न करिष्यति, तैरेव वा विग्रहं प्राप्स्यति, -

07.4.07d मित्रं मे मित्रभाव्यभिप्रयातो बह्वऽल्पकालं तनुक्षयव्ययं अर्थं प्राप्स्यति, गुणवतीं आदेयां वा भूमिं, -

07.4.07e सर्वसन्दोहेन वा मां अनादृत्य प्रयातुकामः कथं न यायाद् इति परवृद्धिप्रतिघातार्थं प्रतापार्थं च विगृह्यासीत

07.4.08 तं एव हि प्रत्यावृत्तो ग्रसते इत्याचार्याः

07.4.09 न इति कौटिल्यः

07.4.10 कर्शनमात्रं अस्य कुर्याद् अव्यसनिनः, परवृद्ध्या तु वृद्धः समुच्छेदनम्

07.4.11 एवं परस्य यातव्योऽस्मै साहाय्यं अविनष्टः प्रयच्छेत्

07.4.12 तस्मात् सर्वसन्दोहप्रकृतं विगृह्यासीत

07.4.13 विगृह्यासनहेतुप्रातिलोम्ये सन्धायासीत

07.4.14 विगृह्यासनहेतुभिरभ्युच्चितः सर्वसन्दोहवर्जं विगृह्य यायात्

07.4.15 यदा वा पश्येत् व्यसनी परः, प्रकृतिव्यसनं वाऽस्य शीषप्रकृतिभिरप्रतिकार्यं, स्वचक्रपीडिता विरक्ता वाऽस्य प्रकृतयः कर्शिता निरुत्साहाः परस्पराद् वा भिन्नाः शक्या लोभयितुं, अग्न्य्.उदकव्याधिमरकदुर्भिक्षनिमित्तं क्षीणयुग्यपुरुषनिचयरक्षाविधानः परः इति तदा विगृह्य यायात्

07.4.16 यदा वा पश्येत् मित्रं आक्रन्दश्च मे शूरवृद्धानुरक्तप्रकृतिः, विपरीतप्रकृतिः परः पार्ष्णिग्राहश्चासारश्च, शक्ष्यामि मित्रेणासारं आक्रन्देन पार्ष्णिग्राहं वा विगृह्य यातुम् इति तदा विगृह्य यायात्

07.4.17 यदा वा फलं एकहार्यं अल्पकालं पश्येत् तदा पार्ष्ण्यिग्राहासाराभ्यां विगृह्य यायात्

07.4.18 विपर्यये सन्धाय यायात्

07.4.19 यदा वा पश्येत् न शक्यं एकेन यातुं अवश्यं च यातव्यम् इति तदा समहीनज्यायोभिः सामवायिकैः सम्भूय यायाद्, एकत्र निर्दिष्टेनांशेन, अनेकत्रानिर्दिष्टेनांशेन

07.4.20 तेषां असमवाये दण्डं अन्यतमस्मान्निविष्टांशेन याचेत

07.4.21 सम्भूयाभिगमनेन वा निर्विश्येत, ध्रुवे लाभे निर्दिष्टेनांशेन, अध्रुवे लाभांशेन

07.4.22ab अंशो दण्डसमः पूर्वः प्रयाससम उत्तमः ।

07.4.22chd विलोपो वा यथालाभं प्रक्षेपसम एव वा (इति)

Chapt । यातव्यामित्रयोरभिग्रहचिन्ताः - क्षयलोभविरागहेतवः प्रकृतीनां - सामवायिकविपरिमर्शः

07.5.01 तुल्यसामन्तव्यसने यातव्यं अमित्रं वा इत्यमित्रं अभियायात्, तत्सिद्धौ यातव्यम्

07.5.02 अमित्रसिद्धौ हि यातव्यः साहाय्यं दद्यान्नामित्रो यातव्यसिद्धौ

07.5.03 गुरुव्यसनं यातव्यं लघुव्यसनं अमित्रं वा इति गुरुव्यसनं सौकर्यतो यायाद् इत्याचार्याः

07.5.04 न इति कौटिल्यः

07.5.05 लघुव्यसनं अमित्रं यायात्

07.5.06 लघ्वपि हि व्यसनं अभियुक्तस्य कृच्छ्रं भवति

07.5.07 सत्यं गुर्वपि गुरुतरं भवति

07.5.08 अनभियुक्तः तु लघुव्यसनः सुखेन व्यसनं प्रतिकृत्यामित्रो यातव्यं अभिसरेत्, पार्ष्णिं वा गृह्णीयात्

07.5.09 यातव्ययौगपद्ये गुरुव्यसनं न्यायवृत्तिं लघुव्यसनं अन्यायवृत्तिं विरक्तप्रकृतिं वा इति विरक्तप्रकृतिं यायात्

07.5.10 गुरुव्यसनं न्यायवृत्तिं अभियुक्तं प्रकृतयोऽनुगृह्णन्ति, लघुव्यसनं अन्यायवृत्तिं उपेक्षन्ते, विरक्ता बलवन्तं अप्युच्छिन्दन्ति

07.5.11 तस्माद् विरक्तप्रकृतिं एव यायात्

07.5.12 क्षीणलुब्धप्रकृतिं अपचरितप्रकृतिं वा इति क्षीणलुब्धप्रकृतिं यायात्, क्षीणलुब्धा हि प्रकृतयः सुखेन उपजापं पीडां वा उपगच्छन्ति, नापचरिताः प्रधानावग्रहसाध्याः इत्याचार्याः

07.5.13 न इति कौटिल्यः

07.5.14 क्षीणलुब्धा हि प्रकृतयो भर्तरि स्निग्धा भर्तृहिते तिष्ठन्ति, उपजापं वा विसंवादयन्ति, अनुरागे सार्वगुण्यं इति

07.5.15 तस्माद् अपचरितप्रकृतिं एव यायात्

07.5.16 बलवन्तं अन्यायवृत्तिं दुर्बलं वा न्यायवृत्तिं इति बलवन्तं अन्यायवृत्तिं यायात्

07.5.17 बलवन्तं अन्यायवृत्तिं अभियुक्तं प्रकृतयो नानुगृह्णन्ति, निष्पातयन्ति, अमित्रं वाऽस्य भजन्ते

07.5.18 दुर्बलं तु न्यायवृत्तिं अभियुक्तं प्रकृतयः परिगृह्णन्ति, अनुनिष्पतन्ति वा

07.5.19ab अवक्षेपेण हि सतां असतां प्रग्रहेण च ।

07.5.19chd अभूतानां च हिंसानां अधर्म्याणां प्रवर्तनैः

07.5.20ab उचितानां चरित्राणां धर्मिष्ठानां निवर्तनैः ।

07.5.20chd अधर्मस्य प्रसङ्गेन धर्मस्यावग्रहेण च

07.5.21ab अकार्याणां च करणैः कार्याणां च प्रणाशनैः ।

07.5.21chd अप्रदानैश्च देयानां अदेयानां च साधनैः

07.5.22ab अदण्डनैश्च दण्ड्यानां अदण्ड्यानां च दण्डनैः ।

07.5.22chd अग्राह्याणां उपग्राहैर्ग्राह्याणां चानभिग्रहैः

07.5.23ab अनर्थ्यानां च करणैरर्थ्यानां च विघातनैः ।

07.5.23chd अरक्षणैश्च चोरेभ्यः स्वयं च परिमोषणैः

07.5.24ab पातैः पुरुषकाराणां कर्मणां गुणदूषणैः ।

07.5.24chd उपघातैः प्रधानानां मान्यानां चावमाननैः

07.5.25ab विरोधनैश्च वृद्धानां वैषम्येणानृतेन च ।

07.5.25chd कृतस्याप्रतिकारेण स्थितस्याकरणेन च

07.5.26ab राज्ञः प्रमादालस्याभ्यां योगक्षेमवधेन वा ।

07.5.26chd प्रकृतीनां क्षयो लोभो वैराग्यं च उपजायते

07.5.27ab क्षीणाः प्रकृतयो लोभं लुब्धा यान्ति विरागताम् ।

07.5.27chd विरक्ता यान्त्यमित्रं वा भर्तारं घ्नन्ति वा स्वयम्

07.5.28 तस्मात् प्रकृतीनां क्षयलोभविरागकारणानि न उत्पादयेत्, उत्पन्नानि वा सद्यः प्रतिकुर्वीत

07.5.29 क्षीणा लुब्धा विरक्ता वा प्रकृतय इति

07.5.30 क्षीणाः पीडन उच्छेदनभयात् सद्यः सन्धिं युद्धं निष्पतनं वा रोचयन्ते

07.5.31 लुब्धा लोभेनासन्तुष्टाः पर उपजापं लिप्सन्ते

07.5.32 विरक्ताः पराभियोगं अभ्युत्तिष्ठन्ते

07.5.33 तासां हिरण्यधान्यक्षयः सर्व उपघाती कृच्छ्रप्रतीकारश्च, युग्यपुरुषक्षयो हिरण्यधान्यसाध्यः

07.5.34 लोभ ऐकदेशिको मुख्यायत्तः परार्थेषु शक्यः प्रतिहन्तुं आदातुं वा

07.5.35 विरागः प्रधानावग्रहसाध्यः

07.5.36 निष्प्रधाना हि प्रकृतयो भोग्या भवन्त्यनुपजाप्याश्चान्येषां, अनापत्सहाः तु

07.5.37 प्रकृतिमुख्यप्रग्रहैः तु बहुधा भिन्ना गुप्ता भवन्त्यापत्सहाश्च

07.5.38 सामवायिकानां अपि सन्धिविग्रहकारणान्यवेक्ष्य शक्तिशौचयुक्तैः सम्भूय यायात्

07.5.39 शक्तिमान् हि पार्ष्णिग्रहणे यात्रासाहाय्यदाने वा शक्तः, शुचिः सिद्धौ चासिद्धौ च यथास्थितकारी इति

07.5.40 तेषां ज्यायसा एकेन द्वाभ्यां समाभ्यां वा सम्भूय यातव्यं इति द्वाभ्यां समाभ्यां श्रेयः

07.5.41 ज्यायसा ह्यवगृहीतश्चरति, समाभ्यां अतिसन्धानाधिक्ये वा

07.5.42 तौ हि सुखौ भेदयितुं, दुष्टश्च एको द्वाभ्यां नियन्तुं भेद उपग्रहं च उपगन्तुं इति

07.5.43 समेन एकेन द्वाभ्यां हीनाभ्यां वा इति द्वाभ्यां हीनाभ्यां श्रेयः

07.5.44 तौ हि द्विकार्यसाधकौ वश्यौ च भवतः

07.5.45ab कार्यसिद्धौ तु - कृतार्थाज् ज्यायसो गूढः सापदेशं अपस्रवेत् ।

07.5.45chd अशुचेः शुचिवृत्तात् तु प्रतीक्षेता विसर्जनात्

07.5.46ab सत्त्राद् अपसरेद् यत्तः कलत्रं अपनीय वा ।

07.5.46chd समाद् अपि हि लब्धार्थाद् विश्वः तस्य भयं भवेत्

07.5.47ab ज्यायस्त्वे चापि लब्धार्थः समोऽपि परिकल्पते ।

07.5.47chd अभ्युच्चितश्चाविश्वास्यो वृद्धिश्चित्तविकारिणी

07.5.48ab विशिष्टाद् अल्पं अप्यंशं लब्ध्वा तुष्टमुखो व्रजेत् ।

07.5.48chd अनंशो वा ततोऽस्याङ्के प्रहृत्य द्विगुणं हरेत्

07.5.49ab कृतार्थः तु स्वयं नेता विसृजेत् सामवायिकान् ।

07.5.49chd अपि जीयेत न जयेन् मण्डल इष्टः तथा भवेत् (इति)

Chapt । संहितप्रयाणिकं - परिपणितापरिपणितापसृताः सन्धयः

07.6.01 विजिगीषुर्द्वितीयां प्रकृतिं एवं अतिसन्दध्यात्

07.6.02 सामन्तं संहितप्रयाणे योजयेत् त्वं इतो याहि, अहं इतो यास्यामि, समानो लाभः इति

07.6.03 लाभसाम्ये सन्धिः, वैषम्ये विक्रमः

07.6.04 सन्धिः परिपणितश्चापरिपणितश्च

07.6.05 त्वं एतं देशं याहि, अहं इमं देशं यास्यामि इति परिपणितदेशः

07.6.06 त्वं एतावन्तं कालं चेष्टस्व, अहं एतावन्तं कालं चेष्टिष्ये इति परिपणितकालः

07.6.07 त्वं एतावत्कार्यं साधय, अहं इदं कार्यं साधयिष्यामि इति परिपणितार्थः

07.6.08 यदि वा मन्येत शैलवननदीदुर्गं अटवीव्यवहितं छिन्नधान्यपुरुषवीवधासारं अयवस इन्धन उदकं अविज्ञातं प्रकृष्टं अन्यभावदेशीयं वा सैन्यव्यायामानां अलब्धभौमं वा देशं परो यास्यति, विपरीतं अहम् इत्येतस्मिन् विशेषे परिपणितदेशं सन्धिं उपेयात्

07.6.09 यदि वा मन्येत प्रवर्ष उष्णशीतं अतिव्याधिप्रायं उपक्षीणाहार उपभोगं सैन्यव्यायामानां चाउपरोधिकं कार्यसाधनानां ऊनं अतिरिक्तं वा कालं परश्चेष्टिष्यते, विपरीतं अहम् इत्येतस्मिन् विशेषे परिपणितकालं सन्धिं उपेयात्

07.6.10 यदि वा मन्येत प्रत्यादेयं प्रकृतिकोपकं दीर्घकालं महाक्षयव्ययं अल्पं अनर्थानुबन्धं अकल्यं अधर्म्यं मध्यम उदासीनविरुद्धं मित्र उपघातकं वा कार्यं परः साधयिष्यति, विपरीतं अहम् इत्येतस्मिन् विशेषे परिपणितार्थं सन्धिं उपेयात्

07.6.11 एवं देशकालयोः कालकार्ययोर्देशकार्ययोर्देशकालकार्याणां चावस्थापनात् सप्तविधः परिपणितः

07.6.12 तस्मिन् प्राग् एवारभ्य प्रतिष्ठाप्य च स्वकर्माणि परकर्मसु विक्रमेत

07.6.13 व्यसनत्वरावमानालस्ययुक्तं अज्ञं वा शत्रुं अतिसन्धातुकामो देशकालकार्याणां अनवस्थापनात् संहितौ स्वः इति सन्धिविश्वासेन परच्छिद्रं आसाद्य प्रहरेद् इत्यपरिपणितः

07.6.14 तत्र एतद् भवति

07.6.15ab सामन्तेन एव सामन्तं विद्वान् आयोज्य विग्रहे ।

07.6.15chd ततोऽन्यस्य हरेद् भूमिं छित्वा पक्षं समन्ततः

07.6.16 सन्धेरकृतचिकीर्षा कृतश्लेषणं कृतविदूषणं अवशीर्णक्रिया च

07.6.17 विक्रमस्य प्रकाशयुद्धं कूटयुद्धं तूष्णींयुद्धम्

07.6.18 इति सन्धिविक्रमौ

07.6.19 अपूर्वस्य सन्धेः सानुबन्धैः सामादिभिः पर्येषणं समहीनज्यायसां च यथाबलं अवस्थापनं अकृतचिकीर्षा

07.6.20 कृतस्य प्रियहिताभ्यां उभयतः परिपालनं यथासम्भाषितस्य च निबन्धनस्यानुवर्तनं रक्षणं च कथं परस्मान्न भिद्येत इति कृतश्लेषणम्

07.6.21 परस्यापसन्धेयतां दूष्यातिसन्धानेन स्थापयित्वा व्यतिक्रमः कृतविदूषणम्

07.6.22 भृत्येन मित्रेण वा दोषापसृतेन प्रतिसन्धानं अवशीर्णक्रिया

07.6.23 तस्यां गतागतश्चतुर्विधः - कारणाद् गतागतो, विपरीतः, कारणाद् गतोऽकारणाद् आगतो, विपरीतश्च इति

07.6.24 स्वामिनो दोषेण गतो गुणेनागतः परस्य गुणेन गतो दोषेणागत इति कारणाद् गतागतः सन्धेयः

07.6.25 स्वदोषेण गतागतो गुणं उभयोः परित्यज्य अकारणाद् गतागतः चलबुद्धिरसन्धेयः

07.6.26 स्वामिनो दोषेण गतः परस्मात् स्वदोषेणागत इति कारणाद् गतोऽकारणाद् आगतः तर्कयितव्यः परप्रयुक्तः स्वेन वा दोषेणापकर्तुकामः, परस्य उच्छेत्तारं अमित्रं मे ज्ञात्वा प्रतिघातभयाद् आगतः, परं वा मां उच्छेत्तुकामं परित्यज्यानृशंस्याद् आगतः इति

07.6.27 ज्ञात्वा कल्याणबुद्धिं पूजयेद्, अन्यथाबुद्धिं अपकृष्टं वासयेत्

07.6.28 स्वदोषेण गतः परदोषेणागत इत्यकारणाद् गतः कारणाद् आगतः तर्कयितव्यः छिद्रं मे पूरयिष्यति, उचितोऽयं अस्य वासः, परत्रास्य जनो न रमते, मित्रैर्मे संहितः, शत्रुभिर्विगृहीतः, लुब्धक्रूराद् आविग्नः शत्रुसंहिताद् वा परस्मात् इति

07.6.29 ज्ञात्वा यथाबुद्ध्यवस्थापयितव्यः

07.6.30 कृतप्रणाशः शक्तिहानिर्विद्यापण्यत्वं आशानिर्वेदो देशलौल्यं अविश्वासो बलवद्विग्रहो वा परित्यागस्थानम् इत्याचार्याः

07.6.31 भयं अवृत्तिरमर्ष इति कौटिल्यः

07.6.32 इहापकारी त्याज्यः, परापकारी सन्धेयः, उभयापकारी तर्कयितव्य इति समानम्

07.6.33 असन्धेयेन त्ववश्यं सन्धातव्ये यतः प्रभावः ततः प्रतिविदध्यात्

07.6.34ab स उपकारं व्यवहितं गुप्तं आयुःक्षयाद् इति ।

07.6.34chd वासयेद् अरिपक्षीयं अवशीर्णक्रियाविधौ

07.6.35ab विक्रमयेद् भर्तरि वा सिद्धं वा दण्डचारिणम्

07.6.35chd कुर्याद् अमित्राटवीषु प्रत्यन्ते वाऽन्यतः क्षिपेत्

07.6.36ab पण्यं कुर्याद् असिद्धं वा सिद्धं वा तेन संवृतम्

07.6.36chd तस्य एव दोषेणादूष्य परसन्धेयकारणात्

07.6.37ab अथ वा शमयेद् एनं आयत्य्ऽर्थं उपांशुना

07.6.37chd आयत्यां च वधप्रेप्सुं दृष्ट्वा हन्याद् गतागतम्

07.6.38ab अरितोऽभ्यागतो दोषः शत्रुसंवासकारितः

07.6.38chd सर्पसंवासधर्मित्वान्नित्य उद्वेगेन दूषितः
07.6.39ab जायते प्लक्षबीजाशात् कपोताद् इव शाल्मलेः
07.6.39chd उद्वेगजननो नित्यं पश्चाद् अपि भयावहः
07.6.40ab प्रकाशयुद्धं निर्दिष्टे देशे काले च विक्रमः
07.6.40chd विभीषणं अवस्कन्दः प्रमादव्यसनार्दनम्
07.6.41ab एकत्र त्यागघातौ च कूटयुद्धस्य मातृका
07.6.41chd योगगूढ उपजापार्थं तूष्णींयुद्धस्य लक्षणम् (इति)

Chapt | द्वैधीभाविकाः सन्धिविक्रमाः

07.7.01 विजिगीषुर्द्वितीयां प्रकृतिं एवं उपगृह्णीयात्
07.7.02 सामन्तं सामन्तेन सम्भूय यायात्, यदि वा मन्येत पार्ष्णिं मे न ग्रहीष्यति, पार्ष्णिग्राहं वारयिष्यति, यातव्यं नाभिसरिष्यति, बलद्वैगुण्यं मे भविष्यति, वीवधासारौ मे प्रवर्तयिष्यति, परस्य वारयिष्यति, बह्वsअबाधे मे पथि कण्टकान् मर्दयिष्यति, दुर्गाटव्यsपसारेषु दण्डेन चरिष्यति, यातव्यं अविषह्ये दोषे सन्धौ वा
स्थापयिष्यति, लब्धलाभांशो वा शत्रून् अन्यान् मे विश्वासयिष्यति इति
07.7.03 द्वैधीभूतो वा कोशेन दण्डं दण्डेन कोशं सामन्तानां अन्यतमाल्लिप्सेत
07.7.04 तेषां ज्यायसोऽधिकेनांशेन समात् समेन हीनाद्द् हीनेन इति समसन्धिः
07.7.05 विपर्यये विषमसन्धिः
07.7.06 तयोर्विशेषलाभाद् अतिसन्धिः
07.7.07 व्यसनिनं अपायस्थाने सक्तं अनर्थिनं वा ज्यायांसं हीनो बलसमेन लाभेन पणेत
07.7.08 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्
07.7.09 एवम्भूतो वा हीनशक्तिप्रतापपूरणार्थं सम्भाव्यार्थाभिसारी मूलपार्ष्णित्राणार्थं वा ज्यायांसं हीनो बलसमाद् विशिष्टेन लाभेन पणेत
07.7.10 पणितः कल्याणबुद्धिं अनुगृह्णीयात्, अन्यथा विक्रमेत

07.7.11 जातव्यसनप्रकृतिरन्ध्रं उपस्थितानर्थं वा ज्यायांसं हीनो दुर्गमित्रप्रतिष्टब्धो वा ह्रस्वं अध्वानं यातुकामः शत्रुं अयुद्धं एकान्तसिद्धिं वा लाभं आदातुकामो बलसमाद्द् हीनेन लाभेन पणेत

07.7.12 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्

07.7.13 अरन्ध्रव्यसनो वा ज्यायान् दुर्ऽअरब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामो दूष्यदण्डं प्रवासयितुकामो दूष्यदण्डं आवाहयितुकामो वा पीडनीयं उच्छेदनीयं वा हीनेन व्यथयितुकामः सन्धिप्रधानो वा कल्याणबुद्धिर्हीनं लाभं प्रतिगृह्णीयात्

07.7.14 कल्याणबुद्धिना सम्भूयार्थं लिप्सेत, अन्यथा विक्रमेत

07.7.15 एवं समः समं अतिसन्दध्याद् अनुगृह्णीयाद् वा

07.7.16 परानीकस्य प्रत्यनीकं मित्राटवीनां वा, शत्रोर्विभूमीनां देशिकं मूलपार्ष्णित्राणार्थं वा समो बलसमेन लाभेन पणेत

07.7.17 पणितः कल्याणबुद्धिं अनुगृह्णीयात्, अन्यथा विक्रमेत

07.7.18 जातव्यसनप्रकृतिरन्ध्रं अनेकविरुद्धं अन्यतो लभमानो वा समो बलसमाद्द् हीनेन लाभेन पणेत

07.7.19 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्

07.7.20 एवम्भूतो वा समः सामन्तायत्तकार्यः कर्तव्यबलो वा बलसमाद् विशिष्टेन लाभेन पणेत

07.7.21 पणितः कल्याणबुद्धिं अनुगृह्णीयात् अन्यथा विक्रमेत

07.7.22 जातव्यसनप्रकृतिरन्ध्रं अभिहन्तुकामः स्व्ऽअरब्धं एकान्तसिद्धिं वाऽस्य कर्म उपहन्तुकामो मूले यात्रायां वा प्रहर्तुकामो यातव्याद्भूयो लभमानो वा ज्यायांसं हीनं समं वा भूयो याचेत

07.7.23 भूयो वा याचितः स्वबलरक्षाऽर्थं दुर्धर्षं अन्यदुर्गं आसारं अटवीं वा परदण्डेन मर्दितुकामः प्रकृष्टेऽध्वनि काले वा परदण्डं क्षयव्ययाभ्यां योक्तुकामः परदण्डेन वा विवृद्धः तं एव उच्छेत्तुकामः परदण्डं आदातुकामो वा भूयो दद्यात्

07.7.24 ज्यायान् वा हीनं यातव्यापदेशेन हस्ते कर्तुकामः परं उच्छिद्य वा तं एव उच्छेत्तुकामः, त्यागं वा कृत्वा प्रत्यादातुकामो बलसमाद् विशिष्टेन लाभेन पणेत

07.7.25 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्

07.7.26 यातव्यसंहितो वा तिष्ठेत्, दूष्यामित्राटवीदण्डं वाऽस्मै दद्यात्

07.7.27 जातव्यसनप्रकृतिरन्ध्रो वा ज्यायान् हीनं बलसमेन लाभेन पणेत

07.7.28 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्

07.7.29 एवम्भूतं हीनं ज्यायान् बलसमाद्द् हीनेन लाभेन पणेत

07.7.30 पणितः तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्

07.7.31ab आदौ बुध्येत पणितः पणमानश्च कारणम्

07.7.31chd ततो वितर्क्य उभयतो यतः श्रेयश्ततो व्रजेत् (इति)

Chapt | यातव्यवृत्तिः - अनुग्राह्यमित्रविशेषाः

07.8.01 यातव्योऽभियास्यमानः सन्धिकारणं आदातुकामो विहन्तुकामो वा सामवायिकानां अन्यतमं लाभद्वैगुण्येन पणेत

07.8.02 पणमानः क्षयव्ययप्रवासप्रत्यवायपर उपकारशरीराबाधांश्चास्य वर्णयेत्

07.8.03 प्रतिपन्नं अर्थेन योजयेत्

07.8.04 वैरं वा परैर्ग्राहयित्वा विसंवादयेत्

07.8.05 दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामः स्व्sअरब्धां वा यात्रासिद्धिं विघातयितुकामो मूले यात्रायां वा प्रहर्तुकामो यातव्यसंहितः पुनर्याचितुकामः प्रत्युत्पन्नार्थकृच्छ्रः तस्मिन्न् अविश्वस्तो वा तदात्वे लाभं अल्पं इच्छेत्, आयत्यां प्रभूतम्

07.8.06 मित्र उपकारं अमित्र उपघातं अर्थानुबन्धं अवेक्षमाणः पूर्व उपकारकं कारयितुकामो भूयः तदात्वे महान्तं लाभं उत्सृज्यायत्यां अल्पं इच्छेत्

07.8.07 दूष्यामित्राभ्यां मूलहरेण वा ज्यायसा विगृहीतं त्रातुकामः तथाविधं उपकारं कारयितुकामः सम्बन्धावेक्षी वा तदात्वे चायत्यां च लाभं न प्रतिगृह्णीयात्

07.8.08 कृतसन्धिरतिक्रमितुकामः परस्य प्रकृतिकर्शनं मित्रामित्रसन्धिविश्लेषणं वा कर्तुकामः पराभियोगात्शङ्कमानो लाभं अप्राप्तं अधिकं वा याचेत

07.8.09 तं इतरः तदात्वे चायत्यां च क्रमं अवेक्षेत

07.8.10 तेन पूर्वे व्याख्याताः

07.8.11 अरिविजिगीष्वोः तु स्वं स्वं मित्रं अनुगृह्णतोः शक्यकल्यभव्यारम्भिस्थिरकर्मानुरक्तप्रकृतिभ्यो विशेषः

07.8.12 शक्यारम्भी विषह्यं कर्मारभते, कल्यारम्भी निर्दोषं, भव्यारम्भी कल्याण उदयम्

07.8.13 स्थिरकर्मा नासमाप्य कर्म उपरमते

07.8.14 अनुरक्तप्रकृतिः सुसहायत्वाद् अल्पेनाप्यनुग्रहेण कार्यं साधयति

07.8.15 त एते कृतार्थाः सुखेन प्रभूतं च उपकुर्वन्ति

07.8.16 अतः प्रतिलोमा नानुग्राह्याः

07.8.17 तयोरेकपुरुषानुग्रहे यो मित्रं मित्रतरं वाऽनुगृह्णाति सोऽतिसन्धत्ते

07.8.18 मित्राद् आत्मवृद्धिं हि प्राप्नोति, क्षयव्ययप्रवासपर उपकारान् इतरः

07.8.19 कृतार्थश्च शत्रुर्वैगुण्यं एति

07.8.20 मध्यमं त्वनुगृह्णतोर्यो मध्यमं मित्रं मित्रतरं वाऽनुगृह्णाति सोऽतिसन्धत्ते

07.8.21 मित्राद् आत्मवृद्धिं हि प्राप्नोति, क्षयव्ययप्रवासपर उपकारान् इतरः

07.8.22 मध्यमश्चेद् अनुगृहीतो विगुणः स्याद् अमित्रोऽतिसन्धत्ते

07.8.23 कृतप्रयासं हि मध्यमामित्रं अपसृतं एकार्थ उपगतं प्राप्नोति

07.8.24 तेन उदासीनानुग्रहो व्याख्यातः

07.8.25 मध्यम उदासीनयोर्बलांशदाने यः शूरं कृतास्त्रं दुःखसहं अनुरक्तं वा दण्डं ददाति सोऽतिसन्धीयते

07.8.26 विपरीतोऽतिसन्धत्ते

07.8.27 यत्र तु दण्डः प्रहितः तं वा चार्थं अन्यांश्च साधयति तत्र मौलभृतश्रेणीमित्राटवीबलानां अन्यतमं उपलब्धदेशकालं दण्डं दद्यात्, अमित्राटवीबलं वा व्यवहितदेशकालम्

07.8.28 यं तु मन्येत कृतार्थो मे दण्डं गृह्णीयाद्, अमित्राटव्यऽभूम्यऽनृतुषु वा वासयेद्, अफलं वा कुर्याद् इति, दण्डव्यासङ्गापदेशेन न एनं अनुगृह्णीयात्

07.8.29 एवं अवश्यं त्वनुग्रहीतव्ये तत्कालसहं अस्मै दण्डं दद्यात्

07.8.30 आसमाप्तेश्च एनं वासयेद् योधयेच्च बलव्यसनेभ्यश्च रक्षेत्

07.8.31 कृतार्थाच्च सापदेशं अपस्रावयेत्

07.8.32 दूष्यामित्राटवीदण्डं वाऽस्मै दद्यात्

07.8.33 यातव्येन वा सन्धाय एनं अतिसन्दध्यात्

07.8.34ab समे हि लाभे सन्धिः स्याद् विषमे विक्रमो मतः

07.8.34chd समहीनविशिष्टानां इत्युक्ताः सन्धिविक्रमाः (इति)

Chapt | मित्रहिरण्यभूमिकर्मसन्धयः, तत्र मित्रसन्धिः हिरण्यसन्धिश्च

07.9.01 संहितप्रयाणे मित्रहिरण्यभूमिलाभानां उत्तर उत्तरो लाभः श्रेयान्

07.9.02 मित्रहिरण्ये हि भूमिलाभाद् भवतः, मित्रं हिरण्यलाभात्

07.9.03 यो वा लाभः सिद्धः शेषयोरन्यतरं साधयति

07.9.04 त्वं चाहं च मित्रं लभावहे इत्येवंऽअदिदः समसन्धिः

07.9.05 त्वं मित्रम् इत्येवंऽअदिर्विषमसन्धिः

07.9.06 तयोर्विशेषलाभाद् अतिसन्धिः

07.9.07 समसन्धौ तु यः सम्पन्नं मित्रं मित्रकृच्छ्रे वा मित्रं अवाप्नोति सोऽतिसन्धत्ते

07.9.08 आपद् हि सौहृदस्थैर्यं उत्पादयति

07.9.09 मित्रकृच्छ्रेऽपि नित्यं अवश्यं अनित्यं वश्यं वा इति नित्यं अवश्यं श्रेयः, तद् हि अनुपकुर्वद् अपि नापकरोति इत्याचार्याः

07.9.10 न इति कौटिल्यः

07.9.11 वश्यं अनित्यं श्रेयः

07.9.12 यावद् उपकरोति तावन् मित्रं भवति, उपकारलक्षणं मित्रं इति

07.9.13 वश्ययोरपि महाभोगं अनित्यं अल्पभोगं वा नित्यं इति महाभोगं अनित्यं श्रेयः, महाभोगं अनित्यं अल्पकालेन महद्.उपकुर्वन् महान्ति व्ययस्थानानि प्रतिकरोति इत्याचार्याः ||

07.9.14 न इति कौटिल्यः

07.9.15 नित्यं अल्पभोगं श्रेयः

07.9.16 महाभोगं अनित्यं उपकारभयाद् अपक्रामति, उपकृत्य वा प्रत्यादातुं ईहते

07.9.17 नित्यं अल्पभोगं सातत्याद् अल्पं उपकुर्वन् महता कालेन महद् उपकरोति

07.9.18 गुरुसमुत्थं महन् मित्रं लघुसमुत्थं अल्पं वा इति गुरुसमुत्थं महन् मित्रं प्रतापकरं भवति, यदा च उत्तिष्ठते तदा कार्यं साधयति इत्याचार्याः

07.9.19 न इति कौटिल्यः

07.9.20 लघुसमुत्थं अल्पं श्रेयः

07.9.21 लगुसमुत्थं अल्पं मित्रं कार्यकालं नातिपातयति दौर्बल्याच्च यथा इष्टभोग्यं भवति, न इतरत् प्रकृष्टभौमम्

07.9.22 विक्षिप्तसैन्यं अवश्यसैन्यं वा इति विक्षिप्तं सैन्यं शक्यं प्रतिसंहर्तुं वश्यत्वाद् इत्याचार्याः

07.9.23 न इति कौटिल्यः

07.9.24 अवश्यसैन्यं श्रेयः

07.9.25 अवश्यं हि शक्यं सामादिभिर्वश्यं कर्तुं, न इतरत् कार्यव्यासक्तं प्रतिसंहर्तुम्

07.9.26 पुरुषभोगं हिरण्यभोगं वा मित्रं इति पुरुषभोगं मित्रं श्रेयः, प्रुषभोगं मित्रं प्रतापकरं भवति, यदा च उत्तिष्ठते तदा कार्यं साधयति इत्याचार्याः

07.9.27 न इति कौटिल्यः

07.9.28 हिरण्यभोगं मित्रं श्रेयः

07.9.29 नित्यो हि हिरण्येन योगः कदाचिद् दण्डेन

07.9.30 दण्डश्च हिरण्येनान्ये च कामाः प्राप्यन्त इति

07.9.31 हिरण्यभोगं भूमिभोगं वा मित्रं इति हिरण्यभोगं गतिमत्त्वात् सर्वव्ययप्रतीकारकरम् इत्याचार्याः

07.9.32 न इति कौटिल्यः

07.9.33 मित्रहिरण्ये हि भूमिलाभाद् भवत इत्युक्तं पुरस्ताद्

07.9.34 तस्माद् भूमिभोगं मित्रं श्रेय इति

07.9.35 तुल्ये पुरुषभोगे विक्रमः क्लेशसहत्वं अनुरागः सर्वबललाभो वा मित्रकुलाद् विशेषः

07.9.36 तुल्ये हिरण्यभोगे प्रार्थितार्थता प्राभूत्यं अल्पप्रयसता सातत्यं च विशेषः

07.9.37 तत्र एतद् भवति

07.9.38ab नित्यं वश्यं लघु.उत्थानं पितृपैतामहं महत् ।

07.9.38chd अद्वैध्यं च इति सम्पन्नं मित्रं षड्गुणं उच्यते

07.9.39ab ऋते यद् अर्थं प्रणयाद् रक्ष्यते यच्च रक्षति ।

07.9.39chd पूर्व उपचितसम्बन्धं तन् मित्रं नित्यं उच्यते
07.9.40ab सर्वचित्रमहाभोगं त्रिविधं वश्यं उच्यते ।
07.9.40chd एकतोभोग्युभयतः सर्वतोभोगि चापरम्
07.9.41ab आदातृ वा दात्रऽपि वा जीवत्यरिषु हिंसया ।
07.9.41chd मित्रं नित्यं अवश्यं तद्दुर्गाटव्यऽपसारि च
07.9.42ab अन्यतो विगृहीतं यल्लघुव्यसनं एव वा ।
07.9.42chd सन्धत्ते च उपकाराय तन् मित्रं वश्यं अध्रुवम्
07.9.43ab एकार्थेनाथ सम्बद्धं उपकार्यविकारि च ।
07.9.43chd मित्रभावि भवत्येतन् मित्रं अद्वैध्यं आपदि
07.9.44ab मित्रभावाद् ध्रुवं मित्रं शत्रुसाधारणाच्चलम् ।
07.9.44chd न कस्यचिद् उदासीनं द्वयोरुभयभावि तत्
07.9.45ab विजिगीषोरमित्रं यन् मित्रं अन्तर्धितां गतम् ।
07.9.45chd उपकारेऽनिविष्टं वाऽशक्तं वाऽनुपकारि तत्
07.9.46ab प्रियं परस्य वा रक्ष्यं पूज्यं सम्बद्धं एव वा ।
07.9.46chd अनुगृह्णाति यन् मित्रं शत्रुसाधारणं हि तत्
07.9.47ab प्रकृष्टभौमं सन्तुष्टं बलवच्चालसं च यत् ।
07.9.47chd उदासीनं भवत्येतद् व्यसनाद् अवमानितम्
07.9.48ab अरेर्नेतुश्च यद् वृद्धिं दौर्बल्याद् अनुवर्तते ।
07.9.48chd उभयस्याप्यविद्विष्टं विद्याद् उभयभावि तत्
07.9.49ab कारणाकारणध्वस्तं कारणाकारणागतम् ।
07.9.49chd यो मित्रं समुपेक्षेत स मृत्युं उपगूहति
07.9.50 क्षिप्रं अल्पो लाभश्चिरान् महान् इति वा क्षिप्रं अल्पो लाभः कार्यदेशकालसंवादकः श्रेयान् इत्याचार्याः
07.9.51 न इति कौटिल्यः
07.9.52 चिराद् अविनिपाती बीजसधर्मा महाम्ल्लाभः श्रेयान्, विपर्यये पूर्वः
07.9.53ab एवं दृष्ट्वा ध्रुवे लाभे लाभांशे च गुण उदयम् ।
07.9.53chd स्वार्थसिद्धिपरो यायात् संहितः सामवायिकैः (इति)

Chapt | मित्रहिरण्यभूमिकर्मसन्धयः, तत्र भूमिसन्धिः

07.10.01 त्वं चाहं च भूमिं लभावहे इति भूमिसन्धिः

07.10.02 तयोर्यः प्रत्युपस्थितार्थः सम्पन्नां भूमिं अवाप्नोति सोऽतिसन्धत्ते

07.10.03 तुल्ये सम्पन्नालाभे यो बलवन्तं आक्रम्य भूमिं अवाप्नोति सोऽतिसन्धत्ते

07.10.04 भूमिलाभं शत्रुकर्शनं प्रतापं च हि प्राप्नोति

07.10.05 दुर्बलाद्भूमिलाभे सत्यं सौकर्यं भवति

07.10.06 दुर्बल एव च भूमिलाभः, तत्सामन्तश्च मित्रं अमित्रभावं गच्छति

07.10.07 तुल्ये बलीयस्त्वे यः स्थितशत्रुं उत्पाट्य भूमिं अवाप्नोति सोऽतिसन्धत्ते

07.10.08 दुर्गावाप्तिर्हि स्वभूमिरक्षणं अमित्राटवीप्रतिषेधं च करोति

07.10.09 चलामित्राद्भूमिलाभे शक्यसामन्ततो विशेषः

07.10.10 दुर्बलसामन्ता हि क्षिप्राप्यायनयोगक्षेमा भवति

07.10.11 विपरीता बलवत् सामन्ता कोशदण्डावच्छेदनी च भूमिर्भवति

07.10.12 सम्पन्ना नित्यामित्रा मन्दगुणा वा भूमिरनित्यामित्रा इति सम्पन्ना नित्यामित्रा श्रेयसी भूमिः सम्पन्ना हि कोशदण्डौ सम्पादयति, तौ चामित्रप्रतिघातकौ इत्याचार्याः

07.10.13 न इति कौटिल्यः

07.10.14 नित्यामित्रालाभे भूयान् शत्रुलाभो भवति

07.10.15 नित्यश्च शत्रुरुपकृते चापकृते च शत्रुरेव भवति, अनित्यः तु शत्रुरुपकाराद् अनपकाराद् वा शाम्यति

07.10.16 यस्या हि भूमेर्बहुदुर्गाश्चोरगणैर्म्लेच्छाटवीभिर्वा नित्याविरहिताः प्रत्यन्ताः सा नित्यामित्रा, विपर्यये त्वनित्यामित्रा

07.10.17 अल्पा प्रत्यासन्ना महती व्यवहिता वा भूमिरिति अल्पा प्रत्यासन्ना श्रेयसी

07.10.18 सुखा हि प्रासुं पालयितुं अभिसारयितुं च भवति

07.10.19 विपरीता व्यवहिता

07.10.20 व्यवहितयोरपि दण्डधारणाऽऽत्मधारणा वा भूमिरिति आत्मधारणा श्रेयसी

07.10.21 सा हि स्वसमुत्थाभ्यां कोशदण्डाभ्यां धार्यते

07.10.22 विपरीता दण्डधारणा दण्डस्थानम्

07.10.23 बालिशात् प्राज्ञाद् वा भूमिलाभ इति बालिशाद्भूमिलाभः श्रेयान्

07.10.24 सुप्राप्याऽनुपाल्या हि भवति, अप्रत्यादेया च

07.10.25 विपरीता प्राज्ञाद् अनुरक्ता

07.10.26 पीडनीय उच्छेदनीययोरुच्छेदनीयाद् भूमिलाभः श्रेयान्

07.10.27 उच्छेदनीयो ह्यनपाश्रयो दुर्बलापाश्रयो वाऽभियुक्तः कोशदण्डावादायापसर्तुकामः प्रकृतिभिः त्यज्यते, न पीडनीयो दुर्गमित्रप्रतिष्टब्धः

07.10.28 दुर्गप्रतिष्टब्धयोरपि स्थलनदीदुर्गीयाभ्यां स्थलदुर्गीयाद् भूमिलाभः श्रेयान्

07.10.29 स्थालेयं हि सुरोधावमर्दावस्कन्दं अनिहश्राविशत्रु च

07.10.30 नदीदुर्गं तु द्विगुणक्लेशकरं, उदकं च पातव्यं वृत्तिकरं चामित्रस्य

07.10.31 नदीपर्वतदुर्गीयाभ्यां नदीदुर्गीयाद् ब्भूमिलाभः श्रेयान्

07.10.32 नदीदुर्गं हि हस्तिस्तम्भसङ्क्रमसेतुबन्धनौभिः साध्यं अनित्यगाम्भीर्यं अवस्राव्युदकं च

07.10.33 पार्वतं तु स्व्ऽअरक्षं दुरुपरोधि कृच्छ्रारोहणं, भग्ने च एकस्मिन्न सर्ववधः, शिलावृक्षप्रमोक्षश्च महाऽपकारिणाम्

07.10.34 निम्नस्थलयोधिभ्यो निम्नयोधिभ्यो भूमिलाभः श्रेयान्

07.10.35 निम्नयोधिनो ह्युपरुद्धदेशकालाः, स्थलयोधिनः तु सर्वदेशकालयोधिनः

07.10.36 खनकाकाशयोधिभ्यः खनकेभ्यो भूमिलाभः श्रेयान्

07.10.37 खनका हि खातेन शस्त्रेण च उभयथा युध्यन्ते, शस्त्रेण एवाकाशयोधिनः

07.10.38ab एवंविध्येभ्यः पृथिवीं लभमानोऽर्थशास्त्रवित् ।

07.10.38chd संहितेभ्यः परेभ्यश्च विशेषं अधिगच्छति (इति)

Chapt । मित्रहिरण्यभूमिकर्मसंधयः - तत्र अनवसितसंधिः

07.11.01 त्वं चाहं च शून्यं निवेशयावहे इत्यनवसितसन्धिः

07.11.02 तयोर्यः प्रत्युपस्थितार्थो यथा उक्तगुणां भूमिं निवेशयति सोऽतिसन्धत्ते

07.11.03 तत्रापि स्थलं औदकं वा इति महतः स्थलाद् अल्पं औदकं श्रेयः, सातत्याद् अवस्थितत्वाच्च फलानाम्

07.11.04 स्थलयोरपि प्रभूतपूर्वापरसस्यं अल्पवर्षपाकं असक्तारम्भं श्रेयः

07.11.05 औदकयोरपि धान्यवापं अधान्यवापात्श्रेयः

07.11.06 तयोरल्पबहुत्वे धान्यकान्ताद् अल्पान् महद् अधान्यकान्तं श्रेयः

07.11.07 महत्यवकाशे हि स्थाल्याश्चानूप्याश्चोषधयो भवन्ति

07.11.08 दुर्गादीनि च कर्माणि प्रभूत्येन क्रियन्ते

07.11.09 कृत्रिमा हि भूमिगुणाः

07.11.10 खनिधान्यभोगयोः खनिभोगः कोशकरः, धान्यभोगः कोशकोष्ठागारकरः

07.11.11 धान्यमूला हि दुर्गादीनां कर्मणां आरम्भाः

07.11.12 महाविषयविक्रयो वा खनिभोगः श्रेयान्

07.11.13 द्रव्यहस्तिवनभोगयोर्द्रव्यवनभोगः सर्वकर्मणां योनिः प्रभूतनिधानक्षमश्च, विपरीतो हस्तिवनभोगः इत्याचार्याः

07.11.14 न इति कौटिल्यः

07.11.15 शक्यं द्रव्यवनं अनेकं अनेकस्यां भूमौ वापयितुं, न हस्तिवनम्

07.11.16 हस्तिप्रधानो हि परानीकवध इति

07.11.17 वारिस्थलपथभोगयोरनित्यो वारिपथभोगः, नित्यः स्थलपथभोगः

07.11.18 भिन्नमनुष्या श्रेणीमनुष्या वा भूमिरिति भिन्नमनुष्या श्रेयसी

07.11.19 भिन्नमनुष्या भोग्या भवति, अनुपजाप्या चान्येषां, अनापत्सहा तु

07.11.20 विपरीता श्रेणीमनुष्या, कोपे महादोषा

07.11.21 तस्यां चातुर्वर्ण्यनिवेशे सर्वभोगसहत्वाद् अवरवर्णप्राया श्रेयसी, बाहुल्याद् ध्रुवत्वाच्च कृष्याः कर्षकवती, कृष्याश्चान्येषां चारम्भाणां प्रयोजकत्वात् गोरक्षकवती, पण्यनिचय.ऋणानुग्रहाद् आढ्यवणिग्वती

07.11.22 भूमिगुणानां अपाश्रयः श्रेयान्

07.11.23 दुर्गापाश्रया पुरुषापाश्रया वा भूमिरिति पुरुषापाश्रया श्रेयसी

07.11.24 पुरुषवद् धि राज्यम्

07.11.25 अपुरुषा गौर्वन्ध्येव किं दुहीत

07.11.26 महाक्षयव्ययनिवेशां तु भूमिं अवासुकामः पूर्व एव क्रेतारं पणेत दुर्बलं अराजबीजिनं निरुत्साहं अपक्षं अन्यायवृत्तिं व्यसनिनं दैवप्रमाणं यत्किञ्चनकारिणं वा

07.11.27 महाक्षयव्ययनिवेशायां हि भूमौ दुर्बलो राजबीजी निविष्टः सगन्धाभिः प्रकृतिभिः सह क्षयव्ययेनावसीदति

07.11.28 बलवान् अराजबीजी क्षयव्ययभयाद् असगन्धाभिः प्रकृतिभिः त्यज्यते

07.11.29 निरुत्साहः तु दण्डवान् अपि दण्डस्याप्रणेता सदण्डः क्षयव्ययेनावभज्यते

07.11.30 कोशवान् अप्यपक्षः क्षयव्ययानुग्रहहीनत्वान्न कुतश्चित् प्राप्नोति

07.11.31 अन्यायवृत्तिर्निविष्टं अप्युत्थापयेत्

07.11.32 स कथं अनिविष्टं निवेशयेत्

07.11.33 तेन व्यसनी व्याख्यातः

07.11.34 दैवप्रमाणो मानुषहीनो निरारम्भो विपन्नकर्मारम्भो वाऽवसीदति

07.11.35 यत्किञ्चनकारी न किञ्चिद् आसादयति

07.11.36 स च एषां पापिष्ठतमो भवति

07.11.37 यत्किञ्चिद्ऽअरभमाणो हि विजिगीषोः कदाचिच्छिद्रं आसादयेद् इत्याचार्याः

07.11.38 यथा छिद्रं तथा विनाशं अप्यासादयेद् इति कौटिल्यः

07.11.39 तेषां अलाभे यथा पार्ष्णिग्राह उपग्रहे वक्ष्यामः तथा भूमिं अवस्थापयेत्

07.11.40 इत्यभिहितसन्धिः

07.11.41 गुणवतीं आदेयां वा भूमिं बलवता क्रयेण याचितः सन्धिं अवस्थाप्य दद्यात्

07.11.42 इत्यनिभृतसन्धिः

07.11.43 समेन वा याचितः कारणं अवेक्ष्य दद्यात् प्रत्यादेया मे भूमिर्वश्या वा, अनया प्रतिबद्धः परो मे वश्यो भविष्यति भूमिविक्रयाद् वा मित्रहिरण्यलाभः कार्यसामर्थ्यकरो मे भविष्यति इति

07.11.44 तेन हीनः क्रेता व्याख्यातः

07.11.45ab एवं मित्रं हिरण्यं च सजनां अजनां च गाम् ।
07.11.45chd लभमानोऽतिसन्धत्ते शास्त्रवित् सामवायिकान् (इति)

Chapt । मित्रहिरण्यभूमिकर्मसंधयः, तत्र कर्मसंधिः
07.12.01 त्वं चाहं च दुर्गं कारयावहे इति कर्मसन्धिः
07.12.02 तयोर्यो दैवकृतं अविषह्यं अल्पव्ययारम्भं दुर्गं कारयति सोऽतिसन्धत्ते
07.12.03 तत्रापि स्थलनदीपर्वतदुर्गाणां उत्तर उत्तरं श्रेयः
07.12.04 सेतुबन्धयोरप्याहार्य उदकात् सह उदकः श्रेयान्
07.12.05 सह उदकयोरपि प्रभूतवापस्थानः श्रेयान्
07.12.06 द्रव्यवनयोरपि यो महत्सारवद्द्रव्याटवीकं विषयान्ते नदीमातृकं द्रव्यवनं छेदयति सोऽतिसन्धत्ते
07.12.07 नदीमातृकं हि स्व्ऽअजीवं अपाश्रयश्चापदि भवति
07.12.08 हस्तिवनयोरपि यो बहुशूरमृगं दुर्बलप्रतिवेशंऽनन्तावक्लेशि विषयान्ते हस्तिवनं बध्नाति सोऽतिसन्धत्ते
07.12.09 तत्रापि बहुकुण्ठाल्पशूरयोः अल्पशूरं श्रेयः, शूरेषु हि युद्धं, अल्पाः शूरा बहून् अशूरान् भञ्जन्ति, ते भग्नाः स्वसैन्यावघातिनो भवन्ति इत्याचार्याः
07.12.10 न इति कौटिल्यः
07.12.11 कुण्ठा बहवः श्रेयांसः, स्कन्धविनियोगाद् अनेकं कर्म कुर्वाणाः स्वेषां अपाश्रयो युद्धे, परेषां दुर्धर्षा विभीषणाश्च
07.12.12 बहुषु हि कुण्ठेषु विनयकर्मणा शक्यं शौर्यं आधातुं, न त्वेवाल्पेषु शूरेषु बहुत्वं इति
07.12.13 खन्योरपि यः प्रभूतसारां अदुर्गमार्गां अल्पव्ययारम्भां खनिं खानयति, सोऽतिसन्धत्ते
07.12.14 तत्रापि महासारं अल्पं अल्पसारं वा प्रभूतं इति महासारं अल्पं श्रेयः, वज्रमणिमुक्ताप्रवालहेमरूप्यधातुर्हि प्रभूतं अल्पसारं अत्यर्घेण ग्रसते इत्याचार्याः
07.12.15 न इति कौटिल्यः
07.12.16 चिराद् अल्पो महासारस्य क्रेता विद्यते, प्रभूतः सातत्याद् अल्पसारस्य

07.12.17 एतेन वणिक्पथो व्याख्यातः

07.12.18 तत्रापि वारिस्थलपथयोर्वारिपथः श्रेयान्, अल्पव्ययव्यायामः प्रभूतपण्य उदयश्च इत्याचार्याः

07.12.19 न इति कौटिल्यः

07.12.20 सम्मुद्धगतिरसार्वकालिकः प्रकृष्टभययोनिर्निष्प्रतीकारश्च वारिपथः, विपरीतः स्थलपथः

07.12.21 वारिपथे तु कूलसम्यानपथयोः कूलपथः पण्यपत्तनबाहुल्यात्श्रेयान्, नदीपथो वा, सातत्याद् विषह्याबाधत्वाच्च

07.12.22 स्थलपथेऽपि हैमवतो दक्षिणापथात्श्रेयान्, हस्त्यश्वगन्धदन्ताजिनरूप्यसुवर्णपण्याः सारवत्तराः इत्याचार्याः

07.12.23 न इति कौटिल्यः

07.12.24 कम्बलाजिनाश्वपण्यवर्जाः शङ्खवज्रमणिमुक्तासुवर्णपण्याश्च प्रभूततरा दक्षिणापथे

07.12.25 दक्षिणापथेऽपि बहुखनिः सारपण्यः प्रसिद्धगतिरल्पव्ययव्यायामो वा वणिक्पथः श्रेयान्, प्रभूतविषयो वा फल्गुपुण्यः

07.12.26 तेन पूर्वः पश्चिमश्च वणिक्पथो व्याख्यातः

07.12.27 तत्रापि चक्रपादपथयोश्चक्रपथो विपुलारम्भत्वात्श्रेयान्, देशकालसम्भावनो वा खर उष्ट्रपथः

07.12.28 आभ्यां अंसपथो व्याख्यातः

07.12.29 परकर्म उदयो नेतुः क्षयो वृद्धिर्विपर्यये

07.12.30 तुल्ये कर्मपथे स्थानं ज्ञेयं स्वं विजिगीषुणा

07.12.31 अल्पागमातिव्ययता क्षयो वृद्धिर्विपर्यये

07.12.32 समायव्ययता स्थानं कर्मसु ज्ञेयं आत्मनः

07.12.33 तस्माद् अल्पव्ययारम्भं दुर्गादिषु महा उदयम्

07.12.34 कर्म लब्ध्वा विशिष्टः स्याद् इत्युक्ताः कर्मसन्धयः (इति)

Chapt | पार्ष्णिग्राहिचिन्ता

07.13.01 संहत्यारिविजिगीष्वोरमित्रयोः पराभियोगिनोः पार्ष्णिं गृह्णतोर्यः शक्तिसम्पन्नस्य पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.02 शक्तिसम्पन्नो ह्यमित्रं उच्छिद्य पार्ष्णिग्राहं उच्छिन्द्यात्, न हीनशक्तिरलब्धलाभः

07.13.03 शक्तिसाम्ये यो विपुलारम्भस्य पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.04 विपुलारम्भो ह्यमित्रं उच्छिद्य पार्ष्णिग्राहं उच्छिन्द्यात्, नाल्पारम्भः सक्तचक्रः

07.13.05 आरम्भसाम्ये यः सर्वसन्दोहेन प्रयातस्य पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.06 शून्यमूलो ह्यस्य सुकरो भवति, नैकदेशबलप्रयातः कृतपार्ष्णिप्रतिविधानः

07.13.07 बल उपादानसाम्ये यश्चलामित्रं प्रयातस्य पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.08 चलामित्रं प्रयातो हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहं उच्छिन्द्यात्, न स्थितामित्रं प्रयातः

07.13.09 असौ हि दुर्गप्रतिहतः पार्ष्णिग्राहे च प्रतिनिवृत्तः स्थितेनामित्रेणावगृह्यते

07.13.10 तेन पूर्वे व्याख्याताः

07.13.11 शत्रुसाम्ये यो धार्मिकाभियोगिनः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.12 धार्मिकाभियोगी हि स्वेषां परेषां च द्वेष्यो भवति, अधार्मिकाभियोगी सम्प्रियः

07.13.13 तेन मूलहरतादात्विककदर्याभियोगिनां पार्ष्णिग्रहणं व्याख्यातम्

07.13.14 मित्राभियोगिनोः पार्ष्णिग्रहणे त एव हेतवः

07.13.15 मित्रं अमित्रं चाभियुञ्जानयोर्यो मित्राभियोगिनः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.16 मित्राभियोगी हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहं उच्छिन्द्यात्

07.13.17 सुकरो हि मित्रेण सन्धिर्नामित्रेण

07.13.18 मित्रं अमित्रं च उद्धरतोर्योऽमित्र उद्धारिणः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते

07.13.19 वृद्धमित्रो ह्यमित्र उद्धारी पार्ष्णिग्राहं उच्छिन्द्यात्, न इतरः स्वपक्ष उपघाती

07.13.20 तयोरलब्धलाभापगमने यस्यामित्रो महतो लाभाद् वियुक्तः क्षयव्ययाधिको वा स पार्ष्ण्िग्राहोऽतिसन्धत्ते

07.13.21 लब्धलाभापगमने यस्यामित्रो लाभेन शक्त्या हीनः स पार्ष्ण्िग्राहोऽतिसन्धत्ते, यस्य वा यातव्यः शत्रोर्विग्रहापकारसमर्थः स्यात्

07.13.22 पार्ष्ण्िग्राहयोरपि यः शक्यारम्भबल उपादानाधिकः स्थितशत्रुः पार्श्वस्थायी वा सोऽतिसन्धत्ते

07.13.23 पार्श्वस्थायी हि यातव्याभिसारो मूलाबाधकश्च भवति, मूलाबाधक एव पश्चात्स्थायी

07.13.24ab पार्ष्ण्िग्राहाः त्रयो ज्ञेयाः शत्रोश्चेष्टानिरोधकाः ।

07.13.24chd सामन्तः पृष्ठतो वर्गः प्रतिवेशौ च पार्श्वयोः

07.13.25ab अरेर्नेतुश्च मध्यस्थो दुर्बलोऽन्तर्धिरुच्यते ।

07.13.25chd प्रतिघातो बलवतो दुर्गाटव्य्ऽपसारवान्

07.13.26 मध्यमं त्वरिविजिगीष्वोर्लिप्समानयोर्मध्यमस्य पार्ष्ण्िं गृह्णतोर्लब्धलाभापगमने यो मध्यमं मित्राद् वियोजयत्यमित्रं च मित्रं आप्नोति सोऽतिसन्धत्ते

07.13.27 सन्धेयश्च शत्रुरुपकुर्वाणो, न मित्रं मित्रभावाद् उत्क्रान्तम्

07.13.28 तेन उदासीनलिप्सा व्याख्याता

07.13.29 पार्ष्ण्िग्रहणाभियानयोः तु मन्त्रयुद्धाद् अभ्युच्चयः

07.13.30 व्यायामयुद्धे हि क्षयव्ययाभ्यां उभयोरवृद्धिः

07.13.31 जित्वाऽपि हि क्षिणदण्डकोशः पराजितो भवति इत्याचार्याः

07.13.32 न इति कौटिल्यः

07.13.33 सुमहताऽपि क्षयव्ययेन शत्रुविनाशोऽभ्युपगन्तव्यः

07.13.34 तुल्ये क्षयव्यये यः पुरस्ताद् दूष्यबलं घातयित्वा निहशल्यः पश्चाद् वश्यबलो युध्येत सोऽतिसन्धत्ते

07.13.35 द्वयोरपि पुरस्ताद् दूष्यबलघातिनोर्यो बहुलतरं शक्तिमत्तरं अत्यन्तदूष्यं च घातयेत् सोऽतिसन्धत्ते

07.13.36 तेनामित्राटवीबलघातो व्याख्यातः

07.13.37ab पार्ष्ण्िग्राहोऽभियोक्ता वा यातव्यो वा यदा भवेत् ।

07.13.37chd विजिगीषुः तदा तत्र नेत्रं एतत् समाचरेत्
07.13.38ab पार्ष्ण्िग्राहो भवेन्नेता शत्रोर्मित्राभियोगिनः ।
07.13.38chd विग्राह्य पूर्वं आक्रन्दं पार्ष्ण्िग्राहाभिसारिणा
07.13.39ab आक्रन्देनाभियुञ्जानः पार्ष्ण्िग्राहं निवारयेत् ।
07.13.39chd तथाऽऽक्रन्दाभिसारेण पार्ष्ण्िग्राहाभिसारिणम्
07.13.40ab अरिमित्रेण मित्रं च पुरस्ताद् अवघट्टयेत् ।
07.13.40chd मित्रमित्रं अरेश्चापि मित्रमित्रेण वारयेत्
07.13.41ab मित्रेण ग्राहयेत् पार्ष्ण्िं अभियुक्तोऽभियोगिनः ।
07.13.41chd मित्रमित्रेण चाक्रन्दं पार्ष्ण्िग्राहान्निवारयेत्
07.13.42ab एवं मण्डलं आत्मार्थं विजिगीषुर्निवेशयेत् ।
07.13.42chd पृष्ठतश्च पुरस्ताच्च मित्रप्रकृतिसम्पदा
07.13.43ab कृत्स्ने च मण्डले नित्यं दूतान् गूढांश्च वासयेत् ।
07.13.43chd मित्रभूतः सपत्नानां हत्वा हत्वा च संवृतः
07.13.44ab असंवृतस्य कार्याणि प्राप्तान्यपि विशेषतः ।
07.13.44chd निहसंशयं विपद्यन्ते भिन्नप्लव इव उदधौ (इति)

Chapt । हीनशक्तिपूरणम्

07.14.01 सामवायिकैरेवं अभियुक्तो विजिगीषुर्यः तेषां प्रधानः तं ब्रूयात् त्वया मे सन्धिः, इदं हिरण्यं, अहं च मित्रं, द्विगुणा ते वृद्धिः, नार्हस्यात्मक्षयेण मित्रमुखान् अमित्रान् वर्धयितुं, एते हि वृद्धाः त्वां एव परिभविष्यन्ति इति

07.14.02 भेदं वा ब्रूयात् अनपकारो यथाऽहं एतैः सम्भूयाभियुक्तः तथा त्वां अप्येते संहितबलाः स्वस्था व्यसने वाऽभियोक्ष्यन्ते, बलं हि चित्तं विकरोति, तद् एषां विघातय इति

07.14.03 भिन्नेषु प्रधानं उपगृह्य हीनेषु विक्रमयेत्, हीनान् अनुग्राह्य वा प्रधाने, यथा वा श्रेयोऽभिमन्येत तथा

07.14.04 वैरं वा परैर्ग्राहयित्वा विसंवादयेत्

07.14.05 फलभूयस्त्वेन वा प्रधानं उपजाप्य सन्धिं कारयेत्

07.14.06 अथ उभयवेतनाः फलभूयस्त्वं दर्शयन्तः सामवायिकान् अतिसंहिताः स्थ इत्युद्दूषयेयुः

07.14.07 दुष्टेषु सन्धिं दूषयेत्

07.14.08 अथ उभयवेतना भूयो भेदं एषां कुर्युः एवं तद् यद् अस्माभिर्दर्शितम् इति

07.14.09 भिन्नेष्वन्यतम उपग्रहेण चेष्टेत

07.14.10 प्रधानाभावे सामवायिकानां उत्साहयितारं स्थिरकर्माणं अनुरक्तप्रकृक्तिं लोभाद् भयाद् वा सङ्घातं उपागतं विजिगीषोर्भीतं राज्यप्रतिसम्बद्धं मित्रं चलामित्रं वा पूर्वान् उत्तराभावे साधयेत् - उत्साहयितारं आत्मनिसर्गेण, स्थिरकर्माणं सान्त्वप्रणिपातेन, अनुरक्तप्रकृतिं कन्यादानयापनाभ्यां, लुब्धं अंशद्वैगुण्येन, भीतं एभ्यः कोशदण्डानुग्रहेण, स्वतो भीतं विश्वास्य प्रतिभूप्रदानेन, राज्यप्रतिसम्बद्धं एकीभाव उपगमनेन, मित्रं उभयतः प्रियहिताभ्यां, उपकारत्यागेन वा, चलामित्रं अवधृतं अनपकार उपकाराभ्याम्

07.14.11 यो वा यथाऽयोगं भजेत तं तथा साधयेत्, सामदानभेददण्डैर्वा यथाऽऽपत्सु व्याख्यास्यामः

07.14.12 व्यसन उपघातत्वरितो वा कोशदण्डाभ्यां देशे काले कार्ये वाऽवधृतं सन्धिं उपेयात्

07.14.13 कृतसन्धिर्हीनं आत्मानं प्रतिकुर्वीत

07.14.14 पक्षे हीनो बन्धुमित्रपक्षं कुर्वीत, दुर्गं अविषह्यं वा

07.14.15 दुर्गमित्रप्रतिष्टब्धो हि स्वेषां परेषां च पूज्यो भवति

07.14.16 मन्त्रशक्तिहीनः प्राज्ञपुरुष उपचयं विद्यावृद्धसम्योगं वा कुर्वीत

07.14.17 तथा हि सद्यः श्रेयः प्राप्नोति

07.14.18 प्रभावहीनः प्रकृतियोगक्षेमसिद्धौ यतेत

07.14.19 जनपदः सर्वकर्मणां योनिः, ततः प्रभावः

07.14.20 तस्य स्थानं आत्मनश्चापदि दुर्गम्

07.14.21 सेतुबन्धः सस्यानां योनिः

07.14.22 नित्यानुषक्तो हि वर्षगुणलाभः सेतुवापेषु

07.14.23 वणिक्पथः परातिसन्धानस्य योनिः

07.14.24 वणिक्पथेन हि दण्डगूढपुरुषातिनयनं शस्त्रावरणयानवाहनक्रयश्च क्रियते, प्रवेशो निर्णयनं च

07.14.25 खनिः सङ्ग्राम उपकरणानां योनिः, द्रव्यवनं दुर्गकर्मणां यानरथयोश्च, हस्तिवनं हस्तिनां, गवाश्वखर उष्ट्राणां च व्रजः

07.14.26 तेषां अलाभे बन्धुमित्रकुलेभ्यः समार्जनम्

07.14.27 उत्साहहीनः श्रेणीप्रवीरपुरुषाणां चोरगणाटविकम्लेच्छजातीनां परापकारिणां गूढपुरुषाणां च यथालाब्भं उपचयं कुर्वीत

07.14.28 परमिश्राप्रतीकारं आबलीयसं वा परेषु प्रयुञ्जीत

07.14.29ab एवं पक्षेण मन्त्रेण द्रव्येण च बलेन च ।

07.14.29chd सम्पन्नः प्रतिनिर्गच्छेत् परावग्रहं आत्मनः (इति)

Chapt । विगृह्य उपरोधहेतवः - दण्ड उपनतवृत्तम्

07.15.01 दुर्बलो राजा बलवताऽभियुक्तः तद्विशिष्टबलं आश्रयेत यं इतरो मन्त्रशक्त्या नातिसन्दध्यात्

07.15.02 तुल्यमन्त्रशक्तीनां आयत्तसम्पदो वृद्धसम्योगाद् वा विशेषः

07.15.03 विशिष्टबलाभावे समबलैः तुल्यबलसङ्घैर्वा बलवतः सम्भूय तिष्ठेद् यान्न मन्त्रप्रभावशक्तिभ्यां अतिसन्दध्यात्

07.15.04 तुल्यमन्त्रप्रभावशक्तीनां विपुलारम्भतो विशेषः

07.15.05 समबलाभावे हीनबलैः शुचिभिरुत्साहिभिः प्रत्यनीकभूतैर्बलवतः सम्भूय तिष्ठेद् यान्न मन्त्रप्रभाव उत्साहशक्तिभिरतिसन्दध्यात्

07.15.06 तुल्य उत्साहशक्तीनां स्वयुद्धभूमिलाभाद् विशेषः

07.15.07 तुल्यभूमीनां स्वयुद्धकाललाभाद् विशेषः

07.15.08 तुल्यदेशकालानां युग्यशस्त्रावरणतो विशेषः

07.15.09 सहायाभावे दुर्गं आश्रयेत यत्रामित्रः प्रभूतसैन्योऽपि भक्तयवस इन्धन उदक उपरोधं न कुर्यात् स्वयं च क्षयव्ययाभ्यां युज्येत

07.15.10 तुल्यदुर्गाणां निचयापसारतो विशेषः

07.15.11 निचयापसारसम्पन्नं हि मनुष्यदुर्गं इच्छेद् इति कौटिल्यः

07.15.12a तद् एभिः कार्णैराश्रयेत - पार्ष्णिग्राहं आसारं मध्यमं उदासीनं वा प्रतिपादयिष्यामि, सामन्ताटविकतत्कुलीनापरुद्धानां अन्यतमेनास्य राज्यं हारयिष्यामि घातयिष्यामि वा -

07.15.12b कृत्यपक्ष उपग्रहेण वाऽस्य दुर्गे राष्ट्रे स्कन्धावारे वा कोपं समुत्थापयिष्यामि, शस्त्राग्निरसप्रणिधानैरौपनिषदिकैर्वा यथा इष्टं आसन्नं हनिष्यामि -

07.15.12ch स्वयंऽधिष्ठितेन वा योगप्रणिधानेन क्षयव्ययं एनं उपनेष्यामि, क्षयव्ययप्रवास उपतप्ते वाऽस्य मित्रवर्गे सैन्ये वा क्रमेण उपजापं प्राप्स्यामि -

07.15.12d वीवधासारप्रसारवधेन वाऽस्य स्कन्धावारावग्रहं करिष्यामि, दण्ड उपनयेन वाऽस्य रन्ध्रं उत्थाप्य सर्वसन्दोहेन प्रहरिष्यामि, प्रतिहत उत्साहेन वा यथा इष्टं सन्धिं अवाप्स्यामि, मयि प्रतिबद्धस्य वा सर्वतः कोपाः समुत्थास्यन्ति -

07.15.12e निरासारं वाऽस्य मूलं मित्राटवीदण्डैरुद्घातयिष्यामि, महतो वा देशस्य योगक्षेमं इहस्थः पालयिष्यामि, स्वविक्षिप्तं मित्रविक्षिप्तं वा मे सैन्यं इहस्थस्य एकस्थं अविषह्यं भविष्यति, निम्नखातरात्रियुद्धविशारदं वा मे सैन्यं पथ्याबाधमुक्तं आसन्ने कर्म करिष्यति -

07.15.12f विरुद्धदेशकालं इहागतो वा स्वयं एव क्षयव्ययाभ्यां न भविष्यति, महाक्षयव्ययाभिगम्योऽयं देशो दुर्गाटव्य्ऽपसारबाहुल्यात् -

07.15.12g परेषां व्याधिप्रायः सैन्यव्यायामानां अलब्धभौमश्च, तं आपद्गतः प्रवेक्ष्यति, प्रविष्टो वा न निर्गमिष्यति इति

07.15.13 कारणाभावे बलसमुच्छ्रये वा परस्य दुर्गं उन्मुच्यापगच्छेत्

07.15.14 अग्निपतङ्गवद् अमित्रे वा प्रविशेत्

07.15.15 अन्यतरसिद्धिर्हि त्यक्तात्मनो भवति इत्याचार्याः

07.15.16 न इति कौटिल्यः

07.15.17 सन्धेयतां आत्मनः परस्य च उपलभ्य सन्दधीत

07.15.18 विपर्यये विक्रमेण सन्धिं अपसारं वा लिप्सेत

07.15.19 सन्धेयस्य वा दूतं प्रेषयेत्

07.15.20 तेन वा प्रेषितं अर्थमानाभ्यां सत्कृत्य ब्रूयात् इदं राज्ञः पण्यागारं, इदं देवीकुमाराणां, देवीकुमारवचनात्, इदं राज्यं अहं च त्वद्ऽर्पणः इति

07.15.21 लब्धसंश्रयः समयाचारिकवद् भर्तरि वर्तेत

07.15.22 दुर्गादीनि च कर्माणि

आवाहविवाहपुत्राभिषेकाश्वपण्यहस्तिग्रहणसत्त्रयात्राविहारगमनानि चानुज्ञातः कुर्वीत

07.15.23 स्वभूम्य्sवस्थितप्रकृतिसन्धिं उपघातं अपसृतेषु वा सर्वं अनुज्ञातः कुर्वीत

07.15.24 दुष्टपौरजानपदो वा न्यायवृत्तिरन्यां भूमिं याचेत

07.15.25 दुष्यवद् उपांशुदण्डेन वा प्रतिकुर्वीत

07.15.26 उचितां वा मित्राद् भूमिं दीयमानां न प्रतिगृह्णीयात्

07.15.27 मन्त्रिपुरोहितसेनापतियुवराजानां अन्यतमं अदृश्यमाने भर्तरि पश्येत्, यथाशक्ति च उपकुर्यात्

07.15.28 दैवतस्वस्तिवाचनेषु तत्परा आशिषो वाचयेत्

07.15.29 सर्वत्रात्मनिसर्गं गुणं ब्रूयात्

07.15.30ab सम्युक्तबलवत्सेवी विरुद्धः शङ्कितादिभिः ।

07.15.30chd वर्तेत दण्ड उपनतो भर्तर्येवं अवस्थितः (इति)

Chapt । दण्ड उपनायिवृत्तम्

07.16.01 अनुज्ञातसन्धिपण उद्वेगकरं बलवान् विजिगीषमाणो यतः स्वभूमिः स्व.ऋतुवृत्तिश्च स्वसैन्यानां, अदुर्गापसारः शत्रुर्sपार्ष्णिरनासारश्च, ततो यायात्

07.16.02 विपर्यये कृतप्रतीकारो यायात्

07.16.03 सामदानाभ्यां दुर्बलान् उपनमयेत्, भेददण्डाभ्यां बलवतः

07.16.04 नियोगविकल्पसमुच्चयैश्च उपायानां अनन्तर एकान्तराः प्रकृतीः साधयेत्

07.16.05 ग्रामारण्य उपजीविव्रजवणिक्पथानुपालनं उज्झितापसृतापकारिणां चार्पणं इति सान्त्वं आचरेत्

07.16.06 भूमिद्रव्यकन्यादानं अभयस्य च इति दानं आचरेत्

07.16.07 सामन्ताटविकतत्कुलीनापरुद्धानां अन्यतम उपग्रहेण कोशदण्डभूमिदाययाचनं इति भेदं आचरेत्

07.16.08 प्रकाशकूटतूष्णींयुद्धदुर्गलम्भ उपायैरमित्रप्रग्रहणं इति दण्डं आचरेत्

07.16.09 एवं उत्साहवतो दण्ड उपकारिणः स्थापयेत्, स्वप्रभाववतः कोश उपकारिणः, प्रज्ञावतो भूम्य्.उपकारिणः

07.16.10 तेषां पण्यपत्तनग्रामखनिसञ्जातेन रत्नसारफल्गुकुप्येन द्रव्यहस्तिवनव्रजसमुत्थेन यानवाहनेन वा यद् बहुश उपकरोति तच्चित्रभोगम्

07.16.11 यद् दण्डेन कोशेन वा महद् उपकरोति तन् महाभोगम्

07.16.12 यद् दण्डकोशभूमीभिरुपकरोति तत् सर्वभोगम्

07.16.13 यद् अमित्रं एकतः प्रतिकरोति तद् एकतोभोगि

07.16.14 यद् अमित्रं आसारं च उभयतः प्रतिकरोति तद् उभयतोभोगि

07.16.15 यद् अमित्रासारप्रतिवेशाटविकान् सर्वतः प्रतिकरोति तत् सर्वतोभोगि

07.16.16a पार्ष्ण्िग्राहश्चाटविकः शत्रुमुख्यः शत्रुर्वा भूमिदानसाध्यः कश्चिद् आसाद्येत, निर्गुणया भूम्या एनं उपग्राहयेत्, अप्रतिसम्बद्धया दुर्गस्थं, निरुपजीव्ययाऽऽटविकं -

07.16.16b प्रत्यादेयया तत्कुलीनं शत्रोः, अपच्छिन्नया शत्रोरपरुद्धं नित्यामित्रया श्रेणीबलं, बलवत्सामन्तया संहतबलं, उभाभ्यां युद्धे प्रतिलोमं, -

07.16.16ch अलब्धव्यायामया उत्साहिनं, शून्ययाऽरिपक्षीयं, कर्शितयाऽपवाहितं, महाक्षयव्ययनिवेशया गतप्रत्यागतं, अनपाश्रयया प्रत्यपसृतं, परेणानधिवास्यया स्वयं एव भर्तारं उपग्राहयेत्

07.16.17 तेषां महा उपकारं निर्विकारं चानुवर्तयेत्

07.16.18 प्रतिलोमं उपांशुना साधयेत्

07.16.19 उपकारिणं उपकारशक्त्या तोषयेत्

07.16.20 प्रयासतश्चार्थमानौ कुर्याद्, व्यसनेषु चानुग्रहम्

07.16.21 स्वयंऽअगतानां यथा इष्टदर्शनं प्रतिविधानं च कुर्यात्

07.16.22 परिभव उपघातकुत्सातिवादांश्च एषु न प्रयुञ्जीत

07.16.23 दत्त्वा चाभयं पिता इवानुगृह्णीयात्

07.16.24 यश्चास्यापकुर्यात् तद् दोषं अभिविख्याप्य प्रकाशं एनं घातयेत्

07.16.25 पर उद्वेगकारणाद् वा दाण्डकर्मिकवच्चेष्टेत

07.16.26 न च हतस्य भूमिद्रव्यपुत्रदारान् अभिमन्येत

07.16.27 कुल्यान् अप्यस्य स्वेषु पात्रेषु स्थापयेत्

07.16.28 कर्मणि मृतस्य पुत्रं राज्ये स्थापयेत्

07.16.29 एवं अस्य दण्ड उपनताः पुत्रपौत्रान् अनुवर्तन्ते

07.16.30 यः तु उपनतान् हत्वा बद्ध्वा वा भूमिद्रव्यपुत्रदारान् अभिमन्येत तस्य उद्विग्नं मण्डलं अभावाय उत्तिष्ठते

07.16.31 ये चास्यामात्याः स्वभूमिष्वायत्ताः ते चास्य उद्विग्ना मण्डलं आश्रयन्ते

07.16.32 स्वयं वा राज्यं प्राणान् वाऽस्याभिमन्यन्ते

07.16.33ab स्वभूमिषु च राजानः तस्मात् साम्नाऽनुपालिताः ।

07.16.33chd भवन्त्यनुगुणा राज्ञः पुत्रपौत्रानुवर्तिनः (इति)

Chapt । संधिकर्म -समाधिमोक्षः

07.17.01 शमः सन्धिः समाधिरित्येकोऽर्थः

07.17.02 राज्ञां विश्वास उपगमः शमः सन्धिः समाधिरिति

07.17.03 सत्यं शपथो वा चलः सन्धिः, प्रतिभूः प्रतिग्रहो वा स्थावरः इत्याचार्याः

07.17.04 न इति कौटिल्यः

07.17.05 सत्यं शपथो वा परत्र इह च स्थावरः सन्धिः, इहार्थ एव प्रतिभूः प्रतिग्रहो वा बलापेक्षः

07.17.06 संहिताः स्मः इति सत्यसन्धाः पूर्वे राजानः सत्येन सन्दधिरे

07.17.07 तस्यातिक्रमे शपथेन अग्न्य्.उदकसीताप्राकारलोष्टहस्तिस्कन्धाश्वपृष्टरथ उपस्थशस्त्ररत्नबीजगन्धरससुवर्णहिरण्यान्यालेभिरे हन्युरेतानि त्यजेयुश्च एनं यः शपथं अतिक्रामेत् इति

07.17.08 शपथातिक्रमे महतां तपस्विनां मुख्यानां वा प्रातिभाव्यबन्धः प्रतिभूः

07.17.09 तस्मिन् यः परावग्रहसमर्थान् प्रतिभुवो गृह्णाति, सोऽतिसन्धत्ते

07.17.10 विपरीतोऽतिसन्धीयते

07.17.11 बन्धुमुख्यप्रग्रहः प्रतिग्रहः

07.17.12 तस्मिन् यो दूष्यामात्यं दूष्यापत्यं वा ददाति, सोऽतिसन्धत्ते

07.17.13 विपरीतोऽतिसन्धीयते

07.17.14 प्रतिग्रहग्रहणविश्वस्तस्य हि परश्छिद्रेषु निरपेक्षः प्रहरति

07.17.15 अपत्यसमाधौ तु कन्यापुत्रदाने ददत् तु कन्यां अतिसन्धत्ते

07.17.16 कन्या ह्यदायादा परेषां एवार्थायाक्लेश्या(?) च

07.17.17 विपरीतः पुत्रः

07.17.18 पुत्रयोरपि यो जात्यं प्राज्ञं शूरं कृतास्त्रं एकपुत्रं वा ददाति सोऽतिसन्धीयते

07.17.19 विपरीतोऽतिसन्धत्ते

07.17.20 जात्याद् अजात्यो हि लुप्तदायादसन्तानत्वाद् आधातुं श्रेयान्, प्राज्ञाद् अप्राज्ञो मन्त्रशक्तिलोपात्, शूराद् अशूर उत्साहशक्तिलोपात्, कृतास्त्राद् अकृतास्त्रः प्रहर्तव्यसम्पल्लोपात्, एकपुत्राद् अनेकपुत्रो निरपेक्षत्वात्

07.17.21 जात्यप्राज्ञयोर्जात्यं अप्राज्ञं ऐश्वर्यप्रकृतिरनुवर्तते, प्राज्ञं अजात्यं मन्त्राधिकारः

07.17.22 मन्त्राधिकारेऽपि वृद्धसम्योगाज् जात्यः प्राज्ञं अतिसन्धत्ते

07.17.23 प्राज्ञशूरयोः प्राज्ञं अशूरं मतिकर्मणां योगोऽनुवर्तते, शूरं अप्राज्ञं विक्रमाधिकारः

07.17.24 विक्रमाधिकारेऽपि हस्तिनं इव लुब्धकः प्राज्ञः शूरं अतिसन्धत्तेश्

07.17.25 शूरकृतास्त्रयोः शूरं अकृतास्त्रं विक्रमव्यवसायोऽनुवर्तते, कृतास्त्रं अशूरं लक्ष्यलम्भाधिकारः

07.17.26 लक्ष्यलम्भाधिकारेऽपि स्थैर्यप्रतिपत्त्यऽसम्मोषैः शूरः कृतास्त्रं अतिसन्धत्ते

07.17.27 बह्व.एकपुत्रयोर्बहुपुत्र एकं दत्त्वा शेषप्रतिष्टब्धः सन्धिं अतिक्रामति, न इतरः

07.17.28 पुत्रसर्वस्वदाने सन्धिश्चेत् पुत्रफलतो विशेषः

07.17.29 समफलयोः शक्तप्रजननतो विशेषः

07.17.30 शक्तप्रजननयोरप्युपस्थितप्रजननतो विशेषः

07.17.31 शक्तिमत्येकपुत्रे तु लुप्तपुत्र उत्पत्तिरात्मानं आदध्यात्, न च एकपुत्रं इति

07.17.32 अभ्युच्चीयमानः समाधिमोक्षं कारयेत्

07.17.33 कुमारासन्नाः सत्त्रिणः कारुशिल्पिव्यञ्जनाः कर्माणि कुर्वाणाः सुरुङ्गया रात्रावुपखानयित्वा कुमारं अपहरेयुः

07.17.34 नटनर्तकगायनवादकवाग्जीवनकुशीलवप्लवकसौभिका वा पूर्वप्रणिहिताः परं उपतिष्ठेरन्

07.17.35 ते कुमारं परम्परया उपतिष्ठेरन्

07.17.36 तेषां अनियतकालप्रवेशस्थाननिर्गमनानि स्थापयेत्

07.17.37 ततः तद्व्यञ्जनो वा रात्रौ प्रतिष्ठेत

07.17.38 तेन रूपाजीवा भार्याव्यञ्जनाश्च व्याख्याताः

07.17.39 तेषां वा तूर्यभाण्डफेलां गृहीत्वा निर्गच्छेत्

07.17.40 सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधक उदकपरिचारकैर्वा द्रव्यवस्त्रभाण्डफेलाशयनासनसम्भोगैर्निर्ह्रियेत

07.17.41 परिचारकच्छद्मना वा किञ्चिद् अरूपवेलायां आदाय निर्गच्छेत्, सुरुङ्गामुखेन वा निशा उपहारेण

07.17.42 तोयाशये वा वारुणं योगं आतिष्ठेत्

07.17.43 वैदेहकव्यञ्जना वा पक्वान्नफलव्यवहारेणारक्षिषु रसं उपचारयेयुः

07.17.44 दैवत उपहारश्राद्धप्रहवणनिमित्तं आरक्षिषु मदनयोगयुक्तं अन्नपानं रसं वा प्रयुज्यापगच्छेत्, आरक्षकप्रोत्साहनेन वा

07.17.45 नागरककुशीलवचिकित्सकापूपिकव्यञ्जना वा रात्रौ समृद्धगृहाण्यादीपयेयुः आरक्षिणां वा

07.17.46 वैदेहकव्यञ्जना वा पण्यसंस्थां आदीपयेयुः

07.17.47 अन्यद् वा शरीरं निक्षिप्य स्वगृहं आदीपयेद् अनुपातभयात्

07.17.48 ततः सन्धिच्छेदखातसुरुङ्गाभिरपगच्छेत्

07.17.49 काचकुम्भभाण्डभारव्यञ्जनो वा रात्रौ प्रतिष्ठेत

07.17.50 मुण्डजटिलानां प्रवासनान्यनुप्रविष्टो वा रात्रौ तद्व्यञ्जनः प्रतिष्ठेत, विरूपव्याधिकरणारण्यचरच्छद्मनां अन्यतमेन वा

07.17.51 प्रेतव्यञ्जनो वा गूढैर्निर्ह्रियेत

07.17.52 प्रेतं वा स्त्रीवेषेणानुगच्छेत्

07.17.53 वनचरव्यञ्जनाश्च एनं अन्यतो यान्तं अन्यतोऽपदिशेयुः

07.17.54 ततोऽन्यतो गच्छेत्

07.17.55 चक्रचराणां वा शकटवाटैरपगच्छेत्

07.17.56 आसन्ने चानुपाते सत्त्रं वा गृह्णीयात्

07.17.57 सत्त्राभावे हिरण्यं रसविद्धं वा भक्ष्यजातं उभयतःपन्थानं उत्सृजेत्

07.17.58 ततोऽन्यतोऽपगच्छेत्

07.17.59 गृहीतो वा सामादिभिरनुपातं अतिसन्दध्यात्, रसविद्धेन वा पथ्य्sदनेन

07.17.60 वारुणयोगाग्निदाहेषु वा शरीरं अन्यद् आधाय शत्रुं अभियुञ्जीत पुत्रो मे त्वया हतः इति

07.17.61a उपात्तच्छन्नशस्त्रो वा रात्रौ विक्रम्य रक्षिषु

07.17.61b शीघ्रपातैरपसरेद् गूढप्रणिहितैः सह (इति)

Chapt | मध्यमचरितं - उदासीनचरितं - मण्डलचरितम्

07.18.01 मध्यमस्यात्मा तृतीया पञ्चमी च प्रकृती प्रकृतयः

07.18.02 द्वितीया चतुर्थी षष्ठी च विकृतयः

07.18.03 तच्चेद् उभयं मध्यमोऽनुगृह्णीयात्, विजिगीषुर्मध्यमानुलोमः स्यात्

07.18.04 न चेद् अनुगृह्णीयात्, प्रकृत्य्sनुलोमः स्यात्

07.18.05 मद्यमश्चेद् विजिगीषोर्मित्रं मित्रभावि लिप्सेत, मित्रस्यात्मनश्च मित्राण्युत्थाप्य मध्यमाच्च मित्राणि भेदयित्वा मित्रं त्रायेत

07.18.06 मण्डलं वा प्रोत्साहयेत् अतिप्रवृद्धोऽयं मध्यमः सर्वेषां नो विनाशायाभ्युत्थितः, सम्भूयास्य यात्रां विहनाम इति

07.18.07 तच्चेन् मण्डलं अनुगृह्णीयात्, मध्यमावग्रहेणात्मानं उपबृंहयेत्

07.18.08 न चेद् अनुगृह्णीयात्, कोशदण्डाभ्यां मित्रं अनुगृह्य ये मध्यमद्वेषिणो राजानः परस्परानुगृहीता वा बहवः तिष्ठेयुः, एकसिद्धौ वा बहवः सिध्येयुः, परस्पराद् वा शङ्किता न उत्तिष्ठेरन्, तेषां प्रधानं एकं आसन्नं वा सामदानाभ्यां लभेत

07.18.09 द्विगुणो द्वितीयं त्रिगुनः तृतीयम्

07.18.10 एवं अभ्युच्चितो मध्यमं अवगृह्णीयात्

07.18.11 देशकालातिपत्तौ वा सन्धाय मध्यमेन मित्रस्य साचिव्यं कुर्यात्, दूष्येषु वा कर्मसन्धिम्

07.18.12 कर्शनीयं वाऽस्य मित्रं मध्यमो लिप्सेत, प्रतिस्तम्भयेद् एनं अहं त्वा त्रायेय इति आ कर्शनात्

07.18.13 कर्शितं एनं त्रायेत

07.18.14 उच्छेदनीयं वाऽस्य मित्रं मध्यमो लिप्सेत, कर्शितं एनं त्रायेत मध्यमवृद्धिभयात्

07.18.15 उच्छिन्नं वा भूम्य्ऽनुग्रहेण हस्ते कुर्याद् अन्यत्रापसारभयात्

07.18.16 कर्शनीय उच्छेदनीययोश्चेन् मित्राणि मध्यमस्य साचिव्यकराणि स्युः, पुरुषान्तरेण सन्धीयेत

07.18.17 विजिगीषोर्वा तयोर्मित्राण्यवग्रहसमर्थानि स्युः, सन्धिं उपेयात्

07.18.18 अमित्रं वाऽस्य मध्यमो लिप्सेत, सन्धिं उपेयात्

07.18.19 एवं स्वार्थश्च कृतो भवति मध्यमस्य प्रियं च

07.18.20 मध्यमश्चेत् स्वमित्रं मित्रभावि लिप्सेत, पुरुषान्तरेण सन्दध्यात्

07.18.21 सापेक्षं वा नार्हसि मित्रं उच्छेत्तुम् इति वारयेत्

07.18.22 उपेक्षेत वा मण्डलं अस्य कुप्यतु स्वपक्षवधात् इति

07.18.23 अमित्रं आत्मनो वा मध्यमो लिप्सेत, कोशदण्डाभ्यां एनं अदृश्यमानोऽनुगृह्णीयात्

07.18.24 उदासीनं वा मध्यमो लिप्सेत, अस्मै साहाय्यं दद्याद् उदासीनाद् भियताम् इति

07.18.25 मध्यम उदासीनयोर्यो मण्डलस्याभिप्रेतः तं आश्रयेत

07.18.26 मध्यमचरितेन उदासीनचरितं व्याख्यातम्

07.18.27 उदासीनश्चेन् मध्यमं लिप्सेत, यतः शत्रुं अतिसन्दध्यान् मित्रस्य उपकारं कुर्याद् उदासीनं वा दण्ड उपकारिणं लभेत ततः परिणमेत

07.18.28 एवं उपबृह्यात्मानं अरिप्रकृतिं कर्शयेन् मित्रप्रकृतिं च उपगृह्णीयात्

07.18.29a सत्यप्यमित्रभावे तस्यानात्मवान्नित्यापकारी शत्रुः शत्रुसंहितः पार्ष्णिग्राहो वा व्यसनी यातव्यो व्यसने वा नेतुरभियोक्ता इत्यरिभाविनः,

एकार्थाभिप्रयातः पृथग्ऽर्थाभिप्रयातः सम्भूययात्रिकः संहितप्रयाणिकः स्वार्थाभिप्रयातः सामुत्थायिकः कोशदण्डयोरन्यतरस्य क्रेता विक्रेता वा द्वैधीभाविक इति मित्रभाविनः, –

07.18.29b सामन्तो बलवतः प्रतिघातोऽन्तर्धिः प्रतिवेशो वा बलवतः पार्ष्ण्यिग्राहो वा स्वयं उपनतः प्रताप उपनतो वा दण्ड उपनत इति भृत्यभाविनः सामन्ताः

07.18.30 तैर्भूम्य्.एकान्तरा व्याख्याताः

07.18.31ab तेषां शत्रुविरोधे यन् मित्रं एकार्थतां व्रजेत् ।
07.18.31chd शक्त्या तद्ऽनुगृह्णीयाद् विषहेत यया परम्
07.18.32ab प्रसाध्य शत्रुं यन् मित्रं वृद्धं गच्छेद् अवश्यताम् ।
07.18.32chd सामन्त एकान्तराभ्यां तत्प्रकृतिभ्यां विरोधयेत्
07.18.33ab तत्कुलीनापरुद्धाभ्यां भूमिं वा तस्य हारयेत् ।
07.18.33chd यथा वाऽनुग्रहापेक्षं वश्यं तिष्ठेत् तथा चरेत्
07.18.34ab न उपकुर्याद् अमित्रं वा गच्छेद् यद् अतिकर्शितम् ।
07.18.34chd तद् अहीनं अवृद्धं च स्थापयेन् मित्रं अर्थवित्
07.18.35ab अर्थयुक्त्या चलं मित्रं सन्धिं यद् उपगच्छति ।
07.18.35chd तस्यापगमने हेतुं विहन्यान्न चलेद् यथा
07.18.36ab अरिसाधारणं यद् वा तिष्ठेत् तद् अरितः शठम् ।
07.18.36chd भेदयेद् भिन्नं उच्छिन्द्यात् ततः शत्रुं अनन्तरम्
07.18.37ab उदासीनं च यत् तिष्ठेत् सामन्तैः तद् विरोधयेत् ।
07.18.37chd ततो विग्रहसन्तप्तं उपकारे निवेशयेत्
07.18.38ab अमित्रं विजिगीषुं च यत् सञ्चरति दुर्बलम् ।
07.18.38chd तद् बलेनानुगृह्णीयाद् यथा स्यान्न परान्मुखम्
07.18.39ab अपनीय ततोऽन्यस्यां भूमौ वा सम्निवेशयेत् ।
07.18.39chd निवेश्य पूर्वं तत्रान्यद् दण्डानुग्रहहेतुना
07.18.40ab अपकुर्यात् समर्थं वा न उपकुर्याद् यद् आपदि ।
07.18.40chd उच्छिन्द्याद् एव तन्मित्रं विश्वस्याङ्कं उपस्थितम्
07.18.41ab मित्रव्यसनतो वाऽरिरुत्तिष्ठेद् योऽनवग्रहः ।
07.18.41chd मित्रेण एव भवेत् साध्यश्छादितव्यसनेन सः
07.18.41ab अमित्रव्यसनान् मित्रं उत्थितं यद् विरज्यति ।

07.18.41chd अरिव्यसनसिद्ध्या तत्शत्रुणा एव प्रसिध्यति
07.18.42ab वृद्धिं क्षयं च स्थानं च कर्शन उच्छेदनं तथा
07.18.42chd सर्व उपायान् समादध्याद् एतान् यश्चार्थशास्त्रवित् ।
07.18.43ab एवं अन्योन्यसञ्चारं षाड्गुण्यं योऽनुपश्यति
07.18.43chd स बुद्धिनिगलैर्बद्धैरिष्टं क्रीडति पार्थिवैः (इति)

Book |
Chapt | प्रकृतिव्यसनवर्गः

08.1.01 व्यसनयौगपद्ये सौकर्यतो यातव्यं रक्षितव्यं वा इति व्यसनचिन्ता
08.1.02 दैवं मानुषं वा प्रकृतिव्यसनं अनयापनयाभ्यां सम्भवति
08.1.03 गुणप्रातिलोम्यं अभावः प्रदोषः प्रसङ्गः पीडा वा व्यसनम्
08.1.04 व्यस्यत्येनं श्रेयस इति व्यसनम्
08.1.05 स्वाम्य्ऽमात्यजनपददुर्गकोशदण्डमित्रव्यसनानां पूर्वं पूर्वं गरीयः इत्याचार्याः
08.1.06 न इति भरद्वाजः
08.1.07 स्वाम्य्ऽमात्यव्यसनयोरमात्यव्यसनं गरीयः
08.1.08 मन्त्रो मन्त्रफलावाप्तिः कर्मानुष्ठानं आयव्ययकर्म दण्डप्रणयनं अमित्राटवीप्रतिषेधो राज्यरक्षणं व्यसनप्रतीकारः कुमाररक्षणं अभिषेकश्च कुमाराणां आयत्तं अमात्येषु
08.1.09 तेषां अभावे तद्ऽभावः, छिन्नपक्षस्य इव राज्ञश्चेष्टानाशश्च
08.1.10 व्यसनेषु चासन्नः पर उपजापः
08.1.11 वैगुण्ये च प्राणाबाधः प्राणान्तिकचरत्वाद् राज्ञः इति
08.1.12 न इति कौटिल्यः
08.1.13 मन्त्रिपुरोहितादिभृत्यवर्गं अध्यक्षप्रचारं पुरुषद्रव्यप्रकृतिव्यसनप्रतीकारं एधनं च राजा एव करोति
08.1.14 व्यसनिषु वाऽमात्येष्वन्यान् अव्यसनिनः करोति
08.1.15 पूज्यपूजने दूष्यावग्रहे च नित्ययुक्तः तिष्ठति
08.1.16 स्वामी च सम्पन्नः स्वसम्पद्भिः प्रकृतीः सम्पादयति

08.1.17 स यत्शीलः तत्शीलाः प्रकृतयो भवन्ति, ऽत्थाने प्रमादे च तद्ऽअयत्तत्वात्

08.1.18 तत्कूटस्थानीयो हि स्वामी इति

08.1.19 अमात्यजनपदव्यसनयोर्जनपदव्यसनं गरीयः इति विशालाक्षः

08.1.20 कोशो दण्डः कुप्यं विष्टिर्वाहनं निचयाश्च जनपदाद् ऽत्तिष्ठन्ते

08.1.21 तेषां अभावो जनपदाभावे, स्वाम्य्ऽमात्ययोश्चानन्तरः इति

08.1.22 न इति कौटिल्यः

08.1.23 अमात्यमूलाः सर्वारम्भाः - जनपदस्य कर्मसिद्धयः स्वतः परतश्च योगक्षेमसाधनं व्यसनप्रतीकारः शून्यनिवेश ऽपचयौ दण्डकरानुग्रहश्च इति

08.1.24 जनपददुर्गव्यसनयोर्दुर्गव्यसनम् इति पाराशराः

08.1.25 दुर्गे हि कोशदण्ड ऽत्पत्तिरापदि स्थानं च जनपदस्य

08.1.26 शक्तिमत्तराश्च पौरा जानपदेभ्यो नित्याश्चापदि सहाया राज्ञः

08.1.27 जानपदाः त्वमित्रसाधारणाः इति

08.1.28 न इति कौटिल्यः

08.1.29 जनपदमूला दुर्गकोशदण्डसेतुवार्त्ताऽऽरम्भाः

08.1.30 शौर्यं स्थैर्यं दाक्ष्यं बाहुल्यं च जानपदेषु

08.1.31 पर्वतान्तर्द्वीपाश्च दुर्गा नाध्युष्यन्ते जनपदाभावात्

08.1.32 कर्षकप्राये तु दुर्गव्यसनं, आयुधीयप्राये तु जनपदे जनपदव्यसनं इति

08.1.33 दुर्गकोशव्यसनयोः कोशव्यसनम् इति पिशुनः

08.1.34 कोशमूलो हि दुर्गसंस्कारो दुर्गरक्षणं जनपदमित्रामित्रनिग्रहो देशान्तरितानां ऽत्साहनं दण्डबलव्यवहारश्च

08.1.35 दुर्गः कोशाद् ऽपजाप्यः परेषाम्

08.1.36 कोशं आदाय च व्यसने शक्यं अपयातुं, न दुर्गम् इति

08.1.37 न इति कौटिल्यः

08.1.38 दुर्गार्पणः कोशो दण्डः तूष्णींयुद्धं स्वपक्षनिग्रहो दण्डबलव्यवहार आसारप्रतिग्रहः परचक्राटवीप्रतिषेधश्च

08.1.39 दुर्गाभावे च कोशः परेषाम्

08.1.40 दृश्यते हि दुर्गवतां अनुच्छित्तिरिति

08.1.41 कोशदण्डव्यसनयोर्दण्डव्यसनम् इति कौणपदन्तः

08.1.42 दण्डमूलो हि मित्रामित्रनिग्रहः परदण्ड उत्साहनं स्वदण्डप्रतिग्रहश्च

08.1.43 दण्डाभावे च ध्रुवः कोशविनाशः

08.1.44 कोशाभावे च शक्यः कुप्येन भूम्या परभूमिस्वयङ्ग्राहेण वा दण्डः पिण्डयितुं, दण्डवता च कोशः

08.1.45 स्वामिनश्चासन्नवृत्तित्वाद् अमात्यसधर्मा दण्डः इति

08.1.46 न इति कौटिल्यः

08.1.47 कोशमूलो हि दण्डः

08.1.48 कोशाभावे दण्डः परं गच्छति, स्वामिनं वा हन्ति

08.1.49 सर्वाभियोगकरश्च कोशो धर्मकामहेतुः

08.1.50 देशकालकार्यवशेन तु कोशदण्डयोरन्यतरः प्रमाणीभवति

08.1.51 लम्भपालनो हि दण्डः कोशस्य, कोशः कोशस्य दण्डस्य च भवति

08.1.52 सर्वद्रव्यप्रयोजकत्वात् कोशव्यसनं गरीय इति

08.1.53 दण्डमित्रव्यसनयोर्मित्रव्यसनम् इति वातव्याधिः

08.1.54 मित्रं अभृतं व्यवहितं च कर्म करोति, पार्ष्णिग्राहं आसारं अमित्रं आटविकं च प्रतिकरोति, कोशदण्डभूमिभिश्च उपकरोति व्यसनावस्थायोगम् इति

08.1.55 न इति कौटिल्यः

08.1.56 दण्डवतो मित्रं मित्रभावे तिष्ठति, अमित्रो वा मित्रभावे

08.1.57 दण्डमित्रयोः तु साधारणे कार्ये सारतः स्वयुद्धदेशकाललाभाद् विशेषः

08.1.58 शीघ्राभियाने त्वमित्राटविकानभ्यन्तरकोपे च न मित्रं विद्यते

08.1.59 व्यसनयौगपद्ये परवृद्धौ च मित्रं अर्थयुक्तौ तिष्ठति

08.1.60 इति प्रकृतिव्यसनसम्प्रधारणं उक्तम्

08.1.61ab प्रकृत्य्ऽवयवानां तु व्यसनस्य विशेषतः ।

08.1.61chd बहुभावोऽनुरागो वा सारो वा कार्यसाधकः

08.1.62ab द्वयोः तु व्यसने तुल्ये विशेषो गुणतः क्षयात् ।

08.1.62chd शेषप्रकृतिसाद्गुण्यं यदि स्यान्नाविधेयकम्

08.1.63ab शेषप्रकृतिनाशः तु यत्र एकव्यसनाद् भवेत् ।

08.1.63chd व्यसनं तद् गरीयः स्यात् प्रधानस्य इतरस्य वा (इति)

Chapt | राजराज्ययोर्व्यसनचिन्ता

08.2.01 राजा राज्यं इति प्रकृतिसङ्क्षेपः

08.2.02 राज्ञोऽभ्यन्तरो बाह्यो वा कोप इति

08.2.03 अहिभयाद् अभ्यन्तरः कोपो बाह्यकोपात् पापीयान्, अन्तर्ऽमात्यकोपश्चान्तःकोपात्

08.2.04 तस्मात् कोशदण्डशक्तिं आत्मसंस्थां कुर्वीत

08.2.05 द्वैराज्यवैराज्ययोर्द्वैराज्यं अन्योन्यपक्षद्वेषानुरागाभ्यां परस्परसङ्घर्षेण वा विनश्यति, वैराज्यं तु प्रकृतिचित्तग्रहणापेक्षि यथास्थितं अन्यैर्भुज्यते इत्याचार्याः

08.2.06 न इति कौटिल्यः

08.2.07 पितापुत्रयोर्भ्रात्रोर्वा द्वैराज्यं तुल्ययोगक्षेमं अमात्यावग्रहं वर्तयति

08.2.08 वैराज्यं तु जीवतः परस्याच्छिद्य न एतन् मम इति मन्यमानः कर्शयति, अपवाहयति, पण्यं वा करोति, विरक्तं वा परित्यज्यापगच्छति इति

08.2.09 अन्धश्चलितशास्त्रो वा राजा इति अशास्त्रचक्षुरन्धो यत्किञ्चनकारी दृढाभिनिवेशी परप्रणेयो वा राज्यं अन्यायेन उपहन्ति, चलितशास्त्रः तु यत्र शास्त्राच्चलितमतिर्भवति शक्यानुनयो भवति इत्याचार्याः

08.2.10 न इति कौटिल्यः

08.2.11 अन्धो राजा शक्यते सहायसम्पदा यत्र तत्र वा पर्यवस्थापयितुम्

08.2.12 चलितशास्त्रः तु शास्त्राद् अन्यथाऽभिनिविष्टबुद्धिरन्यायेन राज्यं आत्मानं च उपहन्ति इति

08.2.13 व्याधितो नवो वा राजा इति व्याधितो राजा राज्य उपघातं अमात्यमूलं प्राणाबाधं वा राज्यमूलं अवाप्नोति, नवः तु राजा स्वधर्मानुग्रहपरिहारदानमानकर्मभिः प्रकृतिरञ्जन उपकारैश्चरति इत्याचार्याः

08.2.14 न इति कौटिल्यः

08.2.15 व्याधितो राजा यथाप्रवृत्तं राजप्रणिधिं अनुवर्तयति

08.2.16 नवः तु राजा बलावर्जितं मम इदं राज्यम् इति यथा इष्टं अनवग्रहश्चरति

08.2.17 सामुत्थायिकैरवगृहीतो वा राज्य उपघातं मर्षयति

08.2.18 प्रकृतिष्वरूढः सुखं उच्छेत्तुं भवति इति

08.2.19 व्याधिते विशेषः पापरोग्यपापरोगी च

08.2.20 नवेऽप्यभिजातोऽनभिजात इति

08.2.21 दुर्बलोऽभिजातो बलवान् अनभिजातो राजा इति दुर्बलस्याभिजातस्य उपजापं दौर्बल्यापेक्षाः प्रकृतयः कृच्छ्रेण उपगच्छन्ति, बलवतश्चानभिजातस्य बलापेक्षाः सुखेन इत्याचार्याः

08.2.22 न इति कौटिल्यः

08.2.23 दुर्बलं अभिजातं प्रकृतयः स्वयं उपनमन्ति, जात्यं ऐश्वर्यप्रकृतिरनुवर्तत इति

08.2.24 बलवतश्चानभिजातस्य उपजापं विसंवादयन्ति, अनुरागे सार्वगुण्यं इति

08.2.25 प्रयासवधात् सस्यवधो मुष्टिवधात् पापीयान्, निराजीवत्वाद् अवृष्टिरतिवृष्टितः

08.2.26ab द्वयोर्द्वयोर्व्यसनयोः प्रकृतीनां बलाबलम् ।

08.2.26chd पारम्पर्यक्रमेण उक्तं याने स्थाने च कारणम् (इति)

Chapt । पुरुषव्यसनवर्गः

08.3.01 अविद्याविनयः पुरुषव्यसनहेतुः

08.3.02 अविनीतो हि व्यसनदोषान्न पश्यति

08.3.03 तान् उपदेक्ष्यामः

08.3.04 कोपजः त्रिवर्गः, कामजश्चतुर्वर्गः

08.3.05 तयोः कोपो गरीयान्

08.3.06 सर्वत्र हि कोपश्चरति

08.3.07 प्रायशश्च कोपवशा राजानः प्रकृतिकोपैर्हताः श्रूयन्ते, कामवशाः क्षयनिमित्तं अरिव्याधिभिरिति

08.3.08 न इति भारद्वाजः

08.3.09 सत्पुरुषाचारः कोपो वैरयातनं अवज्ञावधो भीतमनुष्यता च

08.3.10 नित्यश्च कोपेन सम्बन्धः पापप्रतिषेधार्थः

08.3.11 कामः सिद्धिलाभः सान्त्वं त्यागशीलता सम्प्रियभावश्च

08.3.12 नित्यश्च कामेन सम्बन्धः कृतकर्मणः फल उपभोगार्थः इति

08.3.13 न इति कौटिल्यः

08.3.14 द्वेष्यता शत्रुवेदनं दुःखासङ्गश्च कोपः

08.3.15 परिभवो द्रव्यनाशः पाटच्चरद्यूतकारलुब्धकगायनवादकैश्चानर्थ्यैः सम्योगः कामः

08.3.16 तयोः परिभवाद् द्वेष्यता गरीयसी

08.3.17 परिभूतः स्वैः परैश्चावगृह्यते, द्वेष्यः समुच्छिद्यत इति

08.3.18 द्रव्यनाशात्शत्रुवेदनं गरीयः

08.3.19 द्रव्यनाशः कोशाबाधकः, शत्रुवेदनं प्राणाबाधकं इति

08.3.20 अनर्थ्यसम्योगाद् दुःखसम्योगो गरीयान्

08.3.21 अनर्थ्यसम्योगो मुहूर्तप्रतीकारो, दीर्घक्लेशकरो दुःखानां आसङ्ग इति

08.3.22 तस्मात् कोपो गरीयान्

08.3.23 वाक्पारुष्यं अर्थदूषणं दण्डपारुष्यं इति

08.3.24 वाक्पारुष्यार्थदूषणयोर्वाक्पारुष्यं गरीयः इति विशालाक्षः

08.3.25 परुषमुक्तो हि तेजस्वी तेजसा प्रत्यारोहति

08.3.26 दुरुक्तशल्यं हृदि निखातं तेजःसन्दीपनं इन्द्रिय उपतापि च इति

08.3.27 न इति कौटिल्यः

08.3.28 अर्थपूजा वाक्षल्यं अपहन्ति, वृत्तिविलोपः त्वर्थदूषणम्

08.3.29 अदानं आदानं विनाशः परित्यागो वाऽर्थस्य इत्यर्थदूषणम्

08.3.30 अर्थदूषणदण्डपारुष्ययोरर्थदूषणं गरीयः इति पाराशराः

08.3.31 अर्थमूलौ धर्मकामौ

08.3.32 अर्थप्रतिबद्धश्च लोको वर्तते

08.3.33 तस्य उपघातो गरीयान् इति

08.3.34 न इति कौटिल्यः

08.3.35 सुमहताऽप्यर्थेन न कश्चन शरीरविनाशं इच्छेत्

08.3.36 दण्डपारुष्याच्च तं एव दोषं अन्येभ्यः प्राप्नोति

08.3.37 इति कोपजः त्रिवर्गः

08.3.38 कामजः तु मृगया द्यूतं स्त्रियः पानं इति चतुर्वर्गः

08.3.39 तस्य मृगयाद्यूतयोर्मृगया गरीयसी इति पिशुनः

08.3.40 स्तेनामित्रव्यालदावप्रस्खलनभयदिन्मोहाः क्षुत्पिपासे च प्राणाबाधः तस्याम्

08.3.41 द्यूते तु जितं एवाक्षविदुषा यथा जयत्सेनदुर्योधनाभ्याम् इति

08.3.42 न इत्यकौटिल्यः

08.3.43 तयोरप्यन्यतरपराजयोऽस्ति इति नलयुधिष्ठिराभ्यां व्याख्यातम्

08.3.44 तद् एव विजितद्रव्यं आमिषं वैरानुबन्धश्च

08.3.45 सतोऽर्थस्य विप्रतिपत्तिरसतश्चार्जनं अप्रतिभुक्तनाशो मूत्रपुरीषधारणबुभुक्षाऽऽदिभिश्च व्याधिलाभ इति द्यूतदोषाः

08.3.46 मृगयायां तु व्यायामः श्लेष्मपित्तमेदःस्वेदनाशश्चले स्थिते च काये लक्षपरिचयः कोपभयस्थानेषु च मृगाणां चित्तज्ञानं अनित्ययानं च इति

08.3.47 द्यूतस्त्रीव्यसनयोः कैतवव्यसनम् इति कौणपदन्तः

08.3.48 सातत्येन हि निशि प्रदीपे मातरि च मृतायां दीव्यत्येव कितवः

08.3.49 कृच्छ्रे च प्रतिपृष्टः कुप्यति

08.3.50 स्त्रीव्यसने तु स्नानप्रतिकर्मभोजनभूमिषु भवत्येव धर्मार्थपरिप्रश्नः

08.3.51 शक्या च स्त्री राजहितेनियोक्तुं, उपांशुदण्डेन व्याधिना वा व्यावर्तयितुं अवस्रावयितुं वा इति

08.3.52 न इति कौटिल्यः

08.3.53 सप्रत्यादेयं द्यूतं निष्प्रत्यादेयं स्त्रीव्यसनम्

08.3.54 अदर्शनं कार्यनिर्वेदः कालातिपातनाद् अनर्थो धर्मलोपश्च तन्त्रदौर्बल्यं पानानुबन्धश्च इति

08.3.55 स्त्रीपानव्यसनयोः स्त्रीव्यसनम् इति वातव्याधिः

08.3.56 स्त्रीषु हि बालिश्यं अनेकविधं निशान्तप्रणिधौ व्याख्यातम्

08.3.57 पाने तु शब्दादीनां इन्द्रियार्थानां उपभोगः प्रीतिदानं परिजनपूजनं कर्मश्रमवधश्च इति

08.3.58 न इति कौटिल्यः

08.3.59 स्त्रीव्यसने भवत्यपत्य उत्पत्तिरात्मरक्षणं चान्तर्दारेषु, विपर्ययो वा बाह्येषु, अगम्येषु सर्व उच्छित्तिः

08.3.60 तद् उभयं पानव्यसने

08.3.61 पानसम्पत् - संज्ञानाशोऽनुन्मत्तस्य उन्मत्तत्वं अप्रेतस्य प्रेतत्वं कौपीनदर्शनं श्रुतप्रज्ञाप्राणवित्तमित्रहानिः सद्भिर्वियोगोऽनर्थ्यसम्योगः तन्त्रीगीतनैपुण्येषु चार्थघ्नेषु प्रसङ्ग इति

08.3.62 द्यूतमद्ययोर्द्यूतम्

08.3.63 एकेषां पणनिमित्तो जयः पराजयो वा प्राणिषु निश्चेतनेषु वा पक्षद्वैधेन प्रकृतिकोपं करोति

08.3.64 विशेषतश्च सङ्घानां सङ्घधर्मिणां च राजकुलानां द्यूतनिमित्तो भेदः तन्निमित्तो विनाश इत्यसत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्याद् इति

08.3.65ab असतां प्रग्रहः कामः कोपश्चावग्रहः सताम् ।

08.3.65chd व्यसनं दोषबाहुल्याद् अत्यन्तं उभयं मतम्

08.3.66ab तस्मात् कोपं च कामं च व्यसनारम्भं आत्मवान् ।

08.3.66chd परित्यजेन् मूलहरं वृद्धसेवी जित इन्द्रियः (इति)

Chapt । पीडनवर्गः - स्तम्भवर्गः - कोशसंगवर्गः

08.4.01 दैवपीडनं - अग्निरुदकं व्याधिर्दुर्भिक्षं मरक इति

08.4.02 अग्न्य्.उदकयोरग्निपीडनं अप्रतिकार्यं सर्वदाहि च, शक्यापगमनं तार्याबाधं उदकपीडनम् इत्याचार्याः

08.4.03 न इत् कौटिल्यः

08.4.04 अग्निर्ग्रामं अर्धग्रामं वा दहति, उदकवेगः तु ग्रामशतप्रवाही इति

08.4.05 व्याधिदुर्भिक्षयोर्व्याधिः प्रेतव्याधित उपसृष्टपरिचारकव्यायाम उपरोधेन कर्माण्युपहन्ति, दुर्भिक्षं पुनरकर्म उपघाति हिरण्यपशुकरदायि च इत्याचार्याः

08.4.06 न इति कौटिल्यः

08.4.07 एकदेशपीडनो व्याधिः शक्यप्रतीकारश्च, सर्वदेशपीडनं दुर्भिक्षं प्राणिनां अजीवनाय इति

08.4.08 तेन मरको व्याख्यातः

08.4.09 क्षुद्रकमुख्यक्षययोः क्षुद्रकक्षयः कर्मणां अयोगक्षेमं करोति, मुख्यक्षयः कर्मानुष्ठान उपरोधधर्मा इत्याचार्याः

08.4.10 न इति कौटिल्यः

08.4.11 शक्यः क्षुद्रकक्षयः प्रतिसन्धातुं बाहुल्यात् क्षुद्रकाणां, न मुख्यक्षयः

08.4.12 सहस्रेषु हि मुख्यो भवत्येको न वा सत्त्वप्रज्ञाऽऽधिक्यात् तद्ऽअश्रयत्वात् क्षुद्रकाणां इति

08.4.13 स्वचक्रपरचक्रयोः स्वचक्रं अतिमात्राभ्यां दण्डकराभ्यां पीडयत्यशक्यं च वारयितुं, परचक्रं तु शक्यं प्रैयोद्धुं उपसारेण सन्धिना वा मोक्षयितुम् इत्याचार्याः

08.4.14 न इति कौटिल्यः

08.4.15 स्वचक्रपीडनं प्रकृतिपुरुषमुख्य उपग्रहविघाताभ्यां शक्यते वारयितुं एकदेशं वा पीडयति, सर्वदेशपीडनं तु परचक्रं विलोपघातदाहविध्वंसनापवाहनैः पीडयति इति

08.4.16 प्रकृतिराजविवादयोः प्रकृइतिविवादः प्रकृतीनां भेदकः पराभियोगान् आवहति, राजविवादः तु प्रकृतीनां द्विगुणभक्तवेतनपरिहारकरो भवति इत्याचार्याः

08.4.17 न इति कौटिल्यः

08.4.18 शक्यः प्रकृतिविवादः प्रकृतिमुख्य उपग्रहेण कलहस्थानापनयनेन वा वारयितुम्

08.4.19 विवदमानाः तु प्रकृतयः परस्परसङ्घर्षेण उपकुर्वन्ति

08.4.20 राजविवादः तु पीडन उच्छेदनाय प्रकृतीनां द्विगुणव्यायामसाध्य इति

08.4.21 देशराजविहारयोर्देशविहारः त्रैकाल्येन कर्मफल उपघातं करोति, राजविहारः तु कारुशिल्पिकुशीलववाग्जीवनरूपाजीवावैदेहक उपकारं करोति इत्याचार्याः

08.4.22 न इति कौटिल्यः

08.4.23 देशविहारः कर्मश्रमं अवधाऽर्थं अल्पं भक्षयति भक्षयित्वा च भूयः कर्मसु योगं गच्छति, राजविहारः तु स्वयं वल्लभैश्च स्वयङ्ग्राहप्रणयपण्यागारकार्य उपग्रहैः पीडयति इति

08.4.24 सुभगाकुमारयोः कुमारः स्वयं वल्लभैश्च स्वयङ्ग्राहप्रणयपण्यागारकार्य उपग्रहैः पीडयति, सुभगा विलास उपभोगेन इत्याचार्याः

08.4.25 न इति कौटिल्यः

08.4.26 शक्यः कुमारो मन्त्रिपुरोहिताभ्यां वारयितुं, न सुभगा बालिश्याद् अनर्थ्यजनसम्योगाच्च इति

08.4.27 श्रेणीमुख्ययोः श्रेणी बाहुल्याद् अनवग्रहा स्तेयसाहसाभ्यां पीडयति, मुख्यः कार्यानुग्रहविघाताभ्याम् इत्याचार्याः

08.4.28 न इति कौटिल्यः

08.4.29 सुव्यावर्त्या श्रेणी समानशीलव्यसनत्वात्, श्रेणीमुख्य एकदेश उपग्रहेण वा

08.4.30 स्तम्भयुक्तो मुख्यः परप्राणद्रव्य उपघाताभ्यां पीडयति इति

08.4.31 सम्निधातृसमाहर्त्रोः सम्निधाता कृतविदूषणात्ययाभ्यां पीडयति, समाहर्ता करणाधिष्ठितः प्रदिष्टफल उपभोगी भवति इत्याचार्याः

08.4.32 न इति कौटिल्यः

08.4.33 सम्निधाता कृतावस्थं अन्यैः कोशप्रवेश्यं प्रतिगृह्णाति, समाहर्ता तु पूर्वं अर्थं आत्मनः कृत्वा पश्चाद् राजार्थं करोति प्रणाशयति वा, परस्वादाने च स्वप्रत्ययश्चरति इति

08.4.34 अन्तपालवैदेहकयोरन्तपालश्चोरप्रसर्गदेयात्यादानाभ्यां वणिक्पथं पीडयति, वैदेहकाः तु पण्य.प्रतिपण्यानुग्रहैः प्रसाधयन्ति इत्याचार्याः

08.4.35 न इति कौटिल्यः

08.4.36 अन्तपालः पण्यसम्पातानुग्रहेण वर्तयति, वैदेहकाः तु सम्भूय पण्यानां उत्कर्षापकर्षं कुर्वाणाः पणे पणशतं कुम्भे कुम्भशतं इत्याजीवन्ति

08.4.37 अभिजात उपरुद्धा भूमिः पशुव्रज उपरुद्धा वा इति अभिजात उपरुद्धा भूमिः महाफलाऽप्यायुधीय उपकारिणी न क्षमा मोक्षयितुं व्यसनाबाधभयात्, पशुव्रज उपरुद्धा तु कृषियोग्या क्षमा मोक्षयितुम्

08.4.38 विवीतं हि क्षेत्रेण बाध्यते इत्याचार्याः

08.4.39 न इति कौटिल्यः

08.4.40 अभिजात उपरुद्धा भूमिरत्यन्तमहा उपकाराऽपि क्षमा मोक्षयितुं व्यसनाबाधभयात्, पशुव्रज उपरुद्धा तु कोशवाहन उपकारिणी न क्षमा मोक्षयितुं, अन्यत्र सस्यवाप उपरोधाद् इति

08.4.41 प्रतिरोधकाटविकयोः प्रतिरोधका रात्रिसत्त्रचराः शरीराक्रमिणो नित्याः शतसहस्राहपारिणः प्रधानकोपकाश्च व्यवहिताः प्रत्यन्तरारण्यचराश्चाटविकाः प्रकाशा दृस्याश्चरन्ति, एकदेशघातकाश्च इत्याचार्याः

08.4.42 न इति कौटिल्यः

08.4.43 प्रतिरोधकाः प्रमत्तस्यापरहन्ति, अल्पाः कुण्ठाः सुखा ज्ञातुं ग्रहीतुं च, स्वदेशस्थाः प्रभूता विक्रान्ताश्चाटविकाः प्रकाशयोदिनोऽपहर्तारो हन्तारश्च देशानां राजसधर्माण इति

08.4.44 मृगहस्तिवनयोः मृगाः प्रभूताः प्रभूतमांसचर्म उपकारिणो मन्दग्रासावक्लेशिनः सुनियम्याश्च

08.4.45 विपरीता हस्तिनो गृह्यमाणा दुष्टाश्च देशविनाशाय इति

08.4.46 स्वपरस्थानीय उपकारयोः स्वस्थानीय उपकारो धान्यपशुहिरण्यकुप्य उपकारो जानपदानां आपद्यात्मधारणः

08.4.47 विपरीतः परस्थानीय उपकारः

08.4.48 इति पीडनानि - आभ्यन्तरो मुख्यस्तम्भो बाह्योऽमित्राटवीस्तम्भः इति स्तम्भवर्गह्

08.4.49 ताभ्यां पीडनैर्यथा उक्तैश्च पीडितः, सक्तो मुख्येषु, परिहार उपहतः, प्रकीर्णो, मिथ्यासंहृतः, सामन्ताटवीहृत इति कोशसङ्गवर्गः

08.4.50ab पीडनानां अनुत्पत्तावुत्पन्नानां च वारणे |

08.4.50chd यतेत देशवृद्ध्यर्थं नाशे च स्तम्भसङ्गयोः (इति)

Chapt | बलव्यसनवर्गः - मित्रव्यसनवर्गः

08.5.01 बलव्यसनानि - अमानितं, विमानितं, अभृतं, व्याधितं, नवागतं, दूरायातं, परिश्रान्तं, परिक्षीणं, प्रतिहतं, हताग्रवेगं, अनृतुप्राप्तं, अभूमिप्राप्तं, आशानिर्वेदि, परिसृप्तं, कलत्रगर्भि, अन्तःशल्यं, कुपितमूलं, भिन्नगर्भं, अपसृतं, अतिक्षिप्तं, उपनिविष्टं, समाप्तं, उपरुद्धं, परिक्षिप्तं, छिन्नधान्यपुरुषवीवधं, स्वविक्षिप्तं, मित्रविक्षिप्तं, दूष्ययुक्तं, दुष्टपार्ष्णिग्राहं, शून्यमूलं, अस्वामिसंहृतं, भिन्नकूटं, अन्धं इति

08.5.02 तेषां अमानितविमानितानियतयोरमानितं कृतार्थमानं युध्येत, न विमानितं अन्तःकोपम्

08.5.03 अभृतव्याधितयोरभृतं तदात्वकृतवेतनं युध्येत, न व्याधितं अकर्मण्यम्

08.5.04 नवागतदूरायातयोर्नवागतं अन्यत उपलब्धदेशं अनवमिश्रं युध्येत, न दूरायतं आयतगतपरिक्लेशम्

08.5.05 परिश्रान्तपरिक्षीणयोः परिश्रान्तं स्नानभोजनस्वप्नलब्धविश्रामं युध्येत, न परिक्षीणं अन्यत्राहवे क्षीणयुग्यपुरुषम्

08.5.06 प्रतिहतहताग्रवेगयोः प्रतिहतं अग्रपातभग्नं प्रवीरपुरुषसंहतं युध्येत, न हताग्रवेगं अग्रपातहतवीरम्

08.5.07 अनृत्व्ऽभूमिप्राप्तयोरनृतुप्राप्तं यथ.ऋतुयुग्यशस्त्रावरणं युध्येत, नाभूमिप्राप्तं अवरुद्धप्रसारव्यायामम्

08.5.08 आशानिर्वेदिपरिसृप्तयोराशानिर्वेदि लब्धाभिप्रायं युध्येत, न परिसृप्तं अपसृतमुख्यम्

08.5.09 कलत्रगर्भ्य्ऽन्तःशल्ययोः कलत्रगर्भि उन्मुच्य कलत्रं युध्येत, नान्तःशल्यं अन्तरमित्रम्

08.5.10 कुपितमूलभिन्नगर्भयोः कुपितमूलं प्रशमितकोपं सामादिभिर्युध्येत, न भिन्नगर्भं अन्योन्यस्माद् भिन्नम्

08.5.11 अपसृतातिक्षिप्तयोरपसृतं एकराज्यातिक्रान्तं मन्त्रव्यायामाभ्यां सत्त्रमित्रापाश्रयं युध्येत, नातिक्षिप्तं अनेकराज्यातिक्रान्तं बह्व्ऽअबाधत्वात्

08.5.12 उपनिविष्टसमाप्तयोरुपनिविष्टं पृथग्यानस्थानं अतिसन्धायारिं युध्येत, न समाप्तं अरिणा एकस्थानयानम्

08.5.13 उपरुद्धपरिक्षिप्तयोरुपरुद्धं अन्यतो निष्क्रम्य उपरोद्धारं प्रतियुध्येत, न परिक्षिप्तं सर्वतः प्रतिरुद्धम्

08.5.14 छिन्नधान्यपुरुषवीवधयोः छिन्नधान्यं अन्यतो धान्यं आनीय जङ्गमस्थावराहारं वा युध्येत, न छिन्नपुरुषवीवधं अनभिसारम्

08.5.15 स्वविक्षिप्तमित्रविक्षिप्तयोः स्वविक्षिप्तं स्वभूमौ विक्षिप्तं सैन्यं आपदि शक्यं आवाहयितुं, न मित्रविक्षिप्तं विप्रकृष्टदेशकालत्वात्

08.5.16 दूष्ययुक्तदुष्टपार्ष्णिग्राहयोर्दूष्ययुक्तं आप्तपुरुषाधिष्ठितं असंहतं युध्येत, न दुष्टपार्ष्णिग्राहं पृष्ठाभिघातत्रस्तम्

08.5.17 शून्यमूलास्वामिसंहतयोः शून्यमूलं कृतपौरजानपदारक्षं सर्वसन्दोहेन युध्येत, नास्वामिसंहतं राजसेनापतिहीनम्

08.5.18 भिन्नकूटान्धयोर्भिन्नकूटं अन्याधिष्ठितं युध्येत, नान्धं अदेशिकं - इति
08.5.19ab दोषशुद्धिर्बलावापः सत्त्रस्थानातिसंहितम् ।
08.5.19chd सन्धिश्च उत्तरपक्षस्य बलव्यसनसाधनम्
08.5.20ab रक्षेत् स्वदण्डं व्यसने शत्रुभ्यो नित्यं उत्थितः ।
08.5.20chd प्रहरेद् दण्डरन्ध्रेषु शत्रूणां नित्यं उत्थितः
08.5.21ab यतो निमित्तं व्यसनं प्रकृतीनां अवाप्नुयात् ।
08.5.21chd प्राग् एव प्रतिकुर्वीत तन्निमित्तं अतन्द्रितः ।
08.5.22ab अभियातं स्वयं मित्रं सम्भूयान्यवशेन वा
08.5.22chd परित्यक्तं अशक्त्या वा लोभेन प्रणयेन वा ।
08.5.23ab विक्रीतं अभियुञ्जाने सङ्ग्रामे वाऽपवर्तिना
08.5.23chd द्वैधीभावेन वाऽमित्रं यास्यता वाऽन्यं अन्यतः ।
08.5.24ab पृथग् वा सहयाने वा विश्वासेनातिसंहितम्
08.5.24chd भयावमानालस्यैर्वा व्यसनान्न प्रमोक्षितम् ।
08.5.25ab अवरुद्धं स्वभूमिभ्यः समीपाद् वा भयाद् गतम्
08.5.25chd आच्छेदनाद् अदानाद् वा दत्त्वा वाऽप्यवमानितम् ।
08.5.26ab अत्याहारितं अर्थं वा स्वयं परमुखेन वा
08.5.26chd अतिभारे नियुक्तं वा भङ्क्त्वा परं उपस्थितम् ।
08.5.27ab उपेक्षितं अशक्त्या वा प्रार्थयित्वा विरोधितम्
08.5.27chd कृच्छ्रेण साध्यते मित्रं सिद्धं चाशु विरज्यति ।
08.5.28ab कृतप्रयासं मान्यं वा मोहान् मित्रं अमानितम् ।
08.5.28chd मानितं वा न सदृशं शक्तितो वा निवारितम्
08.5.29ab मित्र उपघातत्रस्तं वा शङ्कितं वाऽरिसंहितात् ।
08.5.29chd दूष्यैर्वा भेदितुं मित्रं साध्यं सिद्धं च तिष्ठति
08.5.30ab तस्मान्न उत्पादयेद् एनान् दोषान् मित्र उपघातकान् ।
08.5.30chd उत्पन्नान् वा प्रशमयेद् गुणैर्दोष उपघातिभिः (इति)

Book |
Chapt | शक्तिदेशकालबलाबलज्ञानं - यात्राकालाः

09.1.01 विजिगीषुरात्मनः परस्य च बलाबलं शक्तिदेशकालयात्राकालबलसमुद्दानकालपश्चात्कोपक्षयव्ययलाभापदां ज्ञात्वा विशिष्टबलो यायात्, अन्यथाऽऽसीत

09.1.02 उत्साहप्रभावयोरुत्साहः श्रेयान्

09.1.03 स्वयं हि राजा शूरो बलवान् अरोगः कृतास्त्रो दण्डद्वितीयोऽपि शक्तः प्रभाववन्तं राजानं जेतुम्

09.1.04 अल्पोऽपि चास्य दण्डः तेजसा कृत्यकरो भवति

09.1.05 निरुत्साहः तु प्रभाववान् राजा विक्रमाभिपन्नो नश्यति इत्याचार्याः

09.1.06 न इति कौटिल्यः

09.1.07 प्रभाववान् उत्साहवन्तं राजानं प्रभावेनातिसन्धत्ते तद्विशिष्टं अन्यं राजानं आवाह्य भृत्वा क्रीत्वा प्रवीरपुरुषान्

09.1.08 प्रभूतप्रभावहयहस्तिरथ उपकरणसम्पन्नश्चास्य दण्डः सर्वत्राप्रतिहतश्चरति

09.1.09 उत्साहवतश्च प्रभाववन्तो जित्वा क्रीत्वा च स्त्रियो बालाः पङ्गवोऽन्धाश्च पृथिवीं जिग्युरिति

09.1.10 प्रभावमन्त्रयोः प्रभावः श्रेयान्

09.1.11 मन्त्रशक्तिसम्पन्नो हि वन्ध्यबुद्धिरप्रभावो भवति

09.1.12 मन्त्रकर्म चास्य निश्चितं अप्रभावो गर्भधान्यं अवृष्टिरिव उपहन्ति इत्याचार्याः

09.1.13 न इति कौटिल्यः

09.1.14 मन्त्रशक्तिः श्रेयसी

09.1.15 प्रज्ञाशास्त्रचक्षुर्हि राजाऽल्पेनापि प्रयत्नेन मन्त्रं आधातुं शक्तः परान् उत्साहप्रभाववतश्च सामादिभिर्योग उपनिषद्भ्यां चातिसन्धातुम्

09.1.16 एवं उत्साहप्रभावमन्त्रशक्तीनां उत्तर उत्तराधिकोऽतिसन्धत्ते

09.1.17 देशः पृथिवी

09.1.18 तस्यां हिमवत्समुद्रान्तरं उदीचीनं योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्

09.1.19 तत्रारण्यो ग्राम्यः पर्वत औदको भौमः समो विषम इति विशेषाः

09.1.20 तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत

09.1.21 यत्रात्मनः सैन्यव्यायामानां भूमिः, अभूमिः परस्य, स उत्तमो देशः, विपरीतोऽधमः, साधारणो मध्यमः

09.1.22 कालः शीत उष्णवर्षात्मा

09.1.23 तस्य रात्रिरहः पक्षो मास ऋतुरयनं संवत्सरो युगं इति विशेषाः

09.1.24 तेषु यथास्वबलवृद्धिकरं कर्मप्रयुञ्जीत

09.1.25 यत्रात्मनः सैन्यव्यायामानां ऋतुः अनृतुः परस्य, स उत्तमः कालः, विपरीतोऽधमः, साधारणो मध्यमः

09.1.26 शक्तिदेशकालानां तु शक्तिः श्रेयसी इत्याचार्याः

09.1.27 शक्तिमान् हि निम्नस्थलवतो देशस्य शीत उष्णवर्षवतश्च कालस्य शक्तः प्रतीकारे भवति

09.1.28 देशः श्रेयान् इत्येके

09.1.29 स्थलगतो हि श्वा नक्रं विकर्षति, निम्नगतो नक्रः श्वानम् इति

09.1.30 कालः श्रेयान् इत्येके

09.1.31 दिवा काकः कौशिकं हन्ति, रात्रौ कौशिकः काकम् इति

09.1.32 न इति कौटिल्यः

09.1.33 परस्परसाधका हि शक्तिदेशकालाः

09.1.34 तैरभ्युच्चितः तृतीयं चतुर्थं वा दण्डस्यांशं मूले पाष्ण्र्यां प्रत्यन्ताटवीषु च रक्षा विधाय कार्यसाधनसहं कोशदण्डं चादाय क्षीणपुराणभक्तं अगृहीतनवभक्तं असंस्कृतदुर्गममित्रं वार्षिकं चास्य सस्यं हैमनं च मुष्टिं उपहन्तुं मार्गशीर्षीं यात्रां यायात्

09.1.35 हैमानं चास्य सस्यं वासन्तिकं च मुष्टिं उपहन्तुं चैत्रीं यात्रां यायात्

09.1.36 क्षीणकृणकाष्ठ उदकं असंस्कृतदुर्गममित्रं वासन्तिकं चास्य सस्यं वार्षिकीं च मुष्टिं उपहन्तुं ज्येष्ठामूलीयां यात्रां यायात्

09.1.37 अत्युष्णं अल्पयवस इन्धन उदकं वा देशं हेमन्ते यायात्

09.1.38 तुषारदुर्दिनं अगाधनिम्नप्रायं गहनतृणवृक्षं वा देशं ग्रीष्मे यायात्

09.1.39 स्वसैन्यव्यायामयोग्यं परस्यायोग्यं वर्षति यायात्

09.1.40 मार्गशीर्षीं तैषीं चान्तरेण दीर्घकालां यात्रां यायात्, चैत्रीं वैशाखीं चान्तरेण मध्यमकालां, ज्येष्ठामूलीयां आषाढीं चान्तरेण ह्रस्वकालां, उपोषिष्यन् व्यसने चतुर्थीम्

09.1.41 व्यसनाभियानं विगृह्ययाने व्याख्यातम्

09.1.42 प्रायशश्चाचार्याः परव्यसने यातव्यम् इत्युपदिशन्ति

09.1.43 शक्त्य्.उदये यातव्यं अनैकान्न्तिकत्वाद् व्यसनानां इति कौटिल्यः

09.1.44 यदा वा प्रयातः कर्शयितुं उच्छेतुं वा शक्नुयाद् अमित्रं तदा यायात्

09.1.45 अत्युष्ण उपक्षीणे काले हस्तिबलप्रायो यायात्

09.1.46 हस्तिनो ह्यन्तःस्वेदाः कुष्ठिनो भवन्ति

09.1.47 अनवगाहमानाः तोयं अपिबन्तश्चान्तर्ऽवक्षाराच्चान्धीभवन्ति

09.1.48 तस्मात् प्रभूत उदके देशे वर्षति च हस्तिबलप्रायो यायात्

09.1.49 विपर्यये खर उष्ट्राश्वबलप्रायो देशं अल्पवर्षपङ्कम्

09.1.50 वर्षति मरुप्रायं चतुर्ऽङ्गबलो यायात्

09.1.51 समविषमनिम्नस्थलह्रस्वदीर्घवशेन वाऽध्वनो यात्रां विभजेत्

09.1.52ab सर्वा वा ह्रस्वकालाः स्युर्यातव्याः कार्यलाघवात् ।

09.1.52chd दीर्घाः कार्यगुरुत्वाद् वा वर्षावासः परत्र च (इति)

Chapt । बल उपादानकालाः -सम्नाहगुणाः -प्रतिबलकर्म

09.2.01 मौलभृतकश्रेणीमित्रामित्राटवीबलानां समुद्दानकालाः

09.2.02 मूलरक्षणाद् अतिरिक्तं मौलबलं, अत्यावापयुक्ता वा मौला मूले विकुर्वीरन्, बहुलानुरक्तमौलबलः सारबलो वा प्रतियोद्धा, व्यायामेन योद्धव्यं, प्रकृष्टेऽध्वनि काले वा क्षयव्ययसहत्वान् मौलानां, बहुलानुरक्तसम्पाते च यातव्यस्य उपजापभयाद् अन्यसैन्यानां भृतादीनां अविश्वासे, बलक्षये वा सर्वसैन्यानां - इति मौलबलकालः

09.2.03 प्रभूतं मे भृतबलं अल्पं च मौलबलम्ण् परस्यात्पं विरक्तं वा मौलबलं, फल्गुप्रायं असारं वा भृतसैन्यम्ण् मन्त्रेण योद्धव्यं अल्पव्यायामेनण् ह्रस्वो देशः कालो वा तनुक्षयव्ययह्न् अल्पावापं शान्त उपजापं विश्वस्तं वा मे सैन्यम्ण् परस्यात्पः प्रसारो हन्तव्यह्न् - इति भृतबलकालः

09.2.04 प्रभूतं मे श्रेणीबलं, शक्यं मूले यात्रायां चाधातुम्ण् ह्रस्वः प्रवासः, श्रेणीबलप्रायः प्रतियोद्धा मन्त्रव्यायामाभ्यां प्रतियोद्धुकामः, दण्डबलव्यवहारः - इति श्रेणीबलकालः

09.2.05 प्रभूतं मे मित्रबलं शक्यं मूले यात्रायां चाधातुम्ण् अल्पः प्रवासो मन्त्रयुद्धाच्च भूयो व्यायामयुद्धम्ण् मित्रबलेन वा पूर्वं अटवीं नगरस्थानं आसारं वा योधयित्वा पश्चात् स्वबलेन योद्धयिष्यामिण् मित्रसाधारणं वा मे कार्यम्ण् मित्रायत्ता वा मे कार्यसिद्धिह्न् आसन्नं अनुग्राह्यं वा मे मित्रम्ण् अत्यावापं वाऽस्य सादयिष्यामि - इति मित्रबलकालः

09.2.06 प्रभूतं मे शत्रुबलं, शत्रुबलेन योधयिष्यामि नगरस्थानं अटवीं वा, तत्र मे श्वराहयोः कलहे चण्डालस्य इवान्यतरसिद्धिर्भविष्यतिण् आसाराणां अटवीनां वा कण्टकमर्दनं एतत् करिष्यामिण् - अत्युपचितं वा कोपभयान्नित्यं आसन्नं अरिबलं वासयेद्, अन्यत्राभ्यन्तरकोपशङ्कायाः - शत्रुयुद्धावरयुद्धकालश्च - इत्यमित्रबलकालः

09.2.07 तेनाटवीबलकालो व्याख्यातः

09.2.08 मार्गादेशिकं, परभूमियोग्यं, अरियुद्धप्रतिलोमं, अटवीबलप्रायः शत्रुर्वा, बिल्वं बिल्वेन हन्यताम्ण् अल्पः प्रसारो हन्तव्यः - इत्यटवीबलकालः

09.2.09 सैन्यं अनेकं अनेकस्थं उक्तं अनुक्तं वा विलोपार्थं यद् उत्तिष्ठति तद् औत्साहिकं - अभक्तवेतनं विलोपविष्टिप्रतापकरं भेद्यं परेषां, अभेद्यं तुल्यदेशजातिशिल्पप्रायं संहतं महत् इति बल उपादानकालाह्

09.2.10 तेषां कुप्यभृतं अमित्राटवीबलं विलोपभृतं वा कुर्यात्

09.2.11 अमित्रस्य वा बलकाले प्रत्युत्पन्ने शत्रुबलं अवगृह्णीयात्, अन्यत्र वा प्रेषयेत्, अफलं वा कुर्यात्, विक्षिप्तं वा वासयेत्, काले वाऽतिक्रान्ते विसृजेत्

09.2.12 परस्य च एतद् बलसमुद्दानं विघातयेत्, आत्मनः सम्पादयेत्

09.2.13 पूर्वं पूर्वं च एषां श्रेयः सम्नाहयितुम्

09.2.14 तद्भावभावित्वान्नित्यसत्कारानुगमाच्च मौलबलं भृतबलात्श्रेयः

09.2.15 नित्यानन्तरं क्षिप्र उत्थायि वश्यं व भृतबलं श्रेणीबलात्श्रेयः

09.2.16 जानपदं एकार्थ उपगतं तुल्यसङ्घर्षामर्षसिद्धिलाभं च श्रेणीबलं मित्रबलात्श्रेयः

09.2.17 अपरिमितदेशकालं एकार्थ उपगमाच्च मित्रबलं अमित्रबलात्श्रेयः

09.2.18 आर्याधिष्ठितं अमित्रबलं अटवीबलात्श्रेयः

09.2.19 तद् उभयं विलोपार्थम्

09.2.20 अविलोपे व्यसने च ताभ्यां अहिभयं स्यात्

09.2.21 ब्राह्मणक्षत्रियवैश्यशूद्रसैन्यानां तेजःप्राधान्यात् पूर्वं पूर्वं श्रेयः सम्नाहयितुम् इत्याचार्याः

09.2.22 न इति कौटिल्यः

09.2.23 प्रणिपातेन ब्राह्मणबलं परोऽभिहारयेत्

09.2.24 प्रहरणविद्याविनीतं तु क्षत्रियबलं श्रेयः, बहुलसारं वा वैश्यशूद्रबलं इति

09.2.25 तस्माद् एवम्बलः परः, तस्य एतत् प्रतिबलं इति बलसमुद्दानं कुर्यात्

09.2.26 हस्तियन्त्रशकटगर्भकुन्तप्रासहाटकवेणुशल्यवद् हस्तिबलस्य प्रतिबलम्

09.2.27 तद् एव पाषाणलगुडावरणाङ्कुशकचग्रहणीप्रायं रथबलस्य प्रतिबलम्

09.2.28 तद् एवाश्वानां प्रतिबलं, वर्मिणो वा हस्तिनोऽश्वा वा वर्मिणः

09.2.29 कवचिनो रथा आवरणिनः पत्तयश्च चतुर्ऽङ्गबलस्य प्रतिबलम्

09.2.30ab एवं बलसमुद्दानं परसैन्यनिवारणम् ।

09.2.30chd विभवेन स्वसैन्यानां कुर्याद् अङ्गविकल्पशः (इति)

Chapt । पश्चात्कोपचिन्ता - बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः

09.3.01 अल्पः पश्चात्कोपो महान् पुरस्ताल्लाभ इति अल्पः पश्चात्कोपो गरीयान्

09.3.02 अल्पं पश्चात्कोपं प्रयातस्स्य दूष्यामित्राटविका हि सर्वतः समेधयन्ति, प्रकृतिकोपो वा

09.3.03 लब्धं अपि च महान्तं पुरस्ताल्लाहं एवम्भूते भृत्यमित्रक्षयव्यया ग्रसन्ते

09.3.04 तस्मात् सहस्र एकीयः पुरस्ताल्लाभस्यायोगः शत एकीयो वा पश्चात्कोप इति न यायात्

09.3.05 सूचीमुखा ह्यनर्था इति लोकप्रवादः

09.3.06 पश्चात्कोपे सामदानभेददण्डान् प्रयुञ्जीत

09.3.07 पुरस्ताल्लाभे सेनापतिं कुमारं वा दण्डचारिणं कुर्वीत

09.3.08 बलवान् वा राजा पश्चात्कोपावग्रहसमर्थः पुरस्ताल्लाभं आदातुं यायात्

09.3.09 अभ्यन्तरकोपशङ्कायां शङ्कितान् आदाय यायात्, बाह्यकोपशङ्कायां वा पुत्रदारं एषाम्

09.3.10 अभ्यन्तरावग्रहं कृत्वा शून्यपालं अनेकबलवर्गं अनेकमुख्यं च स्थापयित्वा यायात्, न वा यायात्

09.3.11 अभ्यन्तरकोपो बाह्यकोपात् पापीयान् इत्युक्तं पुरस्तात्

09.3.12 मन्त्रपुरोहितसेनापतियुवराजानां अन्यतमकोपोऽभ्यन्तरकोपः

09.3.13 तं आत्मदोषत्यागेन परशक्त्य्ऽपराधवशेन वा साधयेत्

09.3.14 महाऽपराधेऽपि पुरोहिते सम्मोधनं अवस्रावणं वा सिद्धिः, युवराजे सम्मोधनं निग्रहो वा गुणवत्यन्यस्मिन् सति पुत्रे

09.3.15 पुत्रं भ्रातरं अन्यं वा कुल्यं राजग्राहिणं उत्साहेन साधयेत्, उत्साहाब्भावे गृहीतानुवर्तनसन्धिकर्मभ्यां अरिसन्धानभयात्

09.3.16 अन्येभ्यः तद्विधेभ्यो वा भूमिदानैर्विश्वासयेद् एनम्

09.3.17 तद्विशिष्टं स्वयङ्ग्राहं दण्डं वा प्रेषयेत्, सामन्ताटविकान् वा, तैर्विगृहीतं अतिसन्दध्यात्

09.3.18 अपरुद्धादानं पारग्रामिकं वा योगं आतिष्ठेत्

09.3.19 एतेन मन्त्रसेनापती व्याख्यातौ

09.3.20 मन्त्र्य्ऽअदिवर्जानां अन्तर्ऽमात्यानां अन्यतमकोपोऽन्तर्ऽमात्यकोपः

09.3.21 तत्रापि यथाऽर्हं उपायान् प्रयुञ्जीत

09.3.22 राष्ट्रमुख्यान्तपालाटविकदण्ड उपनतानां अन्यतमकोपो बाह्यकोपः

09.3.23 तं अन्योन्येनावग्राहयेत्

09.3.24 अतिदुर्गप्रतिष्टब्धं वा सामन्ताटविकतत्कुलीनापरुद्धानां अन्यतमेनावग्राहयेत्

09.3.25 मित्रेण उपग्राहयेद् वा यथा नामित्रं गच्छेत्

09.3.26 अमित्राद् वा सत्त्री भेदयेद् एनं - अयं त्वा योगपुरुषं मन्यमानो भर्तर्येव विक्रमयिष्यति, अवासार्थो दण्डचारिणं अमित्राटविकेषु कृच्छ्रे वा प्रयासे योक्ष्यति, विपुत्रदारं अन्ते वा वासयिष्यति

09.3.27 प्रतिहतविक्रमं त्वां भर्तर्य्पण्यं करिष्यति, त्वया वा सन्धिं कृत्वा भर्तारं एव प्रसादयिष्यति

09.3.28 मित्रं उपकृष्टं वाऽस्य गच्छ इति

09.3.29 प्रतिपन्नं इष्टाभिप्रायैः पूजयेत्

09.3.30 अप्रतिपन्नस्य संश्रयं भेदयेद् असौ ते योगपुरुषः प्रणिहितः इति

09.3.31 सत्त्री च एनं अभित्यक्तशासनैर्घातयेत्, गूढपुरुषैर्वा

09.3.32 सहप्रस्थायिनो वाऽस्य प्रवीरपुरुषान् यथाऽभिप्रायकरणेनावाहयेत्

09.3.33 तेन प्रणिहितान् सत्त्री ब्रूयात्

09.3.34 इति सिद्धिः

09.3.35 परस्य च एनान् कोपान् ऽत्थापयेत्, आत्मनश्च शमयेत्

09.3.36 यः कोपं कर्तुं शमयितुं वा शक्तः तत्र ऽपजापः कार्यः

09.3.37 यः सत्यसन्धः शक्तः कर्मणि फलावाप्तौ चानुग्रहीतुं विनिपाते च त्रातुं तत्र प्रतिजापः कार्यः, तर्कयितव्यश्च कल्याणबुद्धिरुताहो शठ इति

09.3.38 शठो हि बाह्योऽभ्यन्तरं एवं ऽपजपति - भर्तारं चेद् हत्वा मां प्रतिपादयिष्यति शत्रुवधो भूमिलाभश्च मे द्विविधो लाभो भविष्यति, अथ वा शत्रुरेनं आहनिष्यति इति हतबन्धुपक्षः तुल्यदोषदण्डेन ऽद्विग्नश्च मे भूयान् अकृत्यपक्षो भविष्यति, तद्विधे वाऽन्यस्मिन्न् अपि शङ्कितो भविष्यति, अन्यं अन्यं चास्य मुख्यं अभित्यक्तशासनेन घातयिष्यामि इति

09.3.39 अभ्यन्तरो वा शठो बाह्यं एवं ऽपजपति - कोशं अस्य हरिष्यामि, दण्डं वाऽस्य हनिष्यामि, दुष्टं वा भर्तारं अनेन घातयिष्यामि, प्रतिपन्नं बाह्यं अमित्राटविकेषु विक्रमयिष्यामि चक्रं अस्य सज्यतां, वैरं अस्य प्रसज्यतां, ततः स्वाधीनो मे भविष्यति, ततो भर्तारं एव प्रसादयिष्यामि, स्वयं वा राज्यं ग्रहीष्यामिण् बद्ध्वा वा बाह्यभूमिं भर्तृभूमिं च ऽभयं अवाप्स्यामि, विरुद्धं वाऽऽवाहयित्वा बाह्यं विश्वस्तं घातयिष्यामि, शून्यं वाऽस्य मूलं हरिष्यामि इति

09.3.40 कल्याणबुद्धिः तु सहजीव्यर्थं ऽपजपति

09.3.41 कल्याणबुद्धिना सन्दधीत, शठं तथा इति प्रतिगृह्यातिसन्दध्यात् - इति

09.3.42ab एवं ऽपलभ्य - परे परेभ्यः स्वे स्वेभ्यः स्वे परेभ्यः स्वतः परे ।

09.3.42chd रक्ष्याः स्वेभ्यः परेभ्यश्च नित्यं आत्मा विपश्चिता (इति)

Chapt । क्षयव्ययलाभविपरिमर्शः

09.4.01 युग्यपुरुषापचयः क्षयः

09.4.02 हिरण्यधान्यापचयो व्ययः

09.4.03 ताभ्यां बहुगुणविशिष्टे लाभे यायात्

09.4.04 आदेयः प्रत्यादेयः प्रसादकः प्रकोपको ह्रस्वकालः तनुक्षयोऽल्पव्ययो महान् वृद्ध्य्.उदयः कल्यो धर्म्यः पुरोगश्च इति लाभसम्पत्

09.4.05 सुप्राप्यानुपाल्यः परेषां अप्रत्यादेय इत्यादेयः

09.4.06 विपर्यये प्रत्यादेयः

09.4.07 तं आददानः तत्रस्थो वा विनाशं प्राप्नोति

09.4.08 यदि वा पश्येत् प्रत्यादेयं आदाय कोशदण्डनिचयरक्षाविधानान्यवस्रावयिष्यामि, खनिद्रव्यहस्तिवनसेतुबन्धवणिक्पथान् उद्धृतसारान् करिष्यामि, प्रकृतीरस्य कर्शयिष्यामि, अपवाहयिष्यामि, आयोगेनाराधयिष्यामि वा, ताः परं प्रतियोगेन कोपयिष्यति, प्रतिपक्षे वाऽस्य पण्यं एनं करिष्यामि, मित्रं अपरुद्धं वाऽस्य प्रतिपादयिष्यामि, मित्रस्य स्वस्य वा देशस्य पीडां अत्रस्थः तस्करेभ्यः परेभ्यश्च प्रतिकरिष्यामि, मित्रं आश्रयं वाऽस्य वैगुण्यं ग्राहयिष्यामि, तद् अमित्रविरक्तं तत्कुलीनं प्रतिपत्स्यते, सत्कृत्य वाऽस्मै भूमिं दास्यामि इति संहितसमुत्थितं मित्रं मे चिराय भविष्यति इति प्रत्यादेयं अपि लाभं आददीत

09.4.09 इत्यादेयप्रत्यादेयौ व्याख्यातौ

09.4.10 अधार्मिकाद् धार्मिकस्य लाभो लभ्यमानः स्वेषां परेषां च प्रसादको भवति

09.4.11 विपरीतः प्रकोपक इति

09.4.12 मन्त्रिणां उपदेशाल्लाभोऽलभ्यमानः कोपको भवति अयं अस्माभिः क्षयव्ययौ ग्राहितः इति

09.4.13 दूष्यमन्त्रिणां अनादराल्लाभो लभ्यमानः कोपको भवति सिद्धार्थोऽयं अस्मान् विनाशयिष्यति इति

09.4.14 विपरीतः प्रसादकः

09.4.15 इति प्रसादककोपकौ व्याख्यातौ

09.4.16 गमनमात्रसाध्यत्वाद् ह्रस्वकालः

09.4.17 मन्त्रसाध्यत्वात् तनुक्षयः

09.4.18 भक्तमात्रव्ययत्वाद् अल्पव्ययः

09.4.19 तदात्ववैपुल्यान् महान्

09.4.20 अर्थानुबन्धकत्वाद् वृद्ध्य्.उदयः

09.4.21 निराबाधकत्वात् कल्यः

09.4.22 प्रशस्त उपादानाद् धर्म्यः

09.4.23 सामवायिकानां अनिर्बन्धगामित्वात् पुरोगः - इति

09.4.24 तुल्ये लाभे देशकालौ शक्त्य्.उपायौ प्रियाप्रियौ जवाजवौ सामीप्यविप्रकर्षौ तदात्वानुबन्धौ सारत्वसातत्ये बाहुल्यबाहुगुण्ये च विमृश्य बहुगुणयुक्तं लाभं आददीत

09.4.25 लाभविघ्नाः - कामः कोपः साध्वसं कारुण्यं ह्रीरनार्यभावो मानः सानुक्रोशता परलोकापेक्षा धार्मिकत्वं अत्यागित्वं दैन्यं असूया हस्तगतावमानो दौरात्म्यं अविश्वासो भयं अप्रतीकारः शीत उष्णवर्षाणां आक्षम्यं मङ्गलतिथिनक्षत्र इष्टित्वं इति

09.4.26ab नक्षत्रं अति पृच्छन्तं बालं अर्थोऽतिवर्तते ।

09.4.26chd अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः

09.4.27ab नाधनाः प्राप्नुवन्त्यर्थान्नरा यत्नशतैरपि ।

09.4.27chd अर्थैरर्था प्रबध्यन्ते गजाः प्रजिगजैरिव (इति)

Chapt | बाह्याभ्यन्तराश्चापदः

09.5.01 सन्ध्य्sअदीनां अयथा उद्देशावस्थापनं अपनयः

09.5.02 तस्माद् आपदः सम्भवन्ति

09.5.03 बाह्य उत्पत्तिरभ्यन्तरप्रतिजापा, अभ्यन्तर उत्पत्तिर्बाह्यप्रतिजापा, बाह्य उत्पत्तिर्बाह्यप्रतिजापा, अभ्यन्तर उत्पत्तिरभ्यन्तरप्रतिजापा - इत्यापदः

09.5.04 यत्र बाह्या अभ्यन्तरानुपजपन्ति, अभ्यन्तरा वा बाह्यान्, तत्र उभययोगे प्रतिजपतः सिद्धिर्विशेषवती

09.5.05 सुव्याजा हि प्रतिजपितारो भवन्ति, न उपजपितारः

09.5.06 तेषु प्रशान्तेषु नान्यान्शक्नुयुरुपजपितुं उपजपितारः

09.5.07 कृच्छ्र उपजापा हि बाह्यानां अभ्यन्तराः तेषां इतरे वा

09.5.08 महतश्च प्रयत्नस्य वधः परेषां, अर्थानुबन्धश्चात्मन इति

09.5.09 अभ्यन्तरेषु प्रतिजपत्सु सामदाने प्रयुञ्जीत

09.5.10 स्थानमानकर्म सान्त्वम्

09.5.11 अनुग्रहपरिहारौ कर्मस्वायोगो वा दानम्

09.5.12 बाह्येषु प्रतिजपत्सु भेददण्डौ प्रयुञ्जीत

09.5.13 सत्त्रिणो मित्रव्यञ्जना वा बाह्यानां चारं एषां ब्रूयुः अयं वो राजा दूष्यव्यञ्जनैरतिसन्धातुकामः, बुध्यध्वम् इति

09.5.14 दूष्येषु वा दूष्यव्यञ्जनाः प्रणिहिता दूष्यान् बाह्यैर्भेदयेयुः, बाह्यान् वा दूष्यैः

09.5.15 दूष्यान् अनुप्रविष्टा वा तीक्ष्णाः शस्त्ररसाभ्यां हन्युः

09.5.16 आहूय वा बाह्यान् घातयेयुः

09.5.17 यत्र बाह्या बाह्यान् उपजपन्ति, अभ्यन्तरान् अभ्यन्तरा वा, तत्र एकान्तयोग उपजपितुः सिद्धिर्विशेषवती

09.5.18 दोषशुद्धौ हि दूष्या न विद्यन्ते

09.5.19 दूष्यशुद्धौ हि दोषः पुनरन्यान् दूषयति

09.5.20 तस्माद् बाह्येषु उपजपत्सु भेददण्डौ प्रयुञ्जीत

09.5.21 सत्त्रिणो मित्रव्यञ्जना वा ब्रूयुः अयं वो राजा स्वयं आदातुकामः, विगृहीताः स्थानेन राज्ञा, बुध्यध्वम् इति

09.5.22 प्रतिजपितुर्वा दूतदण्डान् अनुप्रविष्टाः तीक्ष्णाः शस्त्ररसादिभिरेषां छिद्रेषु प्रहरेयुः

09.5.23 ततः सत्त्रिणः प्रतिजपितारं अभिशंसेयुः

09.5.24 अभ्यन्तरान् अभ्यन्तरेषु उपजपत्सु यथाऽर्हं उपायं प्रयुञ्जीत

09.5.25 तुष्टलिङ्गं अतुष्टं विपरीतं वा साम प्रयुञ्जीत

09.5.26 शौचसामर्थ्यापदेशेन व्यसनाभ्युदयावेक्षणेन वा प्रतिपूजनं इति दानम्

09.5.27 मित्रव्यञ्जनो वा ब्रूयाद् एतान् चित्तज्ञानार्थं उपधास्यति वो राजा, तद् अस्याख्यातव्यं इति

09.5.28 परस्पराद् वा भेदयेद् एनान् असौ चासौ च वो राजन्येवं उपजपति - इति भेदः

09.5.29 दाण्डकर्मिकवच्च दण्डः

09.5.30 एतासां चतसृणां आपदां अभ्यन्तरां एव पूर्वं साधयेत्

09.5.31 अहिभयाद् अभ्यन्तरकोपो बाह्यकोपात् पापीयान् इत्युक्तं पुरस्ताद्

09.5.32ab पूर्वां पूर्वां विजानीयाल्लघ्वीं आपदं आपदाम् ।

09.5.32chd उत्थितां बलवद्भ्यो वा गुर्वीं लघ्वीं विपर्यये (इति)

Chapt | दूष्यशत्रुसम्युक्ताः <आपदह्>

09.6.01 दूष्येभ्यः शत्रुभ्यश्च द्विविधा शुद्धा

09.6.02 दूष्यशुद्धायां पौरेषु जानपदेषु वा दण्डवर्जान् उपायान् प्रयुञ्जीत

09.6.03 दण्डो हि महाजने क्षेसुं अशक्यः

09.6.04 क्षिप्तो वा तं चार्थं न कुर्यात्, अन्यं चानर्थं उत्पादयेत्

09.6.05 मुख्येषु त्वेषां दाण्डकर्मिकवच्चेष्टेत

09.6.06 शत्रुशुद्धायां यतः शत्रुः प्रधानः कार्यो वा ततः सामादिभिः सिद्धिं लिप्सेत

09.6.07 स्वामिन्यायत्ता प्रधानसिद्धिः, मन्त्रिष्वायत्ताऽऽयत्तसिद्धिः, उभयायत्ता प्रधानायत्तसिद्धिः

09.6.08 दूष्यादूष्याणां आमिश्रितत्वाद् आमिश्रा

09.6.09 आमिश्रायां अदूष्यतः सिद्धिः

09.6.10 आलम्बनाभावे ह्यालम्बिता न विद्यन्ते

09.6.11 मित्रामित्राणां एकीभावात् परमिश्रा

09.6.12 परमिश्रायां मित्रतः सिद्धिः

09.6.13 सुकरो हि मित्रेण सन्धिः, नामित्रेण इति

09.6.14 मित्रं चेन्न सन्धिं इच्छेद् अभीक्ष्णं उपजपेत्

09.6.15 ततः सत्त्रिभिरमित्राद् भेदयित्वा मित्रं लभेत

09.6.16 मित्रसङ्घस्य वा योऽन्तस्थायी तं लभेत

09.6.17 अन्तस्थायिनि लब्धे मध्यस्थायिनो भिद्यन्ते

09.6.18 मध्यस्थायिनं वा लभेत

09.6.19 मध्यस्थायिनि लब्धे नान्तस्थायिनः संहन्यन्ते

09.6.20 यथा च एषां आश्रयभेदः तान् उपायान् प्रयुञ्जीत

09.6.21 धार्मिकं जातिकुलश्रुतवृत्तस्तवेन सम्बन्धेन पूर्वेषां त्रैकाल्य उपकारान् अपकाराभ्यां वा सान्त्वयेत्

09.6.22 निवृत्त उत्साहं विग्रहश्रान्तं प्रतिहत उपायं क्षयव्ययाभ्यां प्रवासेन च उपतप्तं शौचेनान्यं लिप्समानं अन्यस्माद् वा शङ्कमानं मैत्रीप्रधानं वा कल्याणबुद्धिं साम्ना साधयेत्

09.6.23 लुब्धं क्षीणं वा तपस्विमुख्यावस्थापनापूर्वं दानेन साधयेत्

09.6.24 तत् पञ्चविधं - देयविसर्गो गृहीतानुवर्तनं आत्तप्रतिदानं स्वद्रव्यदानं अपूर्वं परस्वेषु स्वयङ्ग्राहदानं च

09.6.25 इति दानकर्म

09.6.26 परस्परद्वेषवैरभूमिहरणशङ्कितं अतोऽन्यतमेन भेदयेत्

09.6.27 भीरुं वा प्रतिघातेन कृतसन्धिरेष त्वयि कर्मकरिष्यति, मित्रं अस्य निसृष्टं, सन्धौ वा नाभ्यन्तरः इति

09.6.28 यस्य वा स्वदेशाद् अन्यदेशाद् वा पण्यानि पण्यागारतयाऽऽगच्छेयुः तानि अस्य यातव्याल्लब्धानि इति सत्त्रिणश्चारयेयुः

09.6.29 बहुलीभूते शासनं अभित्यक्तेन प्रेषयेत् एतत् ते पण्यं पण्यागारं वा मया ते प्रेषितं, सामवायिकेषु विक्रमस्व, अपगच्छ वा, ततः पणशेषं अवाप्स्यसि इति

09.6.30 ततः सत्त्रिणः परेषु ग्राहयेयुः एतद् अरिप्रदत्तम् इति

09.6.31 शत्रुप्रख्यातं वा पण्यं अविज्ञातं विजिगीषुं गच्छेत्

09.6.32 तद् अस्य वैदेहकव्यञ्जनाः शत्रुमुख्येषु विक्रीणीरन्

09.6.33 ततः सत्त्रिणः परेषु ग्राहयेयुः एतत् पण्यं अरिप्रदत्तम् इति

09.6.34 महाऽपराधान् अर्थमानाभ्यां उपगृह्य वा शस्त्ररसाग्निभिरमित्रे प्रणिदध्यात्

09.6.35 अथ एकं अमात्यं निष्पातयेत्

09.6.36 तस्य पुत्रदारं उपगृह्य रात्रौ हतं इति ख्यापयेत्

09.6.37 अथामात्यः शत्रोः तान् एक एकशः प्ररूपयेत्

09.6.38 ते चेद् यथा उक्तं कुर्युर्न च एनान् ग्राहयेत्

09.6.39 अशक्तिमतो वा ग्राहयेत्

09.6.40 आप्तभाव उपगतो मुख्याद् अस्यात्मानं रक्षणीयं कथयेत्

09.6.41 अथामित्रशासनं मुख्य उपघाताय प्रेषितं उभयवेतनो ग्राहयेत्

09.6.42 उत्साहशक्तिमतो वा प्रेषयेत् अमुष्य राज्यं गृह्राण, यथाऽस्थितो नः सन्धिः इति

09.6.43 ततः सत्त्रिणः परेषु ग्राहयेयुः

09.6.44 एकस्य स्कन्धावारं वीवधं आसारं वा घातयेयुः

09.6.45 इतरेषु मैत्रीं ब्रुवाणाः त्वं एतेषां घातयितव्यः इत्युपजपेयुः

09.6.46 यस्य वा प्रवीरपुरुषो हस्ती हयो वा म्रियेत गूढपुरुषैर्हन्येत ह्रियेत वा सत्त्रिणः परस्पर उपहृतं ब्रूयुः

09.6.47 ततः शासनं अभिशस्तस्य प्रेषयेत् भूयः कुरु ततः पणशीषं अवाप्स्यसि इति

09.6.48 तद् उभयवेतना ग्राहयेयुः

09.6.49 भिन्नेष्वन्यतमं लभेत

09.6.50 तेन सेनापतिकुमारदण्डचारिणो व्याख्याताः

09.6.51 सान्धिकं च भेदं प्रयुञ्जीत

09.6.52 इति भेदकर्म

09.6.53 तीक्ष्णं उत्साहिनं व्यसनिनं स्थितशत्रुं वा गूढपुरुषाः शस्त्राग्निरसादिभिः साधयेयुः, सौकर्यतो वा तेषां अन्यतमः

09.6.54 तीक्ष्णो ह्येकः शस्त्ररसाग्निभिः साधयेत्

09.6.55 अयं सर्वसन्दोहकर्म विशिष्टं वा करोति

09.6.56 इत्युपायचतुर्वर्गः

09.6.57 पूर्वः पूर्वश्चास्य लघिष्ठः

09.6.58 सान्त्वं एकगुणम्

09.6.59 दानं द्विगुणं सान्त्वपूर्वम्

09.6.60 भेदः त्रिगुणः सान्त्वदानपूर्वः

09.6.61 दण्डश्चतुर्गुणः सान्त्वदानभेदपूर्वः

09.6.62 इत्यभियुञ्जानेषु उक्तम्

09.6.63 स्वभूमिष्ठेषु तु त एव उपायाः

09.6.64 विशेषः तु

09.6.65 स्वभूमिष्ठानां अन्यतमस्य पण्यागारैरभिज्ञातान् दूतमुख्यान् अभीक्ष्णं प्रेषयेत्

09.6.66 त एनं सन्धौ परहिंसायां वा योजयेयुः

09.6.67 अप्रतिपद्यमानं कृतो नः सन्धिः इत्यावेदयेयुः

09.6.68 तं इतरेषां उभयवेतनाः सङ्क्रामयेयुः अयं वो राजा दुष्टः इति

09.6.69 यस्य वा यस्माद् भयं वैरं द्वेषो वा तं तस्माद् भेदयेयुः अयं ते शत्रुणा सन्धत्ते, पुरा त्वां अतिसन्धत्ते, क्षिप्रतरं सन्धीयस्व, निग्रहे चास्य प्रयतस्व इति

09.6.70 आवाहविवाहाभ्यां वा कृत्वा सम्योगं असम्युक्तान् भेदयेत्

09.6.71 सामन्ताटविकतत्कुलीनापरुद्धैश्च एषां राज्यानि घातयेत्, सार्थव्रजाटवीर्वा, दण्डं वाऽभिसृतम्

09.6.72 परस्परापाश्रयाश्च एषां जातिसङ्घाश्छिद्रेषु प्रहरेयुः, गूढाश्चाग्निरसशस्त्रेण

09.6.73ab वीतंसगिलवच्चारीन् योगैराचरितैः शठः ।

09.6.73chd घातयेत् परमिश्रायां विश्वासेनामिषेण च (इति)

Chapt । अर्थानर्थसंशययुक्ताः <आपदह्> - तासां उपायविकल्पजाः सिद्धयः

09.7.01 कामादिरुत्सेकः स्वाः प्रकृतीः कोपयति, अपनयो बाह्याः

09.7.02 तद् उभयं आसुरी वृत्तिः

09.7.03 स्वजनविकारः कोपः

09.7.04 परवृद्धिहेतुषु आपद्ऽर्थोऽनर्थः संशय इति

09.7.05 योऽर्थः शत्रुवृद्धिं अप्राप्तः करोति, प्राप्तः प्रत्यादेयः परेषां भवति, प्राप्यमाणो वा क्षयव्यय उदयो भवति, स भवत्यापद्ऽर्थः

09.7.06 यथा सामन्तानां आमिषभूतः सामन्तव्यसनजो लाभः, शत्रुप्रार्थितो वा स्वभावाधिगम्यो लाभः, पश्चात् कोपेन पार्ष्ण्यिग्राहेण वा विगृहीतः पुरस्ताल्लाभः, मित्र उच्छेदेन सन्धिव्यतिक्रमेण वा मण्डलविरुद्धो लाभः इत्यापद्ऽर्थः

09.7.07 स्वतः परतो वा भय उत्पत्तिरित्यनर्थः

09.7.08 तयोः अर्थो न वा इति, अनर्थो न वा इति, अर्थोऽनर्थ इति, अनर्थोऽर्थ इति संशयः

09.7.09 शत्रुमित्रं उत्साहयितुं अर्थो न वा इति संशयः

09.7.10 शत्रुबलं अर्थमानाभ्यां आवाहयितुं अनर्थो न वा इति संशयः

09.7.11 बलवत्सामन्तां भूमिं आदातुं अर्थोऽनर्थ इति संशयः

09.7.12 जायसा सम्भूययानं अनर्थोऽर्थ इति संशयः

09.7.13 तेषां अर्थसंशयं उपगच्छेत्

09.7.14 अर्थोऽर्थानुबन्धः, अर्थो निरनुबन्धः, अर्थोऽनर्थानुबन्धः, अनर्थोऽर्थानुबन्धः, अनर्थो निरनुबन्धः, अनर्थोऽनर्थानुबन्धः इत्यनुबन्धषड्वर्गः

09.7.15 शत्रुं उत्पाट्य पार्ष्णिग्राहादानं अर्थोऽनर्थानुबन्धः

09.7.16 उदासीनस्य दण्डानुग्रहः फलेन अर्थो निरनुबन्धः

09.7.17 परस्यान्तर्.उच्छेदनं अर्थोऽनर्थानुबन्धः

09.7.18 शत्रुप्रतिवेशस्यानुग्रहः कोशदण्डाभ्यां अनर्थोऽनर्थानुबन्धः

09.7.19 हीनशक्तिं उत्साह्य निवृत्तिरनर्थो निरनुबन्धः

09.7.20 ज्यायांसं उत्थाप्य निवृत्तिरनर्थोऽनर्थानुबन्धः

09.7.21 तेषां पूर्वः पूर्वः श्रेयान् उपसम्प्रासुम्

09.7.22 इति कार्यावस्थापनम्

09.7.23 समन्ततो युगपद्ऽर्थ उत्पत्तिः समन्ततोऽर्थापद् भवति

09.7.24 सा एव पार्ष्णिग्राहविगृहीता समन्ततोऽर्थसंशयापद् भवति

09.7.25 तयोर्मित्राक्रन्द उपग्रहात् सिद्धिः

09.7.26 समन्ततः शत्रुभ्यो भय उत्पत्तिः समन्तोऽनर्थापद् भवति

09.7.27 सा एव मित्रविगृहीता समन्ततोऽनर्थसंशयापद् भवति

09.7.28 तयोश्चलामित्राक्रन्द उपग्रहात् सिद्धिः, परमिश्राप्रतीकारो वा

09.7.29 इतो लाभ इतरतो लाभ इत्युभयतोऽर्थापद् भवति

09.7.30 तस्यां समन्ततोऽर्थायां च लाभगुणयुक्तं अर्थं आदातुं यायात्

09.7.31 तुल्ये लाभगुणे प्रधानं आसन्नं अनतिपातिनं ऊनो वा येन भवेत् तं आदातुं यायात्

09.7.32 इतोऽनर्थ इतरतोऽनर्थ इत्युभयतोऽनर्थापत्

09.7.33 तस्यां समन्ततोऽनर्थायां च मित्रेभ्यः सिद्धिं लिप्सेत

09.7.34 मित्राभावे प्रकृतीनां लघीयस्य एकतोऽनर्थां साधयेत्, उभयतोऽनर्थां ज्यायस्या, समन्ततोऽनर्थां मूलेन प्रतिकुर्यात्

09.7.35 अशक्ये सर्वं उत्सृज्यापगच्छेत्

09.7.36 दृष्टा हि जीवतः पुनर्ऽअवृत्तिर्यथा सुयात्रा उदयनाभ्याम्

09.7.37 इतो लाभ इतरतो राज्याभिमर्श इत्युभयतोऽर्थानर्थापद् भवति

09.7.38 तस्यां अनर्थसाधको योऽर्थः तं आदातुं यायात्

09.7.39 अन्यथा हि राज्याभिमर्शं वारयेत्

09.7.40 एतया समन्ततोऽर्थानर्थापद् व्याख्याता

09.7.41 इतोऽनर्थ इतरतोऽर्थसंशय इत्युभयतोऽनर्थार्थसंशया

09.7.42 तस्यां पूर्वं अनर्थं साधयेत्, तत्सिद्धावर्थसंशयम्

09.7.43 एतया समन्ततोऽनर्थार्थसंशया व्याख्याता

09.7.44 इतोऽर्थ इतरतोऽनर्थसंशय इत्युभयतोऽर्थानर्थसंशयापद्

09.7.45 एतया समन्ततोऽर्थानर्थसंशया व्याख्याता

09.7.46 तस्यां पूर्वां पूर्वां प्रकृतीनां अनर्थसंशयान् मोक्षयितुं यतेत

09.7.47 श्रेयो हि मित्रं अनर्थसंशये तिष्ठन्न दण्डः, दण्डो वा न कोश इति

09.7.48 समग्रमोक्षणाभावे प्रकृतीनां अवयवान् मोक्षयितुं यतेत

09.7.49 तत्र पुरुषप्रकृतीनां बहुलं अनुरक्तं वा तीक्ष्णलुब्धवर्जं, द्रव्यप्रकृतीनां सारं महा उपकारं वा

09.7.50 सन्धिनाऽऽसनेन द्वैधीभावेन वा लघूनि, विपर्ययैर्गुरूणि

09.7.51 क्षयस्थानवृद्धीनां च उत्तर उत्तरं लिप्सेत

09.7.52 प्रातिलोम्येन वा क्षयादीनां आयत्यां विशेषं पश्येत्

09.7.53 इति देशावस्थापनम्

09.7.54 एतेन यात्राऽऽदिमध्यान्तेष्वर्थानर्थसंशयानां उपसम्प्राप्तिर्व्याख्याता

09.7.55 निरन्तरयोगित्वाच्चार्थानर्थसंशयानां यात्राऽऽदावर्थः श्रेयान् उपसम्प्रासुं पार्ष्णिग्राहासारप्रतिघाते क्षयव्ययप्रवासप्रत्यादेये मूलरक्षणेषु च भवति

09.7.56 तथाऽनर्थः संशयो वा स्वभूमिष्ठस्य विषह्यो भवति

09.7.57 एतेन यात्रामध्येऽर्थानर्थसंशयानां उपसम्प्राप्तिर्व्याख्याता

09.7.58 यात्राऽन्ते तु कर्शनीयं उच्छेदनीयं वा कर्शयित्वा उच्छिद्य वाऽर्थः श्रेयान् उपसम्प्रासुं नानर्थः संशयो वा पराबाधभयात्

09.7.59 सामवायिकानां अपुरोगस्य तु यात्रामध्यान्तगोऽनर्थः संशयो वा श्रेयान् उपसम्प्रासुं अनिर्बन्धगामित्वात्

09.7.60 अर्थो धर्मः काम इत्यर्थत्रिवर्गः

09.7.61 तस्य पूर्वः पूर्वः श्रेयान् उपसम्प्रासुम्

09.7.62 अनर्थोऽधर्मः शोक इत्यनर्थत्रिवर्गः

09.7.63 तस्य पूर्वः पूर्वः श्रेयान् प्रतिकर्तुम्

09.7.64 अर्थोऽनर्थ इति, धर्मोऽधर्म इति, कामः शोक इति संशयत्रिवर्गः

09.7.65 तस्य उत्तरपक्षसिद्धौ पूर्वपक्षः श्रेयान् उपसम्प्रासुम्

09.7.66 इति कालावस्थापनम्

09.7.67 इत्यापदः - तासां सिद्धिः

09.7.68 पुत्रभ्रातृबन्धुषु सामदानाभ्यां सिद्धिरनुरूपा, पौरजानपददण्डमुख्येषु दानभेदाभ्यां, सामन्ताटविकेषु भेददण्डाभ्याम्

09.7.69 एषाऽनुलोमा, विपर्यये प्रतिलोमा

09.7.70 मित्रामित्रेषु व्यामिश्रा सिद्धिः

09.7.71 परस्परसाधका ह्युपायाः

09.7.72 शत्रोः शङ्कितामात्येषु सान्त्वं प्रयुक्तं शेषप्रयोगं निवर्तयति, दूष्यामात्येषु दानं, सङ्घातेषु भेदः, शक्तिमत्सु दण्ड इति

09.7.73 गुरुलाघवयोगाच्चापदां नियोगविकल्पसमुच्चया भवन्ति

09.7.74 अनेन एव उपायेन नान्येन इति नियोगः

09.7.75 अनेन वाऽन्येन वा इति विकल्पः

09.7.76 अनेनान्येन च इति समुच्चयः

09.7.77 तेषां एकयोगाश्चत्वारः त्रियोगाश्च, द्वियोगाः षट्, एकश्चतुर्योगः

09.7.78 इति पञ्चदश उपायाः

09.7.79 तावन्तः प्रतिलोमाः

09.7.80 तेषां एकेन उपायेन सिद्धिरेकसिद्धिः, द्वाभ्यां द्विसिद्धिः, त्रिभिः त्रिसिद्धिः, चतुर्भिश्चतुःसिद्धिरिति

09.7.81 धर्ममूलत्वात् कामफलत्वाच्चार्थस्य धर्मार्थकामानुबन्धा याऽर्थस्य सिद्धिः सा सर्वार्थसिद्धिः <इति सिद्धयह्>

09.7.82 दैवाद् अग्निरुदकं व्याधिः प्रमारो विद्रवो दुर्भिक्षं आसुरी सृष्टिरित्यापदः

09.7.83 तासां दैवतब्राह्मणर्पणिपाततः सिद्धिः

09.7.84ab अतिवृष्टिरवृष्टिर्वा सृष्टिर्वा याऽऽसुरी भवेत् ।

09.7.84chd तस्यां आथर्वणं कर्म सिद्धारम्भाश्च सिद्धयः (इति)

Book |

Chapt | स्कन्धावारनिवेशः

10.1.01 वास्तुकप्रशस्ते वास्तुनि नायकवर्धकि मौहूर्तिकाः स्कन्धावारं, वृत्तं दीर्घ चतुर्ऽश्रं वा भूमिवशेन वा, चतुर्द्वारं षट्पथं नवसंस्थानं मापयेयुः खातवप्रसालद्वाराट्टालकसम्पन्नं भये स्थाने च

10.1.02 मध्यमस्य उत्तरे नवभागे राजवास्तुकं धनुःशतायामं अर्धविस्तारं, पश्चिमार्धे तस्यान्तःपुरम्

10.1.03 अन्तर्वंशिकसैन्यं चान्ते निविशेत

10.1.04 पुरस्ताद् उपस्थानं, दक्षिणतः कोशशासनकार्यकरणानि, वामतो राजाऽपवाह्यानां हस्त्यऽश्वरथानां स्थानम्

10.1.05 अतो धनुःशतान्तराश्चत्वारः शकटमेथीप्रततिस्तम्भसालपरिक्षेपाः

10.1.06 प्रथमे पुरस्तान् मन्त्रिपुरोहितौ, दण्षिणतः कोष्ठागारं महानसं च, वामतः कुप्यायुधागारम्

10.1.07 द्वितीये मौलभृतानां स्थानं अश्वरथानां सेनापतेश्च

10.1.08 तृतीये हस्तिनः श्रेण्यः प्रशास्ता च

10.1.09 चतुर्थे विष्टिर्नायको मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितम्

10.1.10 वणिजो रूपाजीवाश्चानुमहापथम्

10.1.11 बाह्यतो लुब्धकश्चगणिनः सतूर्याग्नयः, गूढाश्चारक्षाः

10.1.12 शत्रूणां आपाते कूपकूटावपातकण्टकिनीश्च स्थापयेत्

10.1.13 अष्टादशवर्गाणां आरक्षविपर्यासं कारयेत्

10.1.14 दिवायामं च कारयेद् अपसर्पज्ञानार्थम्

10.1.15 विवादसौरिकसमाजद्यूतवारणं च कारयेत्, मुद्रारक्षणं च

10.1.16 सेनानिवृत्तं आयुधीयं अशासनं शून्यपालो बध्नीयात्

10.1.17ab पुरस्ताद् अध्वनः सम्यक्प्रशास्ता रक्षणानि च |

10.1.17chd यायाद् वर्धकिविष्टिभ्यां उदकानि च कारयेत् (इति)

Chapt | स्कन्धावारप्रयाणं - बलव्यसनावस्कन्दकालरक्षणम्

10.2.01 ग्रामारण्यानां अध्वनि निवेशान् यवस इन्धन उदकवशेन परिसङ्ख्याय स्थानासनगमनकालं च यात्रां यायात्

10.2.02 तत्प्रतीकारद्विगुणं भक्त उपकरणं वाहयेत्

10.2.03 अशक्तो वा सैन्येष्वायोजयेत्, अन्तरेषु वा निचिनुयात्

10.2.04 पुरस्तान्नायकः, मध्ये कलत्रं स्वामी च, पार्श्वयोरश्वा बाहु.उत्सारः, चक्रान्तेषु हस्तिनः प्रसारवृद्धिर्वा, पश्चात् सेनापतिर्यायात् निविशेत

10.2.05 सर्वतो वनाजीवः प्रसारः

10.2.06 स्वदेशाद् अन्वायतिर्वीवधः

10.2.07 मित्रबलं आसारः

10.2.08 कलत्रस्थानं अपसारः

10.2.09 पुरस्ताद् अध्याघाते मकरेण यायात्, पश्चात्शकटेन, पार्श्वयोर्वज्रेण, समन्ततः सर्वतोभद्रेण, एकायने सूच्या

10.2.10 पथिद्वैधीभावे स्वभूमितो यायात्

10.2.11 अभूमिष्ठानां हि स्वभूमिष्ठा युद्धे प्रतिलोमा भवन्ति

10.2.12 योजनं अधमा, अध्यर्धं मध्यमा, द्वियोजनं उत्तमा, सम्भाव्या वा गतिः

10.2.13 आश्रयकारी सम्पन्नघाती पार्ष्णिरासारो मध्यम उदासीनो वा प्रतिकर्तव्यः, सङ्कटो मार्गः शोधयितव्यः, कोशो दण्डो मित्रामित्राटवीबलं विष्टि.ऋतुर्वा प्रतीक्ष्याः, कृतदुर्गकर्मनिचयरक्षाक्षयः क्रीतबलनिर्वेदो मित्रबलनिर्वेदश्चागमिष्यति, उपजपितारो वा नातित्वरयन्ति, शत्रुरभिप्रायं वा पूरयिष्यति, इति शनैर्यायात्, विपर्यये शीघ्रम्

10.2.14 हस्तिस्तम्भसङ्क्रमसेतुबन्धनौकाष्ठवेणुसङ्घातैरलाबुचर्मकरण्डदृतिप्लवगण्डिकावेणिकाभिश्च उदकानि तारयेत्

10.2.15 तीर्थाभिग्रहे हस्त्यश्वैरन्यतो रात्रावुत्तार्य सत्त्रं गृह्णीयात्

10.2.16 अनुदके चक्रिचतुष्पदं चाध्वप्रमाणेन शक्त्या उदकं वाहयेत्

10.2.17 दीर्घकान्तारं अनुदकं यवस इन्धन उदकहीनं वा कृच्छ्राध्वानं अभियोगप्रस्कन्नं क्षुत्पिपासाऽध्वक्लान्तं पङ्कतोयगम्भीराणां वा नदीदरीशैलानां उद्यानापयाने व्यासक्तं एकायनमार्गे शैलविषमे सङ्कटे वा बहुलीभूतं निवेशे प्रस्थिते विसम्नाहं भोजनव्यासक्तं आयतगतपरिश्रान्तं अवसुप्तं व्याधिमरकदुर्भिक्षपीडितं व्याधितपत्त्यश्वद्विपं अभूमिष्ठं वा बलव्यसनेषु वा स्वसैन्यं रक्षेत्, परसैन्यं चाभिहन्यात्

10.2.18 एकायनमार्गप्रयातस्य सेनानिश्चारग्रासाहारशय्याप्रस्ताराग्निनिधानध्वजायुधसङ्ख्यानेन परबलज्ञानम्

10.2.19 तदाऽऽत्मानो गूहयेत्

10.2.20ab पार्वतं वनदुर्गं वा सापसारप्रतिग्रहम् ।

10.2.20chd स्वभुमौ पृष्ठतः कृत्वा युध्येत निविशेत च (इति)

Chapt । कूटयुद्धविकल्पाः - स्वसैन्य उत्साहनं - स्वबलान्यबलव्यायोगः

10.3.01 बलविशिष्टः कृत उपजापः प्रतिविहित.ऋतुः स्वभूम्यां प्रकाशयुद्धं उपेयात्

10.3.02 विपर्यये कूटयुद्धम्

10.3.03 बलव्यसनावस्कन्दकालेषु परं अभिहन्यात्, अभूमिष्ठं वा स्वभूमिष्ठः, प्रकृतिप्रग्रहो वा स्वभूमिष्ठम्

10.3.04 दूष्यामित्राटवीबलैर्वा भङ्गं दत्त्वा विभूमिप्राप्तं हन्यात्

10.3.05 संहतानीकं हस्तिभिर्भेदयेत्

10.3.06 पूर्वं भङ्गप्रदानेनानुप्रलीनं भिन्नं अभिन्नः प्रतिनिवृत्य हन्यात्

10.3.07 पुरस्ताद् अभिहत्य प्रचलं विमुखं वा पृष्ठतो हस्त्यश्वेनाभिहन्यात्

10.3.08 पृष्ठतोऽभिहत्या प्रचलं विमुखं वा पुरस्तात् सारबलेनाभिहन्यात्

10.3.09 ताभ्यां पार्श्वाभिगातौ व्याख्यातौ

10.3.10 यतो वा दूष्यफल्गुबलं ततोऽभिहन्यात्

10.3.11 पुरस्ताद् विषमायां पृष्ठतोऽभिहन्यात्

10.3.12 पृष्ठतो विषमायां पुरस्ताद् अभिहन्यात्

10.3.13 पार्श्वतो विषमायां इतरतोऽभिहन्यात्

10.3.14 दूष्यामित्राटवीबलैर्वा पूर्वं योधयित्वा श्रान्तं अश्रान्तः परं अभिहन्यात्

10.3.15 दूष्यबलेन वा स्वयं भङ्गं दत्त्वा जितम् इति विश्वस्तं अविश्वस्तः सत्त्रापाश्रयोऽभिहन्यात्

10.3.16 सार्थव्रजस्कन्धावारसंवाहविलोपप्रमत्तं अप्रमत्तोऽभिहन्यात्

10.3.17 फल्गुबलावच्छन्नसारबलो वा परवीरान् अनुप्रविश्य हन्यात्

10.3.18 गोग्रहणेन श्वापदवधेन वा परवीरान् आकृष्य सत्त्रच्छन्नोऽभिहन्यात्

10.3.19 रात्रावावस्कन्देन जागरयित्वा निद्राक्लान्तान् अवसुप्तान् वा दिवा हन्यात्

10.3.20 सपादचर्मकोशैर्वा हस्तिभिः सौप्तिकं दद्यात्

10.3.21 अहःसम्नाहपरिश्रान्तान् अपराह्णेऽभिहन्यात्

10.3.22 शुष्कचर्मवृत्तशर्कराकोशकैर्गोमहिष उष्ट्रयूथैर्वा त्रस्नुभिरकृतहस्त्यश्वं भिन्नं अभिन्नः प्रतिनिवृत्तं हन्यात्

10.3.23 प्रतिसूर्यवातं वा सर्वं अभिहन्यात्

10.3.24 धान्वनवनसङ्कटपङ्कशैलनिम्नविषमनावो गावः शकटव्यूहो नीहारो रात्रिरिति सत्त्राणि

10.3.25 पूर्वे च प्रहरणकालाः कूटयुद्धहेतवः

10.3.26 सङ्ग्रामः तु निर्दिष्टदेशकालो धर्मिष्ठः

10.3.27 संहत्य दण्डं ब्रूयात् तुल्यवेतनोऽस्मि, भवद्भिः सह भोग्यं इदं राज्यं, मयाऽभिहितैः परोऽभिहन्तव्यः इति

10.3.28 वेदेष्वप्यनुश्रूयते समाप्तदक्षिणानां यज्ञानां अवभृथेषु सा ते गतिर्या शूराणाम् इति

10.3.29 अपि इह श्लोकौ भवतः

10.3.30ab यान् यज्ञसङ्घैः तपसा च विप्राः स्वर्ग एषिणः पात्रचयैश्च यान्ति ।

10.3.30chd क्षणेन तान् अप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः

10.3.31ab नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृत उत्तरीयम् ।

10.3.31chd तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् - इति

10.3.32 मन्त्रिपुरोहिताभ्यां उत्साहयेद् योधान् व्यूहसम्पदा

10.3.33 कार्तान्तिकादिश्चास्य वर्गः सर्वज्ञदैवतसम्योगख्यापनाभ्यां स्वपक्षं उद्धर्षयेत्, परपक्षं च उद्वेजयेत्

10.3.34 श्वो युद्धम् इति कृत उपवासः शस्त्रवाहनं चानुशयीत

10.3.35 अथर्वभिश्च जुहुयात्

10.3.36 विजययुक्ताः स्वर्गीयाश्चाशिषो वाचयेत्

10.3.37 ब्राह्मणेभ्यश्चात्मानं अतिसृजेत्

10.3.38 शौर्यशिल्पाभिजनानुरागयुक्तं अर्थमानाभ्यां अविसंवादितं अनीकगर्भं कुर्वीत

10.3.39 पितृपुत्रभ्रातृकाणां आयुधीयानां अध्वजं मुण्डानीकं राजस्थानम्

10.3.40 हस्ती रथो वा राजवाहनं अश्वानुबन्धः

10.3.41 यत् प्रायसैन्यो यत्र वा विनीतः स्यात् त्(अद्) अधिरोहयेत्

10.3.42 राजव्यञ्जनो व्यूहाधिष्ठानं आयोज्यः

10.3.43 सूतमागधाः शूराणां स्वर्गं अस्वर्गं भीरूणां जातिसङ्घकुलकर्मवृत्तस्तवं च योधानां वर्णयेयुः

10.3.44 पुरोहितपुरुषाः कृत्याभिचारं ब्रूयुः, यन्त्रिकवर्धकिमौहूर्तिकाः स्वकर्मसिद्धिं असिद्धिं परेषाम्

10.3.45 सेनापतिरर्थमानाभ्यां अभिसंस्कृतं अनीकं आभाषेत - शतसाहस्रो राजवधः, पञ्चाशत्साहस्रः सेनापतिकुमारवधः, दशसाहस्रः प्रवीरमुख्यवधः, पञ्चसाहस्रो हस्तिरथवधः, साहस्रोऽश्ववधः, शत्यः पत्तिमुख्यवधः, शिरो विंशतिकं भोगद्वैगुण्यं स्वयङ्ग्राहश्च इति

10.3.46 तद् एषां दशवर्गाधिपतयो विद्युः

10.3.47 चिकित्सकाः शस्त्रयन्त्रागदस्नेहवस्त्रहस्ताः स्त्रियश्चान्नपानरक्षिण्यः पुरुषाणां उद्धर्षणीयाः पृष्ठतः तिष्ठेयुः

10.3.48 अदक्षिणामुखं पृष्ठतःसूर्यं अनुलोमवातं अनीकं स्वभूमौ व्यूहेत

10.3.49 परभूमिव्यूहे चाश्वांश्चारयेयुः

10.3.50 यत्र स्थानं प्रजवश्चाभूमिर्व्यूहस्य तत्र स्थितः प्रजवितश्च उभयथा जीयेत विपर्यये जयति, उभयथा स्थाने प्रजवे च

10.3.52 समा विषमा व्यामिश्रा वा भूमिरिति पुरस्तात् पार्श्वाभ्यां पश्चाच्च ज्ञेया

10.3.53 समायां दण्डमण्डलव्यूहाः, विषमायां भोगासंहतव्यूहाः, व्यामिश्रायां विषमव्यूहाः

10.3.54 विशिष्टबलं भङ्क्त्वा सन्धिं याचेत

10.3.55 समबलेन याचितः सन्दधीत

10.3.56 हीनं अनुहन्यात्, न त्वेव स्वभूमिप्राप्तं त्यक्तात्मानं वा

10.3.57ab पुनर्ऽअवर्तमानस्य निराशस्य च जीविते ।

10.3.57chd अधार्यो जायते वेगः तस्माद् भग्नं न पीडयेत् (इति)

Chapt । युद्धभूमयः - पत्त्यऽश्वरथहस्तिकर्माणि

10.4.01 स्वभूमिः पत्त्यऽश्वरथद्विपानां इष्टा युद्धे निवेशे च

10.4.02 धान्वनवननिम्नस्थलयोधिनां खनकाकाशदिवारात्रियोधिनां च पुरुषाणां नादेयपार्वतानूपसारसानां च हस्तिनां अश्वानां च यथास्वं इष्टा युद्धभूमयः कालाश्च

10.4.03 समा स्थिराऽभिकाशा निरुत्खातिन्यचक्रखुराऽनक्षग्राहिण्यवृक्षगुल्मव्रततीस्तम्भकेदारश्वभ्रवल्मीकसिकतापङ्कभङ्गुरा दरणहीना च रथभूमिः, हस्त्यऽश्वयोर्मनुष्याणां च समे विषमे हिता युद्धे निवेशे च

10.4.04 अण्वऽश्मवृक्षा ह्रस्वलङ्घनीयश्वभ्रा मन्ददरणदोषा चाश्वभूमिः

10.4.05 स्थूलस्थाण्वश्मवृक्षव्रततीवल्मीकगुल्मा पदातिभूमिः

10.4.06 गम्यशैलनिम्नविषमा मर्दनीयवृक्षा छेदनीयव्रतती पङ्कभङ्गुरा दरणहीना च हस्तिभूमिः

10.4.07 अकण्टकिन्यबहुविषमा प्रत्यासारवती इति पदातीनां अतिशयः

10.4.08 द्विगुणप्रत्यासारा कर्दम उदकखञ्जनहीना निहशर्करा इति वाजिनां अतिशयः

10.4.09 पांसुकर्दम उदकनलशराधानवती श्वदण्ष्ट्रहीना महावृक्षशाखाघातवियुक्ता इति हस्तिनां अतिशयः

10.4.10 तोयाशयापाश्रयवती निरुत्खातिनी केदारहीना व्यावर्तनसमर्था इति रथानां अतिशयः

10.4.11 उक्ता सर्वेषां भूमिः

10.4.12 एतया सर्वबलनिवेशा युद्धानि च व्याख्यातानि भवन्ति

10.4.13 भूमिवासवनविचयोऽविषमतोयतीर्थवातरश्मिग्रहणं वीवधासारयोर्घातो रक्षा वा विशुद्धिः स्थापना च बलस्य प्रसारवृद्धिर्बाहु.उत्सारः पूर्वप्रहारो व्यावेशनं व्यावेधनं आश्वासो ग्रहणं मोक्षणं मार्गानुसारविनिमयः कोशकुमाराभिहरणं जघनकोट्यऽभिघातो हीनानुसारणं अनुयानं समाजकर्म इत्यश्वकर्माणि

10.4.14 पुरोयानं अकृतमार्गवासतीर्थकर्म बाहु.उत्सारः तोयतरणावतरणे स्थानगमनावतरणं विषमसम्बाधप्रवेशोऽग्निदानशमनं एकाङ्गविजयो भिन्नसन्धानं अभिन्नभेदनं व्यसने त्राणं अभिघातो विभीषिका त्रासनंऽउदार्यं ग्रहणं मोक्षणं सालद्वाराट्टालकभञ्जनं कोशवाहनापवाहनं इति हस्तिकर्माणि

10.4.15 स्वबलरक्षा चतुर्ऽङ्गबलप्रतिषेधः सङ्ग्रामे ग्रहणं मोक्षणं भिन्नसन्धानं अभिन्नभेदनं त्रासनं औदार्यं भीमघोषश्च इति रथकर्माणि

10.4.16 सर्वदेशकालशस्त्रवहनं व्यायामश्च इति पदातिकर्माणि

10.4.17 शिबिरमार्गसेतुकूपतीर्थशोधनकर्म यन्त्रायुधावरण उपकरणग्रासवहनं आयोधनाच्च प्रहरणावरणप्रतिविद्धापनयनं इति विष्टिकर्माणि

10.4.18ab कुर्याद् गवाश्वव्यायोगं रथेष्वल्पहयो नृपः ।

10.4.18chd खर उष्ट्रशकटानां वा गर्भं अल्पगजः तथा (इति)

Chapt । पक्षकक्ष उरस्यानां बलाग्रतो व्यूहविभागः - सारफल्गुबलविभागः - पत्त्यऽश्वरथहस्तियुद्धानि

10.5.01 पञ्चधनुःशतापकृष्टं दुर्गं अवस्थाप्य युद्धं उपेयात्, भूमिवशेन वा

10.5.02 विभक्तमुख्यां अचक्षुर्विषये मोक्षयित्वा सेनां सेनापतिनायकौ व्यूहेयाताम्

10.5.03 शमान्तरं पत्तिं स्थापयेत्, त्रिशमान्तरं अश्वं, पञ्चशमान्तरं रथं हस्तिनं वा

10.5.04 द्विगुणान्तरं त्रिगुणान्तरं वा व्यूहेत

10.5.05 एवं यथासुखं असम्बाधं युध्येत

10.5.06 पञ्चारत्नि धनुः

10.5.07 तस्मिन् धन्विनं स्थापयेत्, त्रिधनुष्यश्वं, पञ्चधनुषि रथं हस्तिनं वा

10.5.08 पञ्चधनुरनीकसन्धिः पक्षकक्ष उरस्यानाम्

10.5.09 अश्वस्य त्रयः पुरुषाः प्रतियोद्धारः

10.5.10 पञ्चदश रथस्य हस्तिनो वा, पञ्च चाश्वाः

10.5.11 तावन्तः पादगोपा वाजिरथद्विपानां विधेयाः

10.5.12 त्रीणि त्रिकाण्यनीकं रथानां उरस्यं स्थापयेत्, तावत् कक्षं पक्षं च उभयतः

10.5.13 पञ्चचत्वारिंशद् एवं रथा रथव्यूहे भवन्ति, द्वे शते पञ्चविंशतिश्चाश्वाः, षट्शतानि पञ्चसप्ततिश्च पुरुषाः प्रतियोधारः, तावन्तः पादगोपाः

10.5.14 एष समव्यूहः

10.5.15 तस्य द्विरथ उत्तरा वृद्धिरा एकविंशतिरथाद् इति

10.5.16 एवं ओजा दश समव्यूहप्रकृतयो भवन्ति

10.5.17 पक्षकक्ष उरस्यानां मिथो विषमसङ्ख्याने विषमव्यूहः

10.5.18 तस्यापि द्विरथ उत्तरा वृद्धिरा एकविंशतिरथाद् इति

10.5.19 एवं ओजा दश विषमव्यूहप्रकृतयो भवन्ति

10.5.20 अतः सैन्यानां व्यूहशेषं आवापः कार्यः

10.5.21 रथानां द्वौ त्रिभागावङ्गेष्वावापयेत्, शेषं उरस्यं स्थापयेत्

10.5.22 एवं त्रिभाग ऊनो रथानां आवापः कार्यः

10.5.23 तेन हस्तिनां अश्वानां आवापो व्याख्यातः

10.5.24 यावद्ऽश्वरथद्विपानां युद्धसम्बाधन्ं न कुर्यात् तावद् आवापः कार्यः

10.5.25 दण्डबाहुल्यं आवापः

10.5.26 पत्तिबाहुल्यं प्रत्यापावः

10.5.27 एकाङ्गबाहुल्यं अन्वावापः

10.5.28 दूष्यबाहुल्यं अत्यावापः

10.5.29 परावापात् प्रत्यावापाच्च चतुर्गुणाद् आऽष्टगुणाद् इति वा विभवतः सैन्यानां आवापः

10.5.30 रथव्यूहेन हस्तिव्यूहो व्याख्यातः

10.5.31 व्यामिश्रो वा हस्तिरथाश्वानां - चक्रान्तेषु हस्तिनः पार्श्वयोरश्वा रथा उरस्ये

10.5.32 हस्तिनां उरस्यं रथानां कक्षावश्वानां पक्षाविति मध्यभेदी

10.5.33 विपरीतोऽन्तभेदी

10.5.34 हस्तिनां एव तु शुद्धः - साम्नाह्यानां उरस्यं औपवाह्यानां जघनं व्यालानां कोट्याविति

10.5.35 अश्वव्यूहो - वर्मिणां उरस्यं शुद्धानां कक्षपक्षाविति

10.5.36 पत्तिव्यूहः - पुरस्ताद् आवरणिनः पृष्ठतो धन्विनः

10.5.37 इति शुद्धाः

10.5.38 पत्तयः पक्षयोरश्वाः पार्श्वयोः हस्तिनः पृष्ठतो रथाः पुरस्तात्, परव्यूहवशेन वा विपर्यासः

10.5.39 इति द्व्यऽङ्गबलविभागः

10.5.40 तेन त्र्ऽङ्गबलविभागो व्याख्यातः

10.5.41 दण्डसम्पत् सारबलं पुंसां

10.5.42 हस्त्यऽश्वयोर्विशेषः कुलं जातिः सत्त्वं वयःस्थता प्राणो वर्ष्म जवः तेजः शिल्पं स्तैर्यं उदग्रता विधेयत्वं सुव्यञ्जनाचारता इति

10.5.43 पत्त्यऽश्वरथद्विपानां सारत्रिभागं उरस्यं स्थापयेत्, द्वौ त्रिभागौ कक्षं पक्षं च उभयतः, अनुलोमं अनुसारं, प्रतिलोमं तृतीयसारं, फल्गु प्रतिलोमम्

10.5.44 एवं सर्वं उपयोगं गमयेत्

10.5.45 फल्गुबलं अन्तेष्ववधाय वेगाभिहूलिको भवति

10.5.46 सारबलं अग्रतः कृत्वा कोटीष्वनुसारं कुर्यात्, जघने तृतियियसारं, मध्ये फल्गुबलम्

10.5.47 एवं एतत् सहिष्णु भवति

10.5.48 व्यूहं तु स्थापयित्वा पक्षकक्ष उरस्यानां एकेन द्वाभ्यां वा प्रहरेत्, शेषैः प्रतिगृह्णीयात्

10.5.49 यत् परस्य दुर्बलं वीतहस्त्यऽश्वं दूष्यामात्यं कृत उपजापं वा तत्प्रभूतसारेणाभिहन्यात्

10.5.50 यद् वा परस्य सारिष्ठं तद्द्विगुणसारेणाभिहन्यात्

10.5.51 यद् अङ्गं अल्पसारं आत्मनः तद् बहुना उपचिनुयात्

10.5.52 यतः परस्यापचयः ततोऽभ्याशे व्यूहेत, यतोत् वा भयं स्यात्

10.5.53 अभिसृतं परिसृतं अतिसृतं अपसृतं उन्मथ्यावधानं वलयो गोमूत्रिका मण्डलं प्रकीर्णिका व्यावृत्तपृष्ठं अनुवंशं अग्रतः पार्श्वाभ्यां पृष्ठतो भग्नरक्षा भग्नानुपात इत्यश्वयुद्धानि

10.5.54 प्रकीर्णिकावर्जान्येतान्येव चतुर्णां अङ्गानां व्यस्तसमस्तानां वा घातः, पक्षकक्ष उरस्यानां च प्रभञ्जनं अवस्कन्दः सौप्तिकं च इति हसित्युद्धानि

10.5.55 उन्मथ्यावधानवर्जान्येतान्येव स्वभूमावभियानापयानस्थितयुद्धानि इति रथयुद्धानि

10.5.56 सर्वदेशकालप्रहरणं उपांशुदण्डश्च इति पत्तियुद्धानि

10.5.57ab एतेन विधिना व्यूहान् ओजान् युग्मांश्च कारयेत् ।

10.5.57chd विभवो यावद् अङ्गानां चतुर्णां सदृशो भवेत्

10.5.58ab द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे ।

10.5.58chd भिन्नसङ्घातनं तस्मान्न युध्येताप्रतिग्रहः (इति)

Chapt । दण्डभोगमण्डलासंहतव्यूहव्यूहनं - तस्य प्रतिव्यूहस्थानम्

10.6.01 पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः

10.6.02 पक्षौ कक्षावुरस्यं् प्रतिग्रह इति बार्हस्पत्यः

10.6.03 प्रपक्षकक्ष उरस्या उभयोः दण्डभोगमण्डलासंहताः प्रकृतिव्यूहाः

10.6.04 तत्र तिर्यग्वृत्तिर्दण्डः

10.6.05 समस्तानां अन्वावृत्तिर्भोगः

10.6.06 सरतां सर्वतोवृत्तिर्मण्डलः

10.6.07 स्थितानां पृथग्sनीकवृत्तिरसंहतः

10.6.08 पक्षकक्ष उरस्यैः समं वर्तमानो दण्डः

10.6.09 स कक्षातिक्रान्तः प्रदरः

10.6.10 स एव पक्षकक्षाभ्यां प्रतिक्रान्तो दृढकः

10.6.11 स एवातिक्रान्तः पक्षाभ्यां असह्यः

10.6.12 पक्षाववस्थाप्य उरस्यातिक्रान्तः श्येनः

10.6.13 विपर्यये चापं चापकुकुषिः प्रतिष्ठः सुप्रतिष्ठश्च

10.6.14 चापपक्षः सञ्जयः

10.6.15 स एव उरस्यातिक्रान्तो विजयः

10.6.16 स्थूलकर्णपक्षः स्थूणाकर्णः

10.6.17 द्विगुणपक्षस्थूणो विशालविजयः

10.6.18 त्र्यऽभिक्रान्तपक्षश्चमूमुखः

10.6.19 विपर्यये झषास्यः

10.6.20 ऊर्ध्वराजिर्दण्डः सूची

10.6.21 द्वौ दण्डौ वलयः

10.6.22 चत्वारो दुर्जयः

10.6.23 इति दण्डव्यूहाः

10.6.24 पक्षकक्ष उरस्यैर्विषमं वर्तमानो भोगः

10.6.25 स सर्पसारी गोमूत्रिका वा

10.6.26 स युग्म उरस्यो दण्डपक्षः शकटः

10.6.27 विपर्यये मकरः

10.6.28 हस्त्यऽश्वरथैर्व्यतिकीर्णः शकटः पारिपतन्तकः

10.6.29 इति भोगव्यूहाः

10.6.30 पक्षकक्ष उरस्यानां एकीभावे मण्डलः

10.6.31 स सर्वतोमुखः सर्वतोभद्रः

10.6.32 अष्टानीको दुर्जयः

10.6.33 इति मण्डलव्यूहाः

10.6.34 पक्षकक्ष उरस्यानां असंहताद् असंहतः

10.6.35 स पञ्चानीकानां आकृतिस्थापनाद् वज्रो गोधा वा

10.6.36 चतुर्णां उद्धानकः काकपदी वा

10.6.37 त्रयाणां अर्धचन्द्रकः कर्कटकशृङ्गी वा

10.6.38 इत्यसंहतव्यूहाः

10.6.39 रथ उरस्यो हस्तिकक्षोऽश्वपृष्ठोऽरिष्टः

10.6.40 पत्तयोऽश्वा रथा हस्तिनश्चानुपृष्ठं अचलः

10.6.41 हस्तिनोऽश्वा रथाः पत्तयश्चानुपृष्ठं अप्रतिहतः

10.6.42 तेषां प्रदरं दृढकेन घातयेत्, दृढकं असह्येन, श्येनं चापेन, प्रतिष्ठं सुप्रतिष्ठेन, सञ्जयं विजयेन, स्थूणाकर्णं विशालविजयेन, पारिपतन्तकं सर्वतोभद्रेण

10.6.43 दुर्जयेन सर्वान् प्रतिव्यूहेत

10.6.44 पत्त्यऽश्वरथद्विपानां पूर्वं पूर्वं उत्तरेण घातयेत्, हीनाङ्गं अधिकाङ्गेन च इति

10.6.45 अङ्गदशकस्य एकः पतिः पतिकः, पतिकदशकस्य एकः सेनापतिः, तद्दशकस्य एको नायक इति

10.6.46 स तूर्यघोषध्वजपताकाभिर्व्यूहाङ्गानां संज्ञाः स्थापयेद् अङ्गविभागे सङ्घाते स्थाने गमने व्यावर्तने प्रहरणे च

10.6.47 समे व्यूहे देशकालसारयोगात् सिद्धिः

10.6.48ab यन्त्रैरुपनिषद्योगैः तीक्ष्णैर्व्यासक्तघातिभिः ।

10.6.48chd मायाभिर्दैवसम्योगैः शकटैर्हस्तिभीषणैः

10.6.49ab दूष्यप्रकोपैर्गोयूथैः स्कन्धावारप्रदीपनैः ।

10.6.49chd कोटीजघनघातैर्वा दूतव्यञ्जनभेदनैः

10.6.50ab दुर्गं दग्धं हृतं वा ते कोपः कुल्यः समुत्थितः ।

10.6.50chd शत्रुराटविको वा इति परस्य उद्वेगं आचरेत्

10.6.51ab एकं हन्यान्न वा हन्याद् इषुः क्षिप्तो धनुष्मता ।

10.6.51chd प्रज्ञानेन तु मतिः क्षिप्ता हन्याद् गर्भगतान् अपि (इति)

Book |

Chapt | भेद उपादानानि - उपांशुदण्डाः

11.1.01 सङ्घलाभो दण्डमित्रलाभानां उत्तमः

11.1.02 सङ्घा हि संहतत्वाद् अधृष्याः परेषाम्

11.1.03 तान् अनुगुणान् भुञ्जीत सामदानाभ्यां, विगुणान् भेददण्डाभ्याम्

11.1.04 काम्बोजसुराष्ट्रक्षत्रियश्रेण्यऽअदयो वार्त्तशस्त्र उपजीविनः

11.1.05 लिच्छिविकवृजिकमल्लकमद्रककुकुरकुरुपाञ्चालादयो राजशब्द उपजीविनः

11.1.06 सर्वेषां आसन्नाः सत्त्रिणः सङ्घानां परस्परन्यङ्गद्वेषवैरकलहस्थानान्युपलभ्य क्रमाभिनीतं भेदं उपचारयेयुः असौ त्वा विजल्पति इति

11.1.07 एवं उभयतोबद्धरोषाणां विद्याशिल्पद्यूतवैहारिकेष्वाचार्यव्यञ्जना बालकलहान् उत्पादयेयुः

11.1.08 वेशशौण्डिकेषु वा प्रतिलोमप्रशंसाभिः सङ्घमुख्यमनुष्याणां तीक्ष्णाः कलहान् उत्पादयेयुः, कृत्यपक्ष उपग्रहेण वा

11.1.09 कुमारकान् विशिष्टच्छिन्दिकया हीनच्छिन्दिकान् उत्साहयेयुः

11.1.10 विशिष्टानां च एकपात्रं विवाहं वा हीनेभ्यो वारयेयुः

11.1.11 हीनान् वा विशिष्टैरेकपात्रे विवाहे वा योजयेयुः

11.1.12 अवहीनान् वा तुल्यभाव उपगमने कुलतः पौरुषतः स्थानविपर्यासतो वा

11.1.13 व्यवहारं अवस्थितं वा प्रतिलोमस्थापनेन निशामयेयुः

11.1.14 विवादपदेषु वा द्रव्यपशुमनुष्याभिघातेन रात्रौ तीक्ष्णाः कलहान् उत्पादयेयुः

11.1.15 सर्वेषु च कलहस्थानेषु हीनपक्षं राजा कोशदण्डाभ्यां उपगृह्य प्रतिपक्षवधे योजयेत्

11.1.16 भिन्नान् अपवाहयेद् वा

11.1.17 भूमौ च एषां पञ्चकुलीं दशकुलीं वा कृष्यायां निवेशयेत्

11.1.18 एकस्था हि शस्त्रग्रहणसमर्थाः स्युः

11.1.19 समवाये च एषां अत्ययं स्थापयेत्

11.1.20 राजशब्दिभिरवरुद्धं अवक्षिप्तं वा कुल्यं अभिजातं राजपुत्रत्वे स्थापयेत्

11.1.21 कार्तान्तिकादिश्चास्य वर्गो राजलक्षण्यतां सङ्घेषु प्रकाशयेत्

11.1.22 सङ्घमुख्यांश्च धर्मिष्ठान् उपजपेत् स्वधर्मं अमुष्य राज्ञः पुत्रे भ्रातरि वा प्रतिपद्यध्वम् इति

11.1.23 प्रतिपन्नेषु कृत्यपक्ष उपग्रहार्थं अर्थं दण्डं च प्रेषयेत्

11.1.24 विक्रमकाले शौण्डिकव्यञ्जनाः पुत्रदारप्रेतापदेशेन नैऽएचनिकम् इति मदनरसयुक्तान् मद्यकुम्भान्शतशः प्रयच्छेयुः

11.1.25 चैत्यदैवतद्वाररक्षास्थानेषु च सत्त्रिणः समयकर्मनिक्षेपं सहिरण्याभिज्ञानमुद्राणि हिरण्यभाजनानि च प्ररूपयेयुः

11.1.26 दृश्यमानेषु च सङ्घेषु राजकीयाः इत्यावेदयेयुः

11.1.27 अथावस्कन्दं दद्यात्

11.1.28 सङ्घानां वा वाहनहिरण्ये कालिके गृहीत्वा सङ्घमुख्याय प्रख्यातं द्रव्यं प्रयच्छेत्

11.1.29 तद् एषां याचिते दत्तं अमुष्मै मुख्याय इति ब्रूयात्

11.1.30 एतेन स्कन्धावाराटवीभेदो व्याख्यातः

11.1.31 सङ्घमुख्यपुत्रं आत्मसम्भावितं वा सत्त्री ग्राहयेत् अमुष्य राज्ञः पुत्रः त्वं, शत्रुभयाद् इह न्यस्तोऽसि इति

11.1.32 प्रतिपन्नं राजा कोशदण्डाभ्यां उपगृह्य सङ्घेषु विक्रमयेत्

11.1.33 अवासार्थः तं अपि प्रवासयेत्

11.1.34 बन्धकीपोषकाः प्लवकनटनर्तकसौभिका वा प्रणिहिताः स्त्रीभिः परमरूपयौवनाभिः सङ्घमुख्यान् उन्मादयेयुः

11.1.35 जातकामानां अन्यतमस्य प्रत्ययं कृत्वाऽन्यत्र गमनेन प्रसभहरणेन वा कलहान् उत्पादयेयुः

11.1.36 कलहे तीक्ष्णाः कर्म कुर्युः हतोऽयं इत्थं कामुकः इति

11.1.37 विसंवादितं वा मर्षयमाणं अभिसृत्य स्त्री ब्रूयात् असौ मां मुख्यः त्वयि जातकामां बाधते, तस्मिञ्जीवति न इह स्थास्यामि इति घातं अस्य प्रयोजयेत्

11.1.38 प्रसह्यापहृता वा वनान्ते क्रिडागृहे वाऽपहर्तारं रात्रौ तीक्ष्णेन घातयेत्, स्वयं वा रसेन

11.1.39 ततः प्रकाशयेत् अमुना मे प्रियो हतः इति

11.1.40 जातकामं वा सिद्धव्यञ्जनः सांवदनिकीभिरौषधीभिः संवास्य रसेनातिसन्धायापगच्छेत्

11.1.41 तस्मिन्न् अपक्रान्ते सत्त्रिणः परप्रयोगं अभिशंसेयुः

11.1.42 आढ्यविधवा गूढाजीवा योगस्त्रियो वा दायनिक्षेपार्थं विवदमानाः सङ्घमुख्यान् उन्मादयेयुः, अदितिकौशिकस्त्रियो नर्तकीगायना वा

11.1.43 प्रतिपन्नान् गूढवेश्मसु रात्रिसमागमप्रविष्टांः तीक्ष्णा हन्युर्बद्ध्वा हरेयुर्वा

11.1.44 सत्त्री वा स्त्रीलोलुपं सङ्घमुख्यं प्ररूपयेत् अमुष्मिन् ग्रामे दरिद्रकुल्लं अपसृतं, तस्य स्त्री राजार्हा, गृहाण एनाम् इति

11.1.45 गृहीतायां अर्धमासानन्तरं सिद्धव्यञ्जनो दूष्यसङ्घमुख्यमध्ये प्रक्रोशेत् असौ मे मुख्यो भार्यां स्नुषां भगिनीं दुहितरं वाऽधिचरति इति

11.1.46 तं चेत् सङ्घो निगृह्णीयात्, राजा एनं उपगृह्य विगुणेषु विक्रमयेत्

11.1.47 अनिगृहीते सिद्धव्यञ्जनं रात्रौ तीक्ष्णाः प्रवासयेयुः

11.1.48 ततः तद्व्यञ्जनाः प्रक्रोशेयुः असौ ब्रह्महा ब्राह्मणीजारश्च इति

11.1.49 कार्तान्तिकव्यञ्जनो वा कन्यां अन्येन वृतां अन्यस्य प्ररूपयेत् अमुष्य कन्या राजपत्नी राजप्रसविनी च भविष्यति, सर्वस्वेन प्रसह्य वा एनां लभस्व इति

11.1.50 अलभ्यमानायां परपक्षं उद्धर्षयेत्

11.1.51 लब्धायां सिद्धः कलहः

11.1.52 भिक्षुकी वा प्रियभार्यं मुख्यं ब्रूयात् असौ ते मुख्यो यौवन उत्सिक्तो भार्यायां मां प्राहिणोत्, तस्याहं भयाल्लेख्यं आभरणं गृहीत्वाऽऽगताऽस्मि, निर्दोषा ते भार्या, गूढं अस्मिन् प्रतिकर्तव्यं, अहं अपि तावत् प्रतिपत्स्यामि इति

11.1.53 एवंऽअदिषु कलहस्थानेषु स्वयं उत्पन्ने वा कलहे तीक्ष्णैरुत्पादिते वा हीनपक्षं राजा कोशदण्डाभ्यां उपगृह्य विगुणेषु विक्रमयेद् अपवाहयेद् वा

11.1.54 सङ्घेष्वेवं एकराजो वर्तेत

11.1.55 सङ्घाश्चाप्येवं एकराजाद् एतेभ्योऽतिसङ्घान् एभ्यो रक्षयेयुः

11.1.56ab सङ्घमुख्यश्च सङ्घेषु न्यायवृत्तिर्हितः प्रियः ।

11.1.56chd दान्तो युक्तजनः तिष्ठेत् सर्वचित्तानुवर्तकः (इति)

Book |

Chapt | दूतकर्म

12.1.01 बलीयसाऽभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्मा तिष्ठेत्

12.1.02 इन्द्रस्य हि स प्रणमति यो बलीयसो नमति इति भारद्वाजः

12.1.03 सर्वसन्दोहेन बलानां युध्येत

12.1.04 पराक्रमो हि व्यसनं अपहन्ति

12.1.05 स्वधर्मश्च एष क्षत्रियस्य, युद्धे जयः पराजयो वा इति विशालाक्षः

12.1.06 न इति कौटिल्यः

12.1.07 सर्वत्रानुप्रणतः कुलैडक इव निराशो जीविते वसति

12.1.08 युध्यमानश्चाल्पसैन्यः समुद्रं इवाप्लवोऽवगाहमानः सीदति

12.1.09 तद्विशिष्टं तु राजानं आश्रितो दुर्गं अविषह्यं वा चेष्टेत

12.1.10 त्रयोऽभियोक्तारो धर्मलोभासुरविजयिन इति

12.1.11 तेषां अभ्यवपत्त्या धर्मविजयी तुष्यति

12.1.12 तं अभ्यवपद्येत, परेषां अपि भयात्

12.1.13 भूमिद्रव्यहरणेन लोभविजयी तुष्यति

12.1.14 तं अर्थेनाभ्यवपद्येत

12.1.15 भूमिद्रव्यपुत्रदारप्राणहरणेनासुरविजयी

12.1.16 तं भूमिद्रव्याभ्यां उपगृह्याग्राह्यः प्रतिकुर्वीत

12.1.17 तेषां अन्यतमं उत्तिष्ठमानं सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा प्रतिव्यूहेत

12.1.18 शत्रुपक्षं अस्य सामदानाभ्यां, स्वपक्षं भेददण्डाभ्याम्

12.1.19 दुर्गं राष्ट्रं स्कन्धावारं वाऽस्य गूढाः शस्त्ररसाग्निभिः साधयेयुः

12.1.20 सर्वतः पार्ष्णिं अस्य ग्राहयेत्

12.1.21 अटवीभिर्वा राज्यं घातयेत्, तत्कुलीनापरुद्धाभ्यां वा हारयेत्

12.1.22 अपकारान्तेषु चास्य दूतं प्रेषयेत्

12.1.23 अनपकृत्य वा सन्धानम्

12.1.24 तथाऽप्यभिप्रयान्तं कोशदण्डयोः पाद उत्तरं अहोरात्र उत्तरं वा सन्धिं याचेत

12.1.25 स चेद् दण्डसन्धिं याचेत, कुण्ठं अस्मै हस्त्यश्वं दद्याद्, उत्साहितं वा गरयुक्तम्

12.1.26 पुरुषसन्धिं याचेत, दूष्यामित्राटवीबलं अस्मै दद्याद् योगपुरुषाधिष्ठितम्

12.1.27 तथा कुर्याद् यथा उभयविनाशः स्यात्

12.1.28 तीक्ष्णबलं वाऽस्मै दद्याद् यद् अवमानितं विकुर्वीत, मौलं अनुरक्तं वा यद् अस्य व्यसनेऽपकुर्यात्

12.1.29 कोशसन्धिं याचेत, सारं अस्मै दद्याद् यस्य क्रेतारं नाधिगच्छेत्, कुप्यं अयुद्धयोग्यं वा

12.1.30 भूमिसन्धिं याचेत, प्रत्यादेयां नित्यामित्रां अनपाश्रयां महाक्षयव्ययनिवेशां वाऽस्मै भूमिं दद्यात्

12.1.31 सर्वस्वेन वा राजधानीवर्जेन सन्धिं याचेत बलीयसः

12.1.32ab यत् प्रसह्य हरेद् अन्यः तत् प्रयच्चेद् उपायतः ।

12.1.32chd रक्षेत् स्वदेहं न धनं का ह्यनित्ये धने दया (इति)

Chapt । मन्त्रयुद्ध

12.2.01 स चेत् सन्धौ नावतिष्ठेत, ब्रूयाद् एनं - इमे शत्रुषड्वर्गवशगा राजानो विनष्टाः, तेषां अनात्मवतां नार्हसि मार्गं अनुगन्तुम्

12.2.02 धर्मं अर्थं चावेक्षस्व

12.2.03 मित्रमुखा ह्यमित्राः ते ये त्वा साहसं अधर्मं अर्थातिक्रमं च ग्राहयन्ति

12.2.04 शूरैः त्यक्तात्मभिः सह योद्धुं साहसं, जनक्षयं उभयतः कर्तुं अधर्मः, दृष्टं अर्थं मित्रं अदुष्टं च त्यक्तुं अर्थातिक्रमः

12.2.05 मित्रवांश्च स राजा, भूयश्च एतेनार्थेन मित्राण्युद्योजयिष्यति यानि त्वा सर्वतोऽभियास्यन्ति

12.2.06 न च मध्यम उदासीनयोर्मण्डलस्य वा परित्यक्तः, भवांः तु परित्यक्तः यत्त्वा समुद्युक्तं उपप्रेक्षन्ते भूयः क्षयव्ययाभ्यां युज्यतां, मित्राच्च भिद्यतां, अथ एनं परित्यक्तमूलं सुखेन उच्छेत्स्यामः इति

12.2.07 स भवान्नार्हति मित्रमुखानां अमित्राणां श्रोतुं, मित्राण्युद्वेजयितुं अमित्रांश्च श्रेयसा योक्तुं, प्राणसंशयं अनर्थं च उपगन्तुम् इति यच्छेत्

12.2.08 तथाऽपि प्रतिष्ठमानस्य प्रकृतिकोपं अस्य कारयेद् यथा सङ्घवृत्ते व्याख्यातं योगवामने च

12.2.09 तीक्ष्णरसदप्रयोगं च

12.2.10 यद् उक्तं आत्मरक्षितके रक्ष्यं तत्र तीक्ष्णान् रसदांश्च प्रयुञ्जीत

12.2.11 बन्धकीपोषकाः परमरूपयौवनाभिः स्त्रीभिः सेनामुख्यान् उन्मादयेयुः

12.2.12 बहूनां एकस्यां द्वयोर्वा मुख्ययोः कामे जाते तीक्ष्णाः कलहान् उत्पादयेयुः

12.2.13 कलहे पराजितपक्षं परत्रापगमने यात्रासाहाय्यदाने वा भर्तुर्योजयेयुः

12.2.14 कामवशान् वा सिद्धव्यञ्जनाः सांवदनिकीभिरोषधीभिरतिसन्धानाय मुख्येषु रसं दापयेयुः

12.2.15 वैदेहकव्यञ्जने वा राजमहिष्याः सुभगायाः प्रेष्यां आसन्नां कामनिमित्तं अर्थेनाभिवृष्य परित्यजेत्

12.2.16 तस्य एव परिचारकव्यञ्जन उपदिष्टः सिद्धव्यञ्जनः सांवदनिकीं ओषधीं दद्यात् वैदेहकशरीरेऽवघातव्या इति

12.2.17 सिद्धे सुभगाया अप्येनं योगं उपदिशेत् राजशरीरेऽवधातव्या इति

12.2.18 ततो रसेनातिसन्दध्यात्

12.2.19 कार्तान्तिकव्यञ्जनो वा महामात्रं राजलक्षणसम्पन्नम् क्रमाभिनीतं ब्रूयात्

12.2.20 भार्यां अस्य भिक्षुकी राजपत्नी राजप्रसविनी वा भविष्यसि इति

12.2.21 भार्याव्यञ्जना वा महामात्रं ब्रूयात् राजा किल मां अवरोधयिष्यति, तवान्तिकाय पत्त्रलेख्यं आभरणं च इदं परिव्राजिकयाऽऽहृतम् इति

12.2.22 सूदारालिकव्यञ्जनो वा रसप्रयोगार्थं राजवचनं अर्थं चास्य लोभनीयं अभिनयेत्

12.2.23 तद् अस्य वैदेहकव्यञ्जनः प्रतिसन्दध्यात्, कार्यसिद्धिं च ब्रूयात्

12.2.24 एवं एकेन द्वाभ्यां त्रिभिरित्युपायैरेक एकं अस्य महामात्रं विक्रमायापगमनाय वा योजयेत् - इति

12.2.25 दुर्गेषु चास्य शून्यपालासन्नाः सत्त्रिणः पौरजानपदेषु मैत्रीनिमित्तं आवेदयेयुः - शून्यपालेन उक्ता योधाश्चाधिकरणस्थाश्च कृच्छ्रगतो राजा जीवन्न् आगमिष्यति, न वा, प्रसह्य वित्तं आर्जयध्वं, अमित्रांश्च हत इति

12.2.26 बहुलीभूते तीक्ष्णाः पौरान्निशास्वाहारयेयुः, मुख्यांश्चाभिहन्युः एवं क्रियन्ते ये शून्यपालस्य न शुश्रूषन्ते इति

12.2.27 शून्यपालस्थानेषु च सशोणितानि शस्त्रवित्तबन्धनान्युत्सृजेयुः

12.2.28 ततः सत्त्रिणः शून्यपालो घातयति विलोपयति च इत्यावेदयेयुः

12.2.29 एवं जानपदान् समाहर्तुर्भेदयेयुः

12.2.30 समाहर्तृपुरुषांः तु ग्राममध्येषु रात्रौ तीक्ष्णा हत्वा ब्रूयुः एवं क्रियन्ते ये जनपदं अधर्मेण बाधन्ते इति

12.2.31 समुत्पन्ने दोषे शून्यपालं समाहर्तारं वा प्रकृतिकोपेन घातयेयुः

12.2.32 तत्कुलीनं अपरुद्धं वा प्रतिपादयेयुः

12.2.33ab अन्तःपुरपुरद्वारं द्रव्यधान्यपरिग्रहान् ।

12.2.33chd दहेयुः तांश्च हन्युर्वा ब्रूयुरस्यार्तवादिनः (इति)

Chapt । सेनामुख्यवधह्<द्वितीयो भागह्> - मण्डलप्रोत्साहनम्

12.3.01 राज्ञो राजवल्लभानां चासन्नाः सत्त्रिणः पत्त्यऽश्वरथद्विपमुख्यानां राजा क्रुद्धः इति सुहृद्विश्वासेन मित्रस्थानीयेषु कथयेयुः

12.3.02 बहुलीभूते तीक्ष्णाः कृतरात्रिचारप्रतीकारा गृहेषु स्वामिवचनेनागम्यताम् इति ब्रूयुः

12.3.03 तान्निर्गच्छत एवाभिहन्युः, स्वामिसन्देशः इति चासन्नान् ब्रूयुः

12.3.04 ये चाप्रवासिताः तान् सत्त्रिणो ब्रूयुः एतत् तद् यद् अस्माभिः कथितं, जीवितुकामेनापक्रान्तव्यम् इति

12.3.05 येभ्यश्च राजा याचितो न ददाति तान् सत्त्रिणो ब्रूयुः - उक्तः शून्यपालो राज्ञा अयाच्यं अर्थं असौ चासौ च मा याचते, मया प्रत्याख्याताः शत्रुसंहिताः, तेषां उद्धरणे प्रयतस्व इति

12.3.06 ततः पूर्ववद् आचरेत्

12.3.07 येभ्यश्च राजा याचितो ददाति तान् सत्त्रिणो ब्रूयुः - उक्तः शून्यपालो राज्ञा अयाच्यं अर्थं असौ चासौ च मा याचते, तेभ्यो मया सोऽर्थो विश्वासार्थं दत्तः, शत्रुसंहिताः, तेषां उद्धरणे प्रयतस्व इति

12.3.08 ततः पूर्ववद् आचरेत्

12.3.09 ये च एनं याच्यं अर्थं न याचन्ते तान् सत्त्रिणो ब्रूयुः - उक्तः शून्यपालो राज्ञा याच्यं अर्थं असौ चासौ च मा न याचते, किं अन्यत् स्वदोषशङ्कितत्वात्, तेषां उद्धरणे प्रयतस्व इति

12.3.10 ततः पूर्ववद् आचरेत्

12.3.11 एतेन सर्वः कृत्यपक्षो व्याख्यातः

12.3.12 प्रत्यासन्नो वा राजानं सत्त्री ग्राहयेत् असौ चासौ च ते महामात्रः शत्रुपुरुषैः सम्भाषते इति

12.3.13 प्रतिपन्ने दूष्यान् अस्य शासनहरान् दर्शयेत् एतत् तत् इति

12.3.14 सेनामुख्यप्रकृतिपुरुषान् वा भूम्या हिरण्येन वा लोभयित्वा स्वेषु विक्रमयेद् अपवाहयेद् वा

12.3.15 योऽस्य पुत्रः समीपे दुर्गे वा प्रतिवसति तं सत्त्रिणा उपजापयेत् आत्मसम्पन्नतरः त्वं पुत्रः, तथाऽप्यन्तर्हितः, तत्किं उपेक्षसे विक्रम्य गृहाण, पुरा त्वा युवराजो विनाशयति इति

12.3.16 तत्कुलीनं अपरुद्धं वा हिरण्येन प्रतिलोभ्य ब्रूयात् अन्तर्बलं प्रत्यन्तस्कन्धं अन्तं वाऽस्य प्रमृद्नीहि इति

12.3.17 आटविकान् अर्थमानाभ्यां उपगृह्य राज्यं अस्य घातयेत्

12.3.18 पार्ष्णिग्राहं वाऽस्य ब्रूयात् एष खलु राजा मां उच्छिद्य त्वां उच्छेत्स्यति, पार्ष्णिं अस्य गृहाण, त्वयि निवृत्तस्याहं पार्ष्णिं ग्रहीष्यामि इति

12.3.19 मित्राणि वाऽस्य ब्रूयात् अहं वः सेतुः, मयि विभिन्ने सर्वान् एष वो राजा प्लावयिष्यति, सम्भूय वाऽस्य यात्रां विहनाम इति

12.3.20 तत्संहतानां असंहतानां च प्रेषयेत् एष खलु राजा मां उत्पाट्य भवत्सु कर्म करिष्यति, बुध्यध्वं, अहं वः श्रेयान् अभ्युपपत्तुम् इति

12.3.21ab मध्यमस्य प्रहिणुयाद् उदासीनस्य वा पुनः ।

12.3.21chd यथाऽऽसन्नस्य मोक्षार्थं सर्वस्वेन तद्ऽर्पणम् (इति)

Chapt । शस्त्राग्निरसप्रणिधयः - वीवधासारप्रसारवधः

12.4.01 ये चास्य दुर्गेषु वैदेहकव्यञ्जनाः, ग्रामेसु गृहपतिकव्यञ्जनाः, जनपदसन्धिषु गोरक्षकतापसव्यञ्जनाः, ते सामन्ताटविकतत्कुलीनापरुद्धानां पण्यागारपूर्वं प्रेषयेयुः अयं देशो हार्यः इति

12.4.02 आगतांश्च एषां दुर्गे गूढपुरुषान् अर्थमानाभ्यां अभिसत्कृत्य प्रकृतिच्छिद्राणि प्रदर्शयेयुः

12.4.03 तेषु तैः सह प्रहरेयुः

12.4.04 स्कन्धावारे वाऽस्य शौण्डिकव्यञ्जनः पुत्रं अभित्यक्तं स्थापयित्वाऽवस्कन्दकाले रसेन प्रवासयित्वा नैऽएचनिकम् इति मदनरसयुक्तान् मद्यकुम्भान्शतशः प्रयच्छेत्

12.4.05 शुद्धं वा मद्यं पाद्यं वा मद्यं दद्याद् एकं अहः, उत्तरं रस्सिद्धं प्रयच्छेत्

12.4.06 शुद्धं वा मद्यं दण्डमुख्येभ्यः प्रदाय मदकाले रससिद्धं प्रयच्छेत्

12.4.07 दण्डमुख्यव्यञ्जनो वा पुत्रं अभित्यक्तं इति समानम्

12.4.08 पाक्वमांसिकाऽदनिकाऽण्डिकापूपिकव्यञ्जना वा पण्यविशेषं अवघोषयित्वा परस्परसङ्घर्षेण कालिकं समर्घतरं इति वा परान् आहूय रसेन स्वपण्यान्यपचारयेयुः

12.4.09 सुराक्षीरदधिसर्पिस्तैलानि वा तद्व्यवहर्तृहस्तेषु गृहीता स्त्रियो बालाश्च रसयुक्तेषु स्वभाजनेषु परिकिरेयुः

12.4.10 अनेनार्घेण, विशिष्टं वा भूयो दीयताम् इति तत्र एवावाकिरेयुः

12.4.11 एतान्येव वैदेहकव्यञ्जनाः, पण्यविरेयेणाहर्तारो वा

12.4.12 हस्त्यऽश्वानां विधायवसेषु रसं आसन्ना दद्युः

12.4.13 कर्मकरव्यञ्जना वा रसाक्तं यवसं उदकं वा विक्रीणीरन्

12.4.14 चिरसंसृष्टा वा गोवाणिजका गवां अजावीनां वा यूथान्यवस्कन्दकालेषु परेषां मोहस्थानेषु प्रमुञ्चेयुः, अश्वखर उष्ट्रमहिषादीनां दुष्टांश्च

12.4.15 तद्व्यञ्जना वा चुच्छुन्दरीशोणिताक्ताक्षान्

12.4.16 लुब्धकव्यञ्जना वा व्यालमृगान् पञ्जरेभ्यः प्रमुञ्चेयुः, सर्पग्राहा वा सर्पान् उग्रविषान्, हस्तिजीविनो वा हस्तिनः

12.4.17 अग्निजीविनो वाऽग्निं अवसृजेयुः

12.4.18 गूढपुरुषा वा विमुखान् पत्त्यऽश्वरथद्विपमुख्यान् अभिहन्युः, आदीपयेयुर्वा मुख्यावासान्

12.4.19 दूष्यामित्राटविकव्यञ्जनाः प्रणिहिताः पृष्ठाभिघातं अवस्कन्दप्रतिग्रहं वा कुर्युः

12.4.20 वनगूढा वा प्रत्यन्तस्कन्धं उपनिष्कृष्याभिहन्युः, एकायने वीवधासारप्रसारान् वा

12.4.21 ससङ्केतं वा रात्रियुद्धे भूरितूर्यं आहत्य ब्रूयुः अनुप्रविष्टाः स्मो, लब्धं राज्यम् इति

12.4.22 राजावासं अनुप्रविष्टा वा सङ्कुलेषु राजानं हन्युः

12.4.23 सर्वतो वा प्रयातं एन(? एव?) म्लेच्छाटविकदण्टचारिणः सत्त्रापाश्रयाः स्तम्भवाटापाश्रया वा हन्युः

12.4.24 लुब्धकव्यञ्जना वाऽवस्कन्दसङ्कुलेषु गूढयुद्धहेतुभिरभिहन्युः

12.4.25 एकायने वा शैलस्तम्भवाटखञ्जनान्तर्.उदके वा स्वभूमिबलेनाभिहन्युः

12.4.26 नदीसरस्तटाकसेतुबन्धभेदवेगेन वा प्लावयेयुः

12.4.27 धान्वनवनदुर्गनिम्नदुर्गस्थं वा योगाग्निधूमाभ्यां नाशयेयुः

12.4.28 सङ्कटगतं अग्निना, धान्वनगतं धूमेन, निधानगतं रसेन, तोयावगाढं दुष्टग्राहैरुदकचरणैर्वा तीक्ष्णाः साधयेयुः, आदीप्तावासान्निष्पतन्तं वा

12.4.29ab योगवामनयोगाभ्यां योगेनान्यतमेन वा |

12.4.29chd अमित्रं अतिसन्दध्यात् सक्तं उक्तासु भूमिषु (इति)

Chapt | योगातिसंधानं - दण्डातिसंधानं - एकविजयः

12.5.01 दैवतेज्यायाम्(देवता इज्यायाम्?) यात्रायां अमित्रस्य बहूनि पूजाऽऽगमस्थानानि भक्तितः

12.5.02 तत्रास्य योगं उब्जयेत्

12.5.03 देवतागृहप्रविष्टस्य उपरि यन्त्रमोक्षणेन गूढभित्तिं शिलां वा पातयेत्

12.5.04 शिलाशस्त्रवर्षं उत्तमागारात्, कपाटं अवपातितं वा, भित्तिप्रणिहितं एकदेशबद्धं वा परिघं मोक्षयेत्

12.5.05 देवतादेहध्वजप्रहरणानि वाऽस्य उपरिष्टात् पातयेत्

12.5.06 स्थानासनगमनभूमिषु वाऽस्य गोमयप्रदेहेन गन्ध उदकप्रसेकेन वा रसं अतिचारयेत्, पुष्पचूर्ण उपहारेण वा

12.5.07 गन्धप्रतिच्छन्नं वाऽस्य तीक्ष्णं धूमं अतिनयेत्

12.5.08 शूलकूपं अवपातनं वा शयनासनस्याधस्ताद् यन्त्रबद्धतलं एनं कीलमोक्षणेन प्रवेशयेत्

12.5.09 प्रत्यासन्ने वाऽमित्रे जनपदाज् जनं अवरोधक्षमं अतिनयेत्

12.5.10 दुर्गाच्चानवरोधक्षमं अपनयेत्, प्रत्यादेयं अरिविषयं वा प्रेषयेत्

12.5.11 जनपदं च एकस्थं शैलवननदीदुर्गेष्वटवीव्यवहितेषु वा पुत्रभ्रातृपरिगृहीतं स्थापयेत्

12.5.12 उपरोधहेतवो दण्ड उपनतवृत्ते व्याख्याताः

12.5.13 तृणकाष्ठं आयोजनाद् दाहयेत्

12.5.14 उदकानि च दूषयेत्, अवस्रावयेच्च

12.5.15 कूपकूटावपातकण्टकिनीश्च बहिरुब्जयेत्

12.5.16 सुरुङ्गां अमित्रस्थाने बहुमुखीं कृत्वा निचयमुख्यान् अभिहारयेत्, अमित्रं वा

12.5.17 परप्रयुक्तायां वा सुरुङ्गायां परिखां उदकान्तिकीं खानयेत्, कूपशालां अनुसालं वा

12.5.18 तोयकुम्भान् कांस्यभाण्डानि वा शङ्कास्थानेषु स्थापयेत् खाताभिज्ञानार्थम्

12.5.19 ज्ञाते सुरुङ्गापथे प्रतिसुरुङ्गां कारयेत्

12.5.20 मध्ये भित्त्वा धूमं उदकं वा प्रयच्छेत्

12.5.21 प्रतिविहितदुर्गो वा मूले दायाद्<अम्> कृत्वा प्रतिलोमां अस्य दिशं गच्छेत्, यतो वा मित्रैर्बन्धुभिराटविकैर्वा संसृज्येत परस्यामित्रैर्दूष्यैर्वा महद्भिः, यतो वा गतोऽस्य मित्रैर्वियोगं कुर्यात् पार्ष्णिं वा गृह्णीयात् राज्यं वाऽस्य हारयेत् वीवधासारप्रसारान् वा वारयेत्, यतो वा शक्नुयाद् आक्षिकवद् अपक्षेपेणास्य प्रहर्तुं, यतो वा स्वं राज्यं त्रायेत मूलस्य उपचयं वा कुर्यात्

12.5.22 यतः सन्धिं अभिप्रेतं लभेत ततो वा गच्छेत्

12.5.23 सहप्रस्थायिनो वाऽस्य प्रेषयेयुः अयं ते शत्रुरस्माकं हस्तगतः, पण्यं विप्रकारं वाऽपदिश्य हिरण्यं अन्तःसारबलं च प्रेषय यस्य एनं अर्पयेम बद्धं प्रवासितं वा इति

12.5.24 प्रतिपन्ने हिरण्यं सारबलं चाददीत

12.5.25 अन्तपालो वा दुर्गसम्प्रदाने बल एकदेशं अतिनीय विश्वस्तं घातयेत्

12.5.26 जनपदं एकस्थं वा घातयितुं अमित्रानीकं आवाहयेत्

12.5.27 तद् अवरुद्धदेशं अतिनीय विश्वस्तं घातयेत्

12.5.28 मित्रव्यञ्जनो वा बाह्यस्य प्रेषयेत् क्षीणं अस्मिन् दुर्गे धान्यं स्नेहाः क्षारो लवणं वा, तद् अमुष्मिन् देशे काले च प्रवेक्ष्यति, तद् उपगृह्णाण इति

12.5.29 ततो रसविद्धं धान्यं स्नेहं क्षारं लवणं वा दूष्यामित्राटविकाः प्रवेशयेयुः, अन्ये वाऽभित्यक्ताः

12.5.30 तेन सर्वभाण्डवीवधग्रहणं व्याख्यातम्

12.5.31 सन्धिं वा कृत्वा हिरण्य एकदेशं अस्मै दद्यात्, विलम्बमानः शेषम्

12.5.32 ततो रक्षाविधानान्यवस्रावयेत्

12.5.33 अग्निरसशस्त्रैर्वा प्रहरेत्

12.5.34 हिरण्यप्रतिग्राहिणो वाऽस्य वल्लभान् अनुगृह्णीयात्

12.5.35 परिक्षीणो वाऽस्मै दुर्गं दत्त्वा निर्गच्छेत्

12.5.36 सुरुङ्गया कुक्षिप्रदरेण वा प्राकारभेदेन निर्गच्छेत्

12.5.37 रात्रावस्कन्दं दत्त्वा सिद्धः तिष्ठेत्, असिद्धः पार्श्वेनापगच्छेत्

12.5.38 पाषण्डच्छद्मना मन्दपरिवारो निर्गच्छेत्

12.5.39 प्रेतव्यञ्जनो वा गूढैर्निह्नियेत

12.5.40 स्त्रीवेषधारी वा प्रेतं अनुगच्छेत्

12.5.41 दैवत उपहारश्राद्धप्रहवणेषु वा रसविद्धं अन्नपानं अवसृज्य

12.5.42 कृत उपजापो दूष्यव्यञ्जनैर्निष्पत्य गूढसैन्योऽभिहन्यात्

12.5.43 एवं गृहीतदुर्गो वा प्राश्यप्राशं चैत्यं उपस्थाप्य दैवतप्रतिमाच्छिद्रं प्रविश्यासीत, गूढभित्तिं वा, दैवतप्रतिमायुक्तं वा भूमिगृहम्

12.5.44 विस्मृते सुरुङ्गया रात्रौ राजावासं अनुप्रविश्य सुप्तं अमित्रं हन्यात्

12.5.45 यन्त्रविश्लेषणं वा विश्लेष्याधस्ताद् अवपातयेत्

12.5.46 रसाग्नियोगेनावलिप्तं गृहं जतुगृहं वाऽधिशयानं अमित्रं आदीपयेत्

12.5.47 प्रमदवनविहाराणां अन्यतमे वा विहारस्थाने प्रमत्तं भूमिगृहसुरुङ्गागूढभित्तिप्रविष्टाः तीक्ष्णा हन्युः, गूढप्रणिहिता वा रसेन

12.5.48 स्वपतो वा निरुद्धे देशे गूढाः स्त्रियः सर्परसाग्निधूमान् उपरि मुञ्चेयुः

12.5.49 प्रत्युत्पन्ने वा कारणे यद् यद् उपपद्येत तत् तद् अमित्रेऽन्तःपुरगते गूढसञ्चारः प्रयुञ्जीत

12.5.50 ततो गूढं एवापगच्छेत्, स्वजनसंज्ञां च प्ररूपयेत्

12.5.51ab द्वाह्स्थान् वर्षधरांश्चान्यान्निगूढ उपहितान् परे ।

12.5.51chd तूर्यसंज्ञाभिराहूय द्विषत्शेषाणि घातयेत् (इति)

Book |

Chapt | उपजापः

13.1.01 विजिगीषुः परग्रामं अवासुकामः सर्वज्ञदैवतसम्योगख्यापनाभ्यां स्वपक्षं उद्धर्षयेत्, परपक्षं च उद्वेजयेत्

13.1.02 सर्वज्ञख्यापनं तु - गूहगुह्यप्रवृत्तिज्ञानेन प्रत्यादेशो मुख्यानां, कण्टकशोधनापसर्पावगमेन प्रकाशनं राजद्विष्टकारिणां, विज्ञाप्य उपायनख्यापनं अदृष्टसंसर्गविद्यासंज्ञाऽऽदिभिः, विदेशप्रवृत्तिज्ञानं तद् अहरेव गृहकपोतेन मुद्रासम्युक्तेन

13.1.03 दैवतसम्योगख्यापनं तु - सुरुङ्गामुखेनाग्निचैत्यदैवतप्रतिमाच्छिद्रान् अनुप्रविष्टैरग्निचैत्यदैवतव्यञ्जनैः सम्भाषणं पूजनं च, उदकाद् उत्थितैर्वा नागवरुणव्यञ्जनैः सम्भाषणं पूजनं च, रात्रावन्तर्.उदके समुद्रवालुकाकोशं प्रणिधायाग्निमालादर्शनं, शिलाशिक्यावगृहीते प्लवके स्थानं, उदकबस्तिना जरायुणा वा शिरोऽवगूढनासः पृषतान्त्रकुलीरनक्रशिंशुमार उद्रवसाभिर्वा शतपाक्यं तैलं नस्तः प्रयोगः

13.1.04 तेन रात्रिगणश्चरति

13.1.05 इत्युदकचरणानि

13.1.06 तैर्वरुणनागकन्यावाक्यक्रिया सम्भाषणं च, कोपस्थानेषु मुखाद् अग्निधूम उत्सर्गः

13.1.07 तद् अस्य स्वविषये कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिक इक्षणिकगूढपुरुषाः साचिव्यकराः तद्दर्शिनश्च प्रकाशयेयुः

13.1.08 परस्य विषये दैवतदर्शनं दिव्यकोशदण्ड उत्पत्तिं चास्य ब्रूयुः

13.1.09 दैवतप्रश्ननिमित्तवायसाङ्गविद्यास्वप्नमृगपक्षिव्याहारेषु चास्य विजयं ब्रूयुः, विपरीतं अमित्रस्य

13.1.10 सदुन्दुभिं उल्कां च परस्य नक्षत्रे दर्शयेयुः

13.1.11 परस्य मुख्यान् मित्रत्वेन उपदिशन्तो दूतव्यञ्जनाः स्वामिसत्कारं ब्रूयुः, स्वपक्षबलाधानं परपक्षप्रतिघातं च

13.1.12 तुल्ययोगक्षेमं अमात्यानां आयुधीयानां च कथयेयुः

13.1.13 तेषु व्यसनाभ्युदयावेक्षणं अपत्यपूजनं च प्रयुञ्जीत

13.1.14 तेन परपक्षं उत्साहयेद् यथा उक्तं पुरस्तात्

13.1.15 भूयश्च वक्ष्यामः

13.1.16 साधारणगर्दभेन दक्षान्, लकुटशाखाहननाभ्यां दण्डचारिणः, कुल एडकेन च उद्विग्नान्, अशनिवर्षेण विमानितान्, विदुलेनावकेशिना वायसपिण्डेन कैतवजमेघेन इति विहताशान् दुर्भगालङ्कारेण द्वेषिणा इति पूजाफलान्, व्याघ्रचर्मणा मृत्युकूटेन च उपहितान्, पीलुविखादनेन करकयोष्ट्रया गर्दभीक्षीराऽभिमन्थनेन इति ध्रुव उपकारिण इति

13.1.17 प्रतिपन्नान् अर्थमानाभ्यां योजयेत्

13.1.18 द्रव्यभक्तच्छिद्रेषु च एनान् द्रव्यभक्तदानैरनुगृह्णीयात्

13.1.19 अप्रतिगृह्णतां स्त्रीकुमारालङ्कारान् अभिहरेयुः

13.1.20 दुर्भिक्षस्तेनाटव्य्.उपघातेषु च पौरजानपदान् उत्साहयन्तः सत्त्रिणो ब्रूयुः राजानं अनुग्रहं याचामहे निरनुग्रहाः परत्र गच्छामः इति

13.1.21ab तथा इति प्रतिपन्नेषु द्रव्यधान्यान्यपरिग्रहैः ।

13.1.21chd साचिव्यं कार्यं इत्येतद् उपजापाद् भूतं महत् (इति)

Chapt । योगवामनम्

13.2.01 मुण्डो जटिलो वा पर्वतगुहावासी चतुर्वर्षशतायुर्ब्रुवाणः प्रभूतजटिलान्तेवासी नगराभ्याशे तिष्ठेत्

13.2.02 शिष्याश्चास्य मूलफल उपगमनैरमात्यान् राजानं च भगवद्दर्शनाय योजयेयुः

13.2.03 समागताश्च राज्ञा पूर्वराजदेशाभिज्ञानानि कथयेत्, शते शते च वर्षाणां पूर्णोऽहं अग्निं प्रविश्य पुनर्बालो भवामि, तद् इह भवत् समीपे चतुर्थं अग्निं प्रवेक्ष्यामि, अवश्यं मे भवान् मानयितव्यः, त्रीन् वरान् वृणीष्ण(वृषीष्व) इति

13.2.04 प्रतिपन्नं ब्रूयात् ससरात्रं इह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यम् इति

13.2.05 वसन्तं अवस्कन्देत

13.2.06 मुण्डो वा जटिलो वा स्थानिकव्यञ्जनः प्रभूतजटिलान्तेवासी वस्तशोणितदिग्धां वेणुशलाकां सुवर्णचूर्णेनावलिप्य वल्मीके निदध्याद् उपजिह्विकानुसरणार्थं, स्वर्णनालिकां वा

13.2.07 ततः सत्त्री राज्ञः कथयेत् असौ सिद्धः पुष्पितं निधिं जानाति इति

13.2.08 स राज्ञा पृष्ठः तथा इति ब्रूयात्, तच्चाभिज्ञानं दर्शयेत्, भूयो वा हिरण्यं अन्तर्ऽअधाय

13.2.09 ब्रूयाच्च एनं नागरक्षितोऽयं निधिः प्रणिपातसाध्यः इति

13.2.10 प्रतिपन्नं ब्रूयात् सप्तरात्रम् इति समानम्

13.2.11 स्थानिकव्यञ्जनं वा रात्रौ तेजनाग्नियुक्तं एकान्ते तिष्ठन्तं सत्त्रिणः क्रमाभीनीतं राज्ञः कथयेयुः असौ सिद्धः सामेधिकः इति

13.2.12 तं राजा यं अर्थं याचेत तं अस्य करिष्यमाणः सप्तरात्रम् इति समानम्

13.2.13 सिद्धव्यञ्जनो वा राजानं जम्भकविद्याभिः प्रलोभयेत्

13.2.14 तं राजा इति समानम्

13.2.15 सिद्धव्यञ्जनो वा देशदेवतां अभ्यर्हितां आश्रित्य प्रहवणैरभीक्ष्णं प्रकृतिमुख्यान् अभिसंवास्य क्रमेण राजानं अतिसन्दध्यात्

13.2.16 जटिलव्यञ्जनं अन्तर्.ऽदकवासिनं वा सर्वश्वेतं तटसुरुङ्गाभूमिगृहापसरणं वरुणं नागराजं वा सत्त्रिणः क्रमाभिनीतं राज्ञः कथयेयुः

13.2.17 तं राजा इति समानम्

13.2.18 जनपदान्तेवासी सिद्धव्यञ्जनो वा राजानं शत्रुदर्शनाय योजयेत्

13.2.19 प्रतिपन्नं बिम्बं कृत्वा शत्रुं आवाहयित्वा निरुद्धे देशे घातयेत्

13.2.20 अश्वपण्य ऽपयाता वैदेहकव्यञ्जनाः पण्य ऽपायननिमित्तं आहूय राजानं पण्यपरीक्षायां आसक्तं अश्वव्यतिकीर्णं वा हन्युः, अश्वैश्च प्रहरेयुः

13.2.21 नगराभ्याशे वा चैत्यं आरुह्य रात्रौ तीक्ष्णाः कुम्भेषु नालीन् वा विदुलानि धमन्तः स्वामिनो मुख्यानां वा मांसानि भक्षयिष्यामः, पूजा नो वर्तताम् इत्यव्यक्तं ब्रूयुः

13.2.22 तद् एषां नैमित्तिकमौहूर्तिकव्यञ्जनाः ख्यापयेयुः

13.2.23 मङ्गल्ये वा ह्रदे तटाकमध्ये वा रात्रौ तेजनतैलाभ्यक्ता नागरूपिणः शक्तिमुसलान्ययोमयानि निष्पेषयन्तः तथैव ब्रूयुः

13.2.24 ऋक्षचर्मकञ्चुकिनो वाऽग्निधूम उत्सर्गयुक्ता रक्षोरूपं वहन्तः त्रिरपसव्यं नगरं कुर्वाणाः श्वसृगालवाशितान्तरेषु तथैव ब्रूयुः

13.2.25 चैत्यदैवतप्रतिमां वा तेजनतैलेनाभ्रपटलच्छन्नेनाग्निना वा रात्रौ प्रज्वाल्य तथैव ब्रूयुः

13.2.26 तद् अन्ये ख्यापयेयुः

13.2.27 दैवतप्रतिमानां अभ्यर्हितानां वा शोणितेन प्रस्रावं अतिमात्रं कुर्युः

13.2.28 तद् अन्ये देवरुधिरसंस्रावे सङ्ग्रामे पराजयं ब्रूयुः

13.2.29 सन्धिरात्रिषु श्मशानप्रमुखे वा चैत्यं ऊर्ध्वभक्षितैर्मनुष्यैः प्ररूपयेयुः

13.2.30 ततो रक्षोरूपी मनुष्यकं याचेत

13.2.31 यश्चात्र शूरवादिकोऽन्यतमो वा द्रष्टुं आगच्छेत् तं अन्ये लोहमुसलैर्हन्युः, यथा रक्षोभिर्हत इति ज्ञायेत

13.2.32 तद् अद्भुतं राज्ञः तद्दर्शिनः सत्त्रिणश्च कथयेयुः

13.2.33 ततो नैमित्तिकमौहूर्तिकव्यञ्जनाः शान्तिं प्रायश्चित्तं ब्रूयुः अन्यथा महद् अकुशलं राज्ञो देशस्य च इति

13.2.34 प्रतिपन्नं एतेषु सप्तरात्रं एक एकमन्त्रबलिहोमं स्वयं राज्ञा कर्तव्यम् इति ब्रूयुः

13.2.35 ततः समानम्

13.2.36 एतान् वा योगान् आत्मनि दर्शयित्वा प्रतिकुर्वीत परेषां उपदेशार्थम्

13.2.37 ततः प्रयोजयेद् योगान्

13.2.38 योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्

13.2.39 हस्तिकामं वा नागवनपाला हस्तिना लक्षण्येन प्रलोभयेयुः

13.2.40 प्रतिपन्नं गहनं एकायनं वाऽतिनीय घातयेयुः, बद्ध्वा वाऽपहरेयुः

13.2.41 तेन मृगयाकामो व्याख्यातः

13.2.42 द्रव्यस्त्रीलोलुपं आढ्यविधवाभिर्वा परमरूपयौवनाभिः स्त्रीभिर्दायनिक्षेपार्थ उपनीताभिः सत्त्रिणः प्रलोभयेयुः

13.2.43 प्रतिपन्नं रात्रौ सत्त्रच्छन्नाः समागमे शस्त्ररसाभ्यां घातयेयुः

13.2.44 सिद्धप्रव्रजितचैत्यस्तूपदैवतप्रतिमानां अभीक्ष्णाभिगमनेषु वा भूमिगृहसुरुङ्गारूढभितिप्रविष्टाः तीक्ष्णाः परं अभिहन्युः

13.2.45ab येषु देशेषु याः प्रेक्षाः प्रेक्षते पार्थिवः स्वयम् ।
13.2.45chd यात्राविहारे रमते यत्र क्रीडति वाऽम्भसि
13.2.46ab धिग्.उक्त्य्ऽअदिषु सर्वेषु यज्ञप्रहवणेषु वा ।
13.2.46chd सूतिकाप्रेतरोगेषु प्रीतिशोकभयेषु वा ।
13.2.47ab प्रमादं याति यस्मिन् वा विश्वासात् स्वजन उत्सवे
13.2.47chd यत्रास्यारक्षिसञ्चारो दुर्दिने सङ्कुलेषु वा ।
13.2.48ab विप्रस्थाने प्रदीप्ते वा प्रविष्टे निर्जनेऽपि वा ।
13.2.48chd वस्त्राभरणमाल्यानां फेलाभिः शयनासनैः
13.2.49ab मद्यभोजनफेलाभिः तूर्यैर्वाऽभिगताः सह ।
13.2.49chd प्रहरेयुररिं तीक्ष्णाः पूर्वप्रणिहितैः सह (इति)
13.2.50ab यथैव प्रविशेयुश्च द्विषतः सत्त्रहेतुभिः ।
13.2.50chd तथैव चापगच्छेयुरित्युक्तं योगवामनम्

Chapt । अपसर्पप्रणिधिः

13.3.01 श्रेणीमुख्यं आप्तं निष्पातयेत्
13.3.02 स परं आश्रत्य पक्षापदेशेन स्वविषयात् साचिव्यकरसहाय उपादानं कुर्वीत
13.3.03 कृतापसर्प उपचयो वा परं अनुमान्य स्वामिनो दूष्यग्रामं वीतहस्त्य्ऽश्वं दूष्यामात्यं दण्डं आक्रन्दं वा हत्वा परस्य प्रेषयेत्
13.3.04 जनपद एकदेशं श्रेणीं अटवीं वा सहाय उपादानार्थं संश्रयेत
13.3.05 विश्वासं उपगतः स्वामिनः प्रेषयेत्
13.3.06 ततः स्वामी हस्तिबन्धनं अटवीघातं वाऽपदिश्य गूढं एव प्रहरेत्
13.3.07 एतेनामात्याटविका व्याख्याताः
13.3.08 शत्रुणा मैत्रीं कृत्वाऽमात्यान् अवक्षिपेत्
13.3.09 ते तत्शत्रोः प्रेषयेयुः भर्तारं नः प्रसादय इति
13.3.10 स यं दूतं प्रेषयेत्, तं उपालभेत भर्ता ते मां अमात्यैर्भेदयति, न च पुनरिहागन्तव्यम् इति
13.3.11 अथ एकं अमात्यं निष्पातयेत्

13.3.12 स परं आश्रित्य योगापसर्पापरक्तदूष्यान् अशक्तिमतः स्तेनाटविकान् उभय उपघातकान् वा परस्य उपहरेत्

13.3.13 आप्तभाव उपगतः प्रवीरपुरुष उपघातं अस्य उपहरेद् अन्तपालं आटविकं दण्डचारिणं वा दृढं असौ चासौ च ते शत्रुणा सन्धत्ते इति

13.3.14 अथ पश्चाद् अभित्यक्तशासनैरेनान् घातयेत्

13.3.15 दण्डबलव्यवहारेण वा शत्रुं उद्योज्य घातयेत्

13.3.16 कृत्यपक्ष उपग्रहेण वा परस्यामित्रं राजानं आत्मन्यपकारयित्वाऽभियुञ्जीत

13.3.17 ततः परस्य प्रेषयेत् असौ ते वैरी ममापकरोति, तं एहि सम्भूय हनिष्यावः, भूमौ हिरण्ये वा ते परिग्रहः इति

13.3.18 प्रतिपन्नं अभिसत्कृत्यागतं अवस्कन्देन प्रकाशयुद्धेन वा शत्रुणा घातयेत्

13.3.19 अभिविश्वासनार्थं भूमिदानपुत्राभिषेकरक्षाऽपदेशेन वा ग्राहयेत्

13.3.20 अविषह्यं उपांशुदण्डेन वा घातयेत्

13.3.21 स चेद् दण्डं दद्यान्न स्वयं आगच्छेत् तं अस्य वैरिणा घातयेत्

13.3.22 दण्डेन वा प्रयातुं इच्छेन्न विजिगीषुणा तथाऽप्येनं उभयतःसम्पीडनेन घातयेत्

13.3.23 अविश्वस्तो वा प्रत्येकशो यातुं इच्छेद् राज्य एकदेशं वा यातव्यस्यादातुकामः, तथाऽप्येनं वैरिणा सर्वसन्दोहेन वा घातयेत्

13.3.24 वैरिणा वा सक्तस्य दण्ड उपनयेन मूलं अन्यतो हारयेत्

13.3.25 शत्रुभूम्या वा मित्रं पणेत, मित्रभूम्या वा शत्रुम्

13.3.26 ततः शत्रुभूमिलिप्सायां मित्रेणात्मन्यपकारयित्वाऽभियुञ्जीत - इति समानाः पूर्वेण सर्व एव योगाः

13.3.27 शत्रुं वा मित्रभूमिलिप्सायां प्रतिपन्नं दण्डेनानुगृह्णीयात्

13.3.28 ततो मित्रगतं अतिसन्दध्यात्

13.3.29 कृतप्रतिविधानो वा व्यसनं आत्मनो दर्शयित्वा मित्रेणामित्रं उत्साहयित्वाऽऽत्मानं अभियोजयेत्

13.3.30 ततः सम्पीडनेन घातयेत्, जीवग्राहेण वा राज्यविनिमयं कारयेत्

13.3.31 मित्रेणाश्रितश्चेत्शत्रुरग्राह्ये स्थातुं इच्छेत् सामन्तादिभिर्मूलं अस्य हारयेत्

13.3.32 दण्डेन वा त्रातुं इछेत् तं अस्य घातयेत्

13.3.33 तौ चेन्न भिद्येयातां प्रकाशं एवान्योन्यभूम्या पणेत

13.3.34 ततः परस्परं मित्रव्यञ्जना वा उभयवेतना वा दूतान् प्रेषयेयुः अयं ते राजा भूमिं लिप्सते शत्रुसंहितः इति

13.3.35 तयोरन्यतरो जाताशङ्कारोषः, पूर्ववच्चेष्तेत

13.3.36 दुर्गराष्ट्रदण्डमुख्यान् वा कृत्यपक्षहेतुभिरभिविख्याप्य प्रव्राजयेत्

13.3.37 ते युद्धावस्कन्दावरोधव्यसनेषु शत्रुं अतिसन्दध्युः

13.3.38 भेदं वाऽस्य स्ववर्गेभ्यः कुर्युः

13.3.39 अभित्यक्तशासनैः प्रतिसमानयेयुः

13.3.40 लुब्धकव्यञ्जना वा मांसविक्रयेण द्वाहस्था दौवारिकापाश्रयाश्चोराभ्यागमं परस्य द्विः त्रिरिति निवेद्य लब्धप्रत्यया भर्तुरनीकं द्विधा निवेश्य ग्रामवधेऽवस्कन्दे च द्विषतो ब्रूयुः आसन्नश्चोरगणः, महांश्चाक्रन्दः, प्रभूतं सैन्यं आगच्छतु इति

13.3.41 तद् अर्पयित्वा ग्रामघातदण्डस्य सैन्यं इतरद् आदाय रात्रौ दुर्गद्वारेषु ब्रूयुः हतश्चोरगणः, सिद्धयात्रं इदं सैन्यं आगतं, द्वारं अपाव्रियताम् इति

13.3.42 पूर्वप्रणिहिता वा द्वाराणि दद्युः

13.3.43 तैः सह प्रहरेयुः

13.3.44 कारुशिल्पिपाषण्डकुशीलववैदेहकव्यञ्जनान् आयुधीयान् व्वा परदुर्गे प्रणिदध्यात्

13.3.45 तेषां गृहपतिकव्यञ्जनाः काष्ठतृणधान्यपण्यशकटैः प्रहरणावरणान्यभिहरेयुः, देवध्वजप्रतिमाभिर्वा

13.3.46 ततः तद्व्यञ्जनाः प्रमत्तवधं अवस्कन्दप्रतिग्रहं अभिप्रहरणं पृष्ठतः शङ्खदुन्दुभिशब्देन वा प्रविष्टम् इत्यावेदयेयुः

13.3.47 प्राकारद्वाराट्टालकदानं अनीकभेदं घातं वा कुर्युः

13.3.48 सार्थगणवासिभिरातिवाहिकैः कन्यावाहिकैरश्वपण्यव्यवहारिभिरुपकरणहारकैर्धान्यक्रेतृविक्रेतृभिर्वा प्रव्रजितलिङ्गिभिर्दूतैश्च दणड्ऽतिनयनं, सन्धिकर्मविश्वासनार्थम्

13.3.49 इति राजापसर्पाः

13.3.50 एत एवाटवीनां अपसर्पाः कण्टकशोधन उक्ताश्च

13.3.51 व्रजं अटव्य्sअसन्नं अपसर्पाः सार्थं वा चोरैर्घातयेयुः

13.3.52 कृतसङ्केतं अन्नपानं चात्र मदनरसविद्धं वा कृत्वाsपगच्छेयुः

13.3.53 गोपालकवैदेहकाश्च ततश्चोरान् गृहीतलोप्त्रभारान् मदनरसविकारकालेsवस्कन्दयेयुः

13.3.54 सङ्कर्षणदैवतीयो वा मुण्डजटिलव्यञ्जनः प्रहवणकर्मणा मदनरसयोगेनातिसन्दध्यात्

13.3.55 अथावस्कन्दं दद्यात्

13.3.56 शौण्डिकव्यञ्जनो वा दैवतप्रेतकार्य उत्सवसमाजेष्वाटविकान् सुराविक्रय उपायननिमित्तं मदनरसयोगेनातिसन्दध्यात्

13.3.57 अथावस्कन्दं दद्यात्

13.3.58ab ग्रामघातप्रविष्टां वा विक्षिप्य बहुधाsटवीम् ।

13.3.58chd घातयेद् इति चोराणां अपसर्पाः प्रकीर्तिताः (इति)

Chapt । पर्युपासनकर्म - अवमर्दः

13.4.01 कर्शनपूर्वं पर्युपासनकर्म

13.4.02 जनपदं यथानिविष्टं अभये स्थापयेत्

13.4.03 उत्थितं अनुग्रहपरिहाराभ्यां निवेषयेत्, अन्यत्रापसरतः

13.4.04 सङ्ग्रामाद् अन्यस्यां भूमौ निवेशयेत्, एकस्यां वा वासयेत्

13.4.05 न ह्यजनो जनपदो राज्यं अजनपदं वा भवति इति कौटिल्यः

13.4.06 विषमस्थस्य मुष्टिं सस्यं वा हन्याद्, वीवधप्रसारौ च

13.4.07ab प्रसारवीवधच्छेदान् मुष्टिसस्यवधाद् अपि ।

13.4.07chd वमनाद् गूढघाताच्च जायते प्रकृतिक्षयः

13.4.08 प्रभूतगुणबद्ध(वद्ध) अन्यकुप्ययन्त्रशस्त्रावरणविष्टिरश्मिसमग्रं मे सैन्यं, ऋतुश्च पुरस्तात्, अपर्तुः परस्य, व्याधिदुर्भिक्षनिचयरक्षाक्षयः क्रीतबलनिर्वेदो मित्रबलनिर्वेदश्च इति पर्युपासीत

13.4.09 कृत्वा स्कन्धावारस्य रक्षां वीवधासारयोः पथश्च, परिक्षिप्य दुर्गं खातसालाभ्यां, दूषयित्वा उदकं, अवस्राव्य परिखाः सम्पूरयित्वा वा, सुरुङ्गाबलकुटिकाभ्यां वप्रप्राकारौ हारयेत्, दारं च गुडेन

13.4.10 निम्नं वा पांसुमालयाऽऽच्छादयेत्

13.4.11 बहुलारक्षं यन्त्रैर्घातयेत्

13.4.12 निष्किराद् उपनिष्कृष्याश्चैश्च प्रहरेयुः

13.4.13 विक्रमान्तरेषु च नियोगविकल्पसमुच्चयैश्च उपायानां सिद्धिं लिप्सेत

13.4.14 दुर्गवासिनः श्येनकाकनसृभासशुकसारिक उलूककपोतान् ग्राहयित्वा पुच्छेष्वग्नियोगयुक्तान् परदुर्गे विसृजेत्

13.4.15 अपकृष्टस्कन्धावाराद् उच्छ्रितध्वजधन्वारक्षो वा मानुषेणाग्निना परदुर्गं आदीपयेत्

13.4.16 गूढपुर्षाश्चान्तर्दुर्गपालका नकुलवानरबिडालशुनां पुच्छेष्वग्नियोगं आधाय काण्डनिचयरक्षाविधानवेश्मसु विसृजेयुः

13.4.17 शुष्कमत्स्यानां उदरेष्वग्निं आधाय वल्लूरे वा वायस उपहारेण वयोभिर्हारयेयुः

13.4.18 सरलदेवदारुपूतितृणगुग्गुलुश्रीवेष्टकसर्जरसलाक्षागुलिकाः खर उष्ट्राजावीनां लेण्डं चाग्निधारणम्

13.4.19 प्रियालचूर्णं अवल्गुजमषीमधु.उच्छिष्टं अश्वखर उष्ट्रगोलेण्डं इत्येष क्षेप्योऽग्नियोगः

13.4.20 सर्वलोहचूर्णं अग्निवर्णं वा कुम्भीसीसत्रपुचूर्णं वा पारिभद्रकपलाशपुष्पकेशमषीतैलमधु.उच्छिष्टकश्रीवेष्टकयुक्तोऽग्नियोगो विश्वासघाती वा

13.4.21 तेनावलिप्तः शणत्रपुसवल्कवेष्टितो बाण इत्यग्नियोगः

13.4.22 न त्वेव विद्यमाने पराक्रमेऽग्निं अवसृजेत्

13.4.23 अविश्वास्यो ह्यग्निर्दैवपीडनं च, अप्रतिसङ्ख्यातप्राणिधान्यपशुहिरण्यकुप्यद्रव्यक्षयकरः

13.4.24 क्षीणनिचयं चावासं अपि राज्यं क्षयाय एव भवति इति पर्युपासनकर्म

13.4.25 सर्वारम्भ उपकरणविष्टिसम्पन्नोऽस्मि, व्याधितः पर उपधाविरुद्धप्रकृतिरकृतदुर्गकर्मनिचयो वा, निरासारः सासारो वा पुरा मित्रैः सन्धत्ते इत्यवमर्दकालः

13.4.26 स्वयं अग्नौ जाते समुत्थापिते वा प्रहवणे प्रेक्षाऽनीकदर्शनसङ्गसौरिककलहेषु नित्ययुद्धश्रान्तबले बहुलयुद्धप्रतिविद्धप्रेतपुरुषे जागरणक्लान्तसुप्तजने दुर्दिने नदीवेगे वा नीहारसम्प्लवे वाऽवमृद्नीयात्

13.4.27 स्कन्धावारं उत्सृज्य वा वनगूढः शत्रुं निष्क्रान्तं घातयेत्

13.4.28 मित्रासारमुख्यव्यञ्जनो वा सम्मुद्धेन मैत्रीं कृत्वा दूतं अभित्यक्तं प्रेषयेत् - इदं ते छिद्रं, इमे दूष्याः सम्मोद्धुर्वा छिद्रं, अयं ते कृत्यपक्षः इति

13.4.29 तं प्रतिदूतं आदाय निर्गच्छन्तं विजिगीषुर्गृहीत्वा दोषं अभिविख्याप्य प्रवास्य अपगच्छेत्

13.4.30 ततो मित्रासारव्यञ्जनो वा सम्मुद्धं ब्रूयात् मां त्रातुं उपनिर्गच्छ, मया वा सह सम्मोद्धारं जहि इति

13.4.31 प्रतिपन्नं उभयतःसम्पीडनेन घातयेत्, जीवग्राहेण वा राज्यविनिमयं कारयेत्

13.4.32 नगरं वाऽस्य प्रमृद्नीयात्

13.4.33 सारबलं वाऽस्य वमयित्वाऽभिहन्यात्

13.4.34 तेन दण्ड उपनताटविका व्याख्याताः

13.4.35 दण्ड उपनताटविकयोरन्यतरो वा सम्मुद्धस्य प्रेषयेत् - अयं सम्मोद्धा व्याधितः, पार्ष्णिग्राहेणाभियुक्तः, छिद्रं अन्यद् उत्थितं, अन्यस्यां भूमावपयातुकामः इति

13.4.36 प्रतिपन्ने सम्मोद्धा स्कन्धावारं आदीप्यापयायात्

13.4.37 ततः पूर्ववद् आचरेत्

13.4.38 पण्यसम्पातं वा कृत्वा पण्येन एनं रसविद्धेनातिसन्दध्यात्

13.4.39 आसारव्यञ्जनो वा सम्मुद्धस्य दूतं प्रेषयेत् - मया बाह्यं अभिहतं उपनिर्गच्छाभिहन्तुम् इति

13.4.40 प्रतिपन्नं पूर्ववद् आचरेत्

13.4.41 मित्रं बन्धुं वाऽपदिश्य योगपुरुषाः शासनमुद्राहस्ताः प्रविश्य दुर्गं ग्राहयेयुः

13.4.42 आसारव्यञ्जनो वा समुद्धस्य प्रेषयेत् - अमुष्मिन् देशे काले च स्कन्धावारं अभिहनिष्यामि, युष्माभिरपि योद्धव्यम् इति

13.4.43 प्रतिपन्नं यथा उक्तं अभ्याघातसङ्कुलं दर्शयित्वा रात्रौ दुर्गान्निष्क्रान्तं घातयेत्

13.4.44 यद् वा मित्रं आवाहयेद् आटव्विकं वा, तं उत्साहयेत् विक्रम्य समुद्धे भूमिं अस्य प्रतिपद्यस्व इति

13.4.45 विक्रान्तं प्रकृतिभिर्दूष्यमुख्य उपग्रहेण वा घातयेत्, स्वयं वा रसेन मित्रघातकोऽयम् इत्यवासार्थः

13.4.46 विक्रमितुकामं वा मित्रव्यञ्जनः परस्याभिशंसेत्

13.4.47 आप्तभाव उपगतः प्रवीरपुरुषानस्य उपघातयेत्

13.4.48 सन्धिं वा कृत्वा जनपदं एनं निवेशयेत्

13.4.49 निविष्टं अस्य जनपदं अविज्ञातो हन्यात्

13.4.50 अपकारयित्वा दूष्याटविकेषु वा बल एकदेशं अतिनीय दुर्गं अवस्कन्देन हारयेत्

13.4.51 दूष्यामित्राटविकद्वेष्यप्रत्यपसृताश्च कृतार्थमानसंज्ञाचिह्नाः परदुर्गं अवस्कन्देयुः

13.4.52 परदुर्गं अवस्कन्द्य स्कन्धावारं वा पतितपरान्मुखाभिपन्नं उक्तकेशशस्त्रभयविरूपेभ्यश्चाभयं अयुध्यमानेभ्यश्च दद्युः

13.4.53 परदुर्गं अवाप्य विशुद्धशत्रुपक्षं कृत उपांशुदण्डप्रतीकारं अन्तर्बहिश्च प्रविशेत्

13.4.54 एवं विजिगीषुरमित्रभूमिं लब्ध्वा मध्यमं लिप्सेत, तत्सिद्धावुदासीनम्

13.4.55 एष प्रथमो मार्गः पृथिवीं जेतुम्

13.4.56 मध्यम उदासीनयोरभावे गुणातिशयेनारिप्रकृतीः साधयेत्, तत उत्तराः प्रकृतीः

13.4.57 एष द्वितीयो मार्गः

13.4.58 मण्डलस्याभावे शत्रुणा मित्रं मित्रेण वा शत्रुं उभयतःसम्पीडनेन साधयेत्

13.4.59 एषतृतीयो मार्गः

13.4.60 शक्यं एकं वा सामन्तं साधयेत्, तेन द्विगुणो द्वितीयं, त्रिगुणः तृतीयम्

13.4.61 एष चतुर्थो मार्गः पृथिवीं जेतुम्

13.4.62 जित्वा च पृथिवीं विभक्तवर्णाश्रमां स्वधर्मेण भुञ्जीत

13.4.63ab उपजापोऽपसर्पश्च वामनं पर्युपासनम् ।

13.4.63chd अवमर्दश्च पञ्च एते दुर्गलम्भस्य हेतवः (इति)

Chapt | लब्धप्रशमनम्

13.5.01 द्विविधं विजिगीषोः समुत्थानं - अटव्य्ऽअदिकं एकग्रामादिकं च

13.5.02 त्रिविधश्चास्य लम्भः - नवो, भूतपूर्वः, पित्र्य इति

13.5.03 नवं अवाप्य लाभं परदोषान् स्वगुणैश्छादयेत्, गुणान् गुणद्वैगुण्येन

13.5.04 स्वधर्मकर्मानुग्रहपरिहारदानमानकर्मभिश्च प्रकृतिप्रियहितान्यनुवर्तेत

13.5.05 यथासम्भाषितं च कृत्यपक्षं उपग्राहयेत्, भूयश्च कृतप्रयासम्

13.5.06 अविश्वासो हि विसंवादकः स्वेषां परेषां च भवति, प्रकृतिविरुद्धाचारश्च

13.5.07 तस्मात् समानशीलवेषभाषाऽऽचारतां उपगछेत्

13.5.08 देशदैवतस्माज उत्सवविहारेषु च भक्तिं अनुवर्तेत

13.5.09 देशग्रामजातिसङ्घमुख्येषु चाभीक्ष्णं सत्त्रिणः परस्यापचारं दर्शयेयुः, माहाभाग्यं भक्तिं च तेषु स्वामिनः, स्वामिसत्कारं च विद्यमानम्

13.5.10 उचितैश्च एनान् भोगपरिहाररक्षाऽवेक्षणैर्भुञ्जीत

13.5.11 सर्वदेवताऽऽश्रमपूजनं च विद्यावाक्यधर्मशूरपुरुषाणां च भूमिद्रव्यदानपरिहारान् कारयेत्, सर्वबन्धनमोक्षणं अनुग्रहं दीनानाथव्याधितानां च

13.5.12 चातुर्मास्येष्वर्धमासिकं अघातं, पौर्णमासीषु च चातूरात्रिकं राजदेशनक्षत्रेष्वैकरात्रिकम्

13.5.13 योनिबालवधं पुंस्त्व उपघातं च प्रतिषेधयेत्

13.5.14 यच्च कोशदण्ड उपघातकं अधर्मिष्ठं वा चरित्रं मन्येत तद् अपनीय धर्म्यव्यवहारं स्थापयेत्

13.5.15 चोरप्रकृतीनां म्लेच्छजातीनां च स्थानविपर्यासं अनेकस्थं कारयेत्, दुर्गराष्ट्रदण्डमुख्यानां च

13.5.16 परा उपगृहीतानां च मन्त्रिपुरोहितानां परस्य प्रत्यन्तेष्वनेकस्थं वासं कारयेत्

13.5.17 अपकारसमर्थान् अनुक्षियतो वा भर्तृविनाशं उपांशुदण्डेन प्रशमयेत्

13.5.18 स्वदेशीयान् वा परेण वाऽपरुद्धान् अपवाहितस्थानेषु स्थापयेत्

13.5.19 यश्च तत्कुलीनः प्रत्यादेयं आदातुं शक्तः, प्रत्यन्ताटवीस्थो वा प्रबाधितुं अभिजातः, तस्मै विगुणां भूमिं प्रयच्छेत्, गुणवत्याश्चतुर्भागं वा कोशदण्डदानं अवस्थाप्य, यद् उपकुर्वाणः पौरजानपदान् कोपयेत्

13.5.20 कुपितैः तैरेनं घातयेत्

13.5.21 प्रकृतिभिरुपक्रुष्टं अपनयेत्, औपघातिके वा देशे निवेशयेत् - इति

13.5.22 भूतपूर्वे येन दोषेणापवृत्तः तं प्रकृतिदोषं छादयेत्, येन च गुणेन उपावृत्तः तं तीव्रीकुर्यात् - इति

13.5.23 पित्र्ये पितुर्दोषांश्छादयेत्, गुणांश्च प्रकाशयेत् - इति

13.5.24ab चरित्रं अकृतं धर्म्यं कृतं चान्यैः प्रवर्तयेत् ।

13.5.24chd प्रवर्तयेन्न चाधर्म्यं कृतं चान्यैर्निवर्तयेत् (इति)

Book |

Chapt | परबलघातप्रयोगः

14.1.01 चातुर्वर्ण्यरक्षाऽर्थं औपनिषदिकं अधर्मिष्ठेषु प्रयुञ्जीत

14.1.02 कालकूटादिर्विषवर्गः श्रद्धेयदेशवेषशिल्पभाषाऽभिजनापदेशैः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मभिर्म्लेच्छजातीयैरभिप्रेतैः स्त्रीभिः पुम्भिश्च परशरीर उपभोगेष्ववधातव्यः

14.1.03 राजक्रीडाभाण्डनिधानद्रव्य उपभोगेषु गूढाः शस्त्रनिधानं कुर्युः, सत्त्राजीविनश्च रात्रिचारिणोऽग्निजीविनश्चाग्निनिधानम्

14.1.04 चित्रभेककौण्डिन्यककृकणपञ्चकुष्ठशतपदीचूर्णं उच्चिदिण्गकम्बलीशतकन्द(कर्दम?) इध्मकृकलासचूर्णं

गृहगोलिकान्धाहिकक्रकण्टकपूतिकीटगोमारिकाचूर्णं भल्लातकावल्गुजरसम्युक्तं सद्यःप्राणहरं, एतेषां वा धूमः

14.1.05ab कीटो वाऽन्यतमः तप्तः कृष्णसर्पप्रियङ्गुभिः ।

14.1.05chd शोषयेद् एष सम्योगः सद्यःप्राणहरो मतः

14.1.06 धामार्गवयातुधानमूलं भल्लातकपुष्पचूर्णयुक्तं आर्धमासिकः

14.1.07 व्याघातकमूलं भल्लातकपुष्पचूर्णयुक्तं कीटयोगो मासिकः

14.1.08 कलामात्रं पुरुषाणां, द्विगुणं खराश्वानां, चतुर्गुणं हस्त्य्.उष्ट्राणाम्

14.1.09 शतकर्दम उच्चिदिङ्गकरवीरकटुतुम्बीमत्स्यधूमो मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वा प्रवातानुवाते प्रणीतो यावच्चरति तावन् मारयति

14.1.10 पूकिकीटमस्त्यकटुतुम्बीशतकर्दम इध्म इन्द्रगोपचूर्णं पूतिकीटक्षुद्रारालाहेमविदारीचूर्णं वा बस्तशृङ्गखुरचूर्णयुक्तं अन्धीकरो धूमः

14.1.11 पूतिकरञ्जपत्त्रहरितालमनःशिलागुञ्जारक्तकार्पासपलालान्यास्फोटकाचगोशकृद्रसपिष्टं अन्धीकरो धूमः

14.1.12 सर्पनिर्मोकं गोऽश्वपुरीषं अन्धाहिकशिरश्चान्धीकरो धूमः

14.1.13 पारावतप्लवकक्रव्यादानां हस्तिनरवराहाणां च मूत्रपुरीषं कासीसहिङ्गुयवतुषकणतण्डुलाः कार्पासकुटजकोशातकीनां च बीजानि गोमूत्रिकाभाण्डीमूलं निम्बशिग्रुफणिर्जकाक्षीवपीलुकभङ्गः सर्पशफरीचर्म हस्तिनखशृङ्गचूर्णं इत्येष धूमो मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वा प्रणीतः प्रत्येकशो यावच्चरति तावन् मारयति

14.1.14 कालीकुष्ठनडशतावलीमूलं सर्पप्रचलाककृकणपञ्चकुष्ठचूर्णं वा धूमः पूर्वकल्पेनार्द्रशुष्कपलालेन वा प्रणीतः सङ्ग्रामावतरणावस्कन्दनसङ्कुलेषु कृतनेजन उदकाक्षिप्रतीकारैः प्रणीतः सर्वप्राणिनां नेत्रघ्नः

14.1.15 शारिकाकपोतबकबलाकालेण्डं अर्काक्षिपीलुकस्नुहिक्षीरपिष्टं अन्धीकरणं अञ्जनं उदकदूषणं च

14.1.16 यवकशालिमूलमदनफलजातीपत्त्रनरमूत्रयोगः प्लक्षविदारीमूलयुक्तो मूक उदुम्बरमदनकोद्रवक्वाथयुक्तो हस्तिकर्णपलाशक्वाथयुक्तो वा मदनयोगः

14.1.17 शृङ्गिगौतमवृककण्टकारमयूरपदीयोगो गुञ्जालाङ्गलीविषमूलिक इङ्गुदीयोगः करवीराक्षिपीलुकार्कमृगमारणीयोगो मद्रकोद्रवक्वाथयुक्तो हस्तिकर्णपलाशक्वाथयुक्तो वा मदनयोगः

14.1.18 समस्ता वा यवस इन्धन उदकदूषणाः

14.1.19 कृतकण्डलकृकलासगृहगोलिकान्धाहिकधूमो नेत्रवधं उन्मादं च करोति

14.1.20 कृकलासगृहगोलिकायोगः कुष्ठकरः

14.1.21 स एव चित्रं एकान्त्रमधुयुक्तः प्रमेहं आपादयति, मनुष्यलोहितयुक्तः शोषम्

14.1.22 दूषीविषं मदनकोद्रवचूर्णं अपजिह्विकायोगः

14.1.23 मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षिपीलुकयोगो विषूचिकाकरः

14.1.24 पञ्चकुष्ठककौण्डिन्यकराजवृक्षपुष्पमधुयोगो ज्वरकरः

14.1.25 भासनकुलजिह्वाग्रन्थिकायोगः खरीक्षीरपिष्टो मूकबधिर.करो मासार्धमासिकः

14.1.26 कलामात्रं पुरुषाणां इत् समानं पूर्वेण

14.1.27 भङ्गक्वाथ उपनयनं औषधानां, चूर्णं प्राणभृतां, सर्वेषां वा क्वाथ उपनयनं, एवं वीर्यवत्तरं भवति

14.1.28 इति योगसम्पत्

14.1.29 शाल्मली विदारीधान्यसिद्धो मूलवत्सनाभसम्युक्तश्चुच्छुन्दरीशोणितप्रलेपेन दिग्धो बाणो यं विध्यति स विद्धोऽन्यान् दशपुरुषान् दशति, ते दष्टा दशान्यान् दशन्ति पुरुषान्

14.1.30 बल्लातकयातुधानावानुधामार्गवबाणानां पुष्पैरेलकाक्षिगुग्गुलुहालाहलानां च कषायं बस्तनरशोणितयुक्तं दंशयोगः

14.1.31 ततोऽर्धधरणिको योगः सक्तुपिण्याकाभ्यां उदके प्रणीतो धनुःशतायामं उदकाशयं दूषयति

14.1.32 मत्स्यपरम्परा ह्येतेन दष्टाऽभिमृष्टा वा विषीभवति, यश्च एतद् उदकं पिबति स्पृशति वा

14.1.33 रक्तश्वेतसर्षपैर्गोधा त्रिपक्षं उष्ट्रिकायां भूमौ निखातायां निहिता वध्येन उद्धृता यावत् पश्यति तावन् मारयति, कृष्णसर्पो वा

14.1.34 विद्युत्प्रदग्धोऽङ्गारो ज्वालो वा विद्युत्प्रदग्धैः काष्ठैर्गृहीतश्चानुवासितः कृत्तिकासु भरणीषु वा रौद्रेण कर्मणाऽभिहुतोऽग्निः प्रणीतश्च निस्प्रतीकारो दहति

14.1.35ab कर्माराद् अग्निं आहृत्य क्षौद्रेण जुहुयात् पृथक् ।

14.1.35chd सुरया शौण्डिकाद् अग्निं मार्गतोऽग्निं घृतेन च

14.1.36ab माल्येन च एकपत्न्यऽग्निं पुंश्चल्यऽग्निं च सर्षपैः ।

14.1.36chd दध्ना च सूतिकास्वग्निं आहिताग्निं च तण्डुलैः

14.1.37ab चण्डालाग्निं च मांसेन चिताग्निं मानुषेण च

14.1.37chd समस्तान् बस्तवसया मानुषेण ध्रुवेण च

14.1.38ab जुहुयाद् अग्निमन्त्रेण राजवृक्षस्य दारुभिः ।

14.1.38chd एष निष्प्रतिकारोऽग्निर्द्विषतां नेत्रमोहनः

14.1.39 अदिते नमस्ते, अनुमते नमस्ते, सरस्वति नमस्ते, देव सवितर्नमास्ते

14.1.40 अग्नये स्वाहा, सोमाय स्वाहा, भूः स्वाहा भुवः स्वाहा (इति)

Chapt । प्रलम्भनं, तत्र अद्भुत उत्पादनम्

14.2.01 शिरीष उदुम्बरशमीचूर्णं सर्पिषा संहृत्यार्धमासिकः क्षुद्योगः

14.2.02 कशेरुक उत्पलकन्देक्षुमूलबिसदूर्वाक्षीरघृतमण्डसिद्धो मासिकः

14.2.03 माषयवकुलत्थदर्भमूलचूर्णं वा क्षीरघृताभ्यां, वल्लीक्षीरघृतं वा समसिद्धं, सालपृश्निपर्णीमूलकल्कं पयसा पीत्वा, पयो वा तत्सिद्धं मधुघृताभ्यां अशित्वा मासं उपवसति

14.2.04 श्वेतबस्तमूत्रे सप्तरात्र उषितैः सिद्धार्थकैः सिद्धं तैलं कटुकालाबौ मासार्धमासस्थितं चतुष्पदद्विपदानां विरूपकरणम्

14.2.05 तक्रयवभक्षस्य सप्तरात्राद् ऊर्ध्वं श्वेतगर्दभस्य लेण्डयवैः सिद्धं गौरसर्षपतैलं विरूपकरणम्

14.2.06 एतयोरन्यतरस्य मूत्रलेण्डरससिद्धं सिद्धार्थकतैलं अर्कतूलपतङ्गचूर्णप्रतीवापं श्वेतीकरणम्

14.2.07 श्वेतकुक्कुटाजगरलेण्डयोगः श्वेतीकरणम्

14.2.08 श्वेतबस्तमूत्रे श्वेतसर्षपाः सप्तरात्र उषितास्तक्र(?) मर्क.क्षीरलवणं धान्यं च पक्षस्थितो योगः श्वेतीकरणम्

14.2.09 कटुकालाबौ वलीगते गतंऽर्धमासस्थितं गौरसर्षपपिष्टं रोम्णां श्वेतीकरणम्

14.2.10ab अलोजुनेति यः कीटः श्वेता च गृहगोलिका ।

14.2.10chd एतेन पिष्तेनाभ्यक्ताः केशाः स्युः शङ्खपाण्डराः

14.2.11 गोमयेन तिन्दुकारिष्टकल्केन वा मर्दिताङ्गस्य भल्लातकरसानुलिप्तस्य मासिकः कुष्ठयोगः

14.2.12 कृष्णसर्पमुखे गृहगोलिकामुखे वा सप्तरात्र उषिता गुज्जाः कुष्ठयोगः

14.2.13 शुकपित्ताण्डरसाभ्यङ्गः कुष्ठयोगः

14.2.14 कुष्ठस्यप्रियालकल्ककषायः प्रतीकारः

14.2.15 कुक्कुटकोशातकी(?) शतावरीमूलयुक्तं आहारयमाणो मासेन गौरो भवति

14.2.16 वटकषायस्नातः सहचरकल्कदिग्धः कृष्णो भवति

14.2.17 शकुनकण्गुतैलयुक्ता हरितालमनःशिलाः श्यामीकरणम्

14.2.18 खद्योतचूर्णं सर्षपतैलयुक्तं रात्रौ ज्वलति

14.2.19 खद्योतगण्डूपदचूर्णं समुद्रजन्तूनां भृङ्गकपालानां खदिरकर्णिकाराणां पुष्पचूर्णं वा शकुनकङ्गुतैलयुक्तं तेजनचूर्णम्

14.2.20 पारिभद्रकत्वन्मषी मण्डूकवसया युक्ता गात्रप्रज्वालनं अग्निना

14.2.21 परिभद्रकत्वक्तिलकल्कप्रदिग्धं शरीरं अग्निना ज्वलति

14.2.22 पीलुत्वन्मषीमयः पिण्डो हस्ते ज्वलति

14.2.23 मण्डूकवसादिग्धोऽग्निना ज्वलति

14.2.24 तेन प्रदिग्धं अङ्गं कुशाम्रफलतैलसिक्तं समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा ज्वलति

14.2.25 मण्डूककुलीरादीनां वसया समभागं तैलं सिद्धं अभ्यङ्गं गात्राणां अग्निप्रज्वालनम्

14.2.26 वेणुमूलशैवललिप्तं अङ्गं मण्डूकवसादिग्धं अग्निना ज्वलति

14.2.27 पारिभद्रकप्पतिबलावञ्जुलवज्रकदलीमूलकल्केन मण्डूकवसासिद्धेन तैलेनाभ्यक्तपादोऽङ्गारेषु गच्छति

14.2.28ab उप उदका प्रतिबला वञ्जुलः पारिभद्रकः ।

14.2.28chd एतेषां मूलकल्केन मण्डूकवसया सह

14.2.29ab साधयेत् तैलं एतेन पादावभ्यज्य निर्मलौ ।

14.2.29chd अङ्गारराशौ विचरेद् यथा कुसुमसञ्चये

14.2.30 हंसक्रौञ्चमयूराणां अन्येषां वा महाशकुनीनां उदकप्लवानां पुच्छेषु बद्धा नलदीपिका रात्रावुल्कादर्शनम्

14.2.31 वैद्युतं भस्माङ्गिशमनम्

14.2.32 स्त्रीपुष्पपायिता माषा व्रजकुलीमूलं मण्डूकवसामिश्रं चुल्लुयां दीप्तायां अपाचनम्

14.2.33 चुल्लीशोधनं प्रतीकारः

14.2.34 पीलुमयो मणिरग्निगर्भः सुवर्चलामूलग्रन्थिः सूत्रग्रन्थिर्वा पिचुपरिवेष्टितो मुख्याद् अग्निधूम उत्सर्गः

14.2.35 कुशाम्रफलतैलसिक्तोऽग्निर्वर्षप्रवातेषु ज्वलति

14.2.36 समुद्रफेनकः तैलयुक्तोऽम्भसि प्लवमानो ज्वलति

14.2.37 प्लवमानानां अस्थिषु कल्माषवेणुना निर्मथितोऽग्निर्न उदकेन शाम्यति, उदकेन ज्वलति

14.2.38 शस्त्रहतस्य शूलप्रोतस्य वा पुरुषस्य वामपार्श्वपर्शुकास्थिषु कल्माषवेणुना निर्मथितोऽग्निः स्त्रियाः पुरुषस्य वाऽस्थिषु मनुष्यपर्शुकया निर्मथितोऽग्निर्यत्र त्रिरपसव्यं गच्छति न चात्रान्योऽग्निर्ज्वलति

14.2.39ab चुच्चुन्दरी खञ्जरीटः खारकीटश्च पिष्यते ।

14.2.39chd अश्वमूत्रेण संसृष्टा निगलानां तु भञ्जनम्

14.2.40 अयस्कान्तो वा पाषाणः कुलीरदर्दुरखारकीटवसाप्रदेहेन द्विगुणः

14.2.41 नारकगर्भः कङ्कभासपार्श्व उत्पल उदकपिष्टश्चतुष्पदद्विपदानां पादलेपः

14.2.42 उलूकगृध्रवसाभ्यां उष्ट्रचर्म उपानहावभ्यज्य वटपत्त्रैः प्रतिच्छाद्य पञ्चाशद्योजनान्यश्रान्तो गच्छति

14.2.43 श्येनकङ्ककाकगृध्रहंसक्रौञ्चवीचीरल्लानां मज्जानो रेतांसि वा योजनशताय, सिंहव्याघ्रद्वीपकाक उलूकानां मज्जानो रेतांसि वा

14.2.44 सार्ववर्णिकानि गर्भपतनान्युष्ट्रिकायां अभिषूय श्मशाने प्रेतशिशून् वा तत्समुत्थितं मेदो योजनशताय

14.2.45a अनिष्टैरद्भुत उत्पातैः परस्य उद्वेगं आचरेत् ।

14.2.45b आराज्याय इति निर्वादः समानः कोप उच्यते (इति)

Chapt । प्रलम्भनं, तत्र भैषज्यमन्त्रयोगः

14.3.01 मार्जार उष्ट्रवृकवराहश्वाविद्वागुलीनसृकाक उलूकानां अन्येषां वा निशाचराणां सत्त्वानां एकस्य द्वयोर्बहूनां वा दक्षिणानि वामानि चाक्षीणि गृहीत्वा द्विधा चूर्णं कारयेत्

14.3.02 ततो दक्षिणं वामेन वामं दक्षिणेन समभ्यज्य रात्रौ तमसि च पश्यति

14.3.03ab एकाम्लकं वराहाक्षि खद्योतः कालशारिवा ।

14.3.03chd एतेनाभ्यक्तनयनो रात्रौ रूपाणि पश्यति

14.3.04 त्रिरात्र उपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां यवान् आवास्याविक्षीरेण सेचयेत्

14.3.05 ततो यवविरूढमालां आबध्य नष्टच्छायारूपश्चरति

14.3.06 त्रिरत्र उपोषितः पुष्येण श्वमार्जार उलूकवागुलीनां दक्षिणानि वामानि चाक्षीणि द्विधा चूर्णं कारयेत्

14.3.07 ततो यथास्वं अभ्यक्ताक्षो नष्टच्छायारूपश्चरति

14.3.08 त्रिरात्र उपोषितः पुष्येण पुरुषघातिनः काण्डकस्य शलाकां अञ्जनीं च कारयेत्

14.3.09 ततो अन्यतमेनाक्षिचूर्णेनाभ्यक्ताक्षो नष्टच्छायारूपश्चरति

14.3.10 त्रिरात्र उपोषितः पुष्येण कालायसीं अञ्जनीं शलाकां च कारयेत्

14.3.11 ततो निशाचराणां सत्त्वानां अन्यतमस्य शिरःकपालं अञ्जनेन पूरयित्वा मृतायाः स्त्रिया योनौ प्रवेश्य दाहयेत्

14.3.12 तद् अञ्जनं पुष्येण उद्धृत्य तस्यां अञ्जन्यां निदध्यात्

14.3.13 तेनाभ्यक्ताक्षो नष्टछायारूपश्चरति

14.3.14 यत्र ब्राह्मणं आहिताग्निं दग्धं दह्यमानं वा पश्येत् तत्र त्रिरात्र उपोषितः पुष्येण स्वयंमृतस्य वाससा प्रसेवं कृत्वा चिताभस्मना पूरयित्वा तं आबध्य नष्टच्छायारूपश्चरति

14.3.15 ब्राह्मणस्य प्रेतकार्ये यो गौर्मार्यते तस्यास्थिमज्जचूर्णपूर्णाऽहिभस्त्रा पशूनां अन्तर्धानम्

14.3.16 सर्पदष्टस्य भस्मना पूर्णा प्रचलाकभस्त्रा मृगाणां अन्तर्धानम्

14.3.17 उलूकवागुलीपुच्छपुरीषजान्व्ऽस्थिचूर्णपूर्णाऽहिभस्त्रा पक्षिणां अन्तर्धानम्

14.3.18 इत्यष्टावन्तर्धानयोगः

14.3.19ab बलिं वैरोचनं वन्दे शतमायं च शम्बरम् ।

14.3.19chd भण्डीरपाकं नरकं निकुम्भं कुम्भं एव च

14.3.20ab देवलं नारदं वन्दे वन्दे सावर्णिगालवम् ।

14.3.20chd एतेषां अनुयोगेन कृतं ते स्वापनं महत्

14.3.21ab यथा स्वपन्त्यजगराः स्वपन्त्यपि चमूखलाः ।

14.3.21chd तथा स्वपन्तु पुरुषा ये च ग्रामे कुतूहलाः

14.3.22ab भण्डकानां सहस्रेण रथनेमिशतेन च ।

14.3.22chd इमं गृहं प्रवेक्ष्यामि तूष्णीं आसन्तु भाण्डकाः

14.3.23ab नमस्कृत्वा च मनवे बद्ध्वा शुनकफेलकाः ।

14.3.23chd ये देवा देवलोकेषु मानुषेषु च ब्राह्मणाः

14.3.24ab अध्ययनपारगाः सिद्धा ये च कौलास तापसाः ।

14.3.24chd एतेभ्यः सर्वसिद्धेभ्यः कृतं ते स्वापनं महत्

14.3.25 अतिगच्छन्ति च मय्यपगच्छन्तु संहताः

14.3.26 अलिते, वलिते, मनवे स्वाहा

14.3.27 एतस्य प्रयोगः

14.3.28 त्रिरात्र उपोषितः कृष्णचतुर्दश्यां पुष्ययोगिन्यां श्वपाकीहस्ताद् विलखावलेखनं क्रीणीयात्

14.3.29 तन्माषैः सह कण्डोलिकायां कृत्वाऽसङ्कीर्ण आदहने निखानयेत्

14.3.30 द्वितीयस्यां चतुर्दश्यां उद्धृत्य कुमार्या पेषयित्वा गुलिकाः कारयेत्

14.3.31 तत एकां गुलिकां अभिमन्त्रयित्वा यत्र एतन मन्त्रेण क्षिपति तत् सर्वं प्रस्वापयति

14.3.32 एतेन एव कल्पेन श्वाविधः शल्यकं त्रिकालं त्रिश्वेतं असङ्कीर्ण आदहने निखानयेत्

14.3.33 द्वितीयस्यां चतुर्दश्यां उद्धृत्यादहनभस्मना सह यत्र एतेन मन्त्रेण क्षिपति तत् सर्वं प्रस्वापयति

14.3.34ab सुवर्णपुष्पीं ब्रह्माणीं ब्रह्माणं च कुशध्वजम् ।

14.3.34chd सर्वाश्च देवता वन्दे वन्दे सर्वांश्च तापसान्

14.3.35ab वशं मे ब्राह्मणा यान्तु भूमिपालाश्च क्षत्रियाः ।

14.3.35chd वशं वैश्याश्च शूद्राश्च वशतां यान्तु मे सदा

14.3.36 स्वाहा - अमिले किमिले वयुचारे प्रयोगे फक्के वयुह्वे विहाले दन्तकटके स्वाहा

14.3.37ab सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः ।

14.3.37chd श्वाविधः शल्यकं च एतत् त्रिश्वेतं ब्रह्मनिर्मितम्

14.3.38ab प्रसुप्ताः सर्वसिद्धा हि एतत् ते स्वापनं कृतम् ।

14.3.38chd यावद् ग्रामस्य सीमान्तः सूर्यस्य उद्गमनाद् इति

14.3.39 स्वाहा

14.3.40 एतस्य प्रयोगः

14.3.41 श्वाविधः शल्यकानि त्रिश्वेतानि, सप्तरात्र उपोषितः कृष्णचतुर्दश्यां खादिराभिः समिधामिर्(?) अग्निं एतेन मन्त्रेणाष्टशतसम्पातं कृत्वा मधुघृताभ्यां अभिजुहुयात्

14.3.42 तत एकं एतेन मन्त्रेण ग्रामद्वारि गृहद्वारि वा यत्र निखन्यते तत् सर्वं प्रस्वापयति

14.3.43ab बलिं वैरोचनं वन्दे शतमायं च शम्बरम् ।

14.3.43chd निकुम्भं नरकं कुम्भं तन्तुकच्छं महाऽसुरम्

14.3.44ab अर्मालवं प्रमीलं च मण्ड उलूकं घट उबलम् ।

14.3.44chd कृष्णकंस उपचारं च पौलोमीं च यशस्विनीम्

14.3.45ab अभिमन्त्रयित्वा गृह्णामि सिद्ध्यऽर्थं शवशारिकाम् ।

14.3.45chd जयतु जयति च नमः शलकभूतेभ्यः स्वाहा

14.3.46ab सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः ।

14.3.46chd सुखं स्वपन्तु सिद्धार्था यं अर्थं मार्गयामहे ।

14.3.46ech यावद् अस्तं अयाद् उदयो यावद् अर्थं फलं मम

14.3.47 इति स्वाहा

14.3.48 एतस्य प्रयोगः

14.3.49 चतुर्भक्त उपवासी कृष्णचतुर्दश्यां असङ्कीर्ण आदहने बलिं कृत्वा एतेन मन्त्रेण शवशारिकां गृहीत्वा पौत्रीपोट्टलिकं बध्नीयात्

14.3.50 तन्मध्ये श्वाविधः शल्यकेन विद्ध्वा यत्र एतेन मन्त्रेण निखन्यते तत् सर्वं प्रस्वापयति

14.3.51ab उपैमि शरणं चाग्निं दैवतानि दिशो दश ।

14.3.51chd अपयान्तु च सर्वाणि वशतां यान्तु मे सदा

14.3.52 स्वाहा

14.3.53 एतस्य प्रयोगः

14.3.54 त्रिरात्र उपोस्षितः पुष्येण शर्करा एकविंशतिसम्पातं कृत्वा मधुघृताभ्यां अभिजुहुयात्

14.3.55 ततो गन्धमाल्येन पूजयित्वा निखानयेत्

14.3.56 द्वितीयेन पुष्येण उद्धृत्य एकां शर्करां अभिमन्त्रयित्वा कपाटं आहन्यात्

14.3.57 अभ्यन्तरं चतसृणां शर्कराणां द्वारं अपाव्रियते

14.3.58 चतुर्भक्त उपवासी कृष्णचतुर्दश्यां भग्नस्य पुरुषस्यास्थ्ना ऋषभं कारयेत्, अभिमन्त्रयेच्च एतेन

14.3.59 द्विगोयुक्तं गोयानं आहृतं भवति

14.3.60 ततः परमाकाशे विरामति

14.3.61 रविसगन्धः परिघमति सर्वं पृणाति

14.3.62 चण्डालीकुम्भीतुम्बकटुकसारोघः सनारीभगोऽसि - स्वाहा

14.3.63 ताल उद्घाटनं प्रस्वापनं च

14.3.64 त्रिरात्र उपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां तुवरीरावास्य उदकेन सेचयेत्

14.3.65 जातानां पुष्येण एव गृहीत्वा रज्जुकां वर्तयेत्

14.3.66 ततः सज्यानां धनुषां यन्त्राणां च पुरस्ताच्छेदनं ज्याच्छेदनं करोति

14.3.67 उदकाह्रिभस्त्रां उच्छ्वासमृत्तिकया स्त्रियाः पुरुषस्य वा पूरयेत्, नासिकाबन्धनं मुखग्रहश्च

14.3.68 वराहभस्त्रां उच्छ्वासमृत्तिकया पूरयित्वा मर्कटस्नायुनाऽवबध्नीयात्, आनाहकारणम्

14.3.69 कृष्णचतुर्दश्यां शस्त्रहताया गोः कपिलायाः पित्तेन राजवृक्षमयीं अमित्रप्रतिमां अञ्ज्यात्, अन्धीकरणम्

14.3.70 चतुर्भक्त उपवासी कृष्णचतुर्दश्यां बलिं कृत्वा शूलप्रोतस्य पुरुषस्यास्थ्ना कीलकान् कारयेत्

14.3.71 एतेषां एकः पुरीषे मूत्रे वा निखात आनाहं करोति, पदेऽस्यासने वा निखातः शोषेण मारयति, आपणे क्षेत्रे गृहे वा वृत्तिच्छेदं करोति

14.3.72 एतेन एव कल्पेन विद्युद्दग्धस्य वृक्षस्य कीलका व्याख्याताः

14.3.73ab पुनर्नवं अवाचीनं निम्बः काममधुश्च यः ।

14.3.73chd कपिरोम मनुष्यास्थि बद्ध्वा मृतकवाससा

14.3.74ab निखन्यते गृहे यस्य दृष्ट्वा वा यत् पदं नयेत् ।

14.3.74chd सपुत्रदारः सधनस्त्रीन् पक्षान्नातिवर्तते

14.3.75ab पुनर्नवं अवाचीनं निम्बः काममधुश्च यः ।

14.3.75chd स्वयङ्गुप्ता मनुष्यास्थि पदे यस्य निखन्यते

14.3.76ab द्वारे गृहस्य सेनाया ग्रामस्य नगरस्य वा ।

14.3.76chd सपुत्रदारः सधनस्त्रीन् पक्षान्नातिवर्तते

14.3.77ab अजमर्कटरोमाणि मार्जारनकुलस्य च ।

14.3.77chd ब्राह्मणानां श्वपाकानां काक उलूकस्य चाहरेत् ।

14.3.77chd एतेन विष्ठाऽवक्षुण्णा सद्य उत्सादकारिका

14.3.78ab प्रेतनिर्मालिका किण्वं रोमाणि नकुलस्य च ।

14.3.78chd वृश्चिकाल्य्(?) अहिकृत्तिश्च पदे यस्य निखन्यते ।

14.3.78ef भवत्यपुरुषः सद्यो यावत् तन्नापनीयते

14.3.79 त्रिरात्र उपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां गुञ्जा आवास्य उदकेन सेचयेत्

14.3.80 जातानां अमावास्यायां पौर्णमास्यां वा पुष्ययोगिन्यां गुञ्जवल्लीर्ग्राहयित्वा मण्डलिकानि कारयेत्

14.3.81 तेष्वन्नपानभाजनानि न्यस्तानि न क्षीयन्ते

14.3.82 रात्रिप्रेक्षायां प्रवृत्तायां प्रदीपाग्निषु मृतधेनोः स्तनान् उत्कृत्य दाहयेत्

14.3.83 दग्धान् वृषमूत्रेण पेषयित्वा नवकुम्भं अन्तर्लेपयेत्

14.3.84 तं ग्रामं अपसव्यं परिणीय यत् तत्र न्यस्तं नवनीतं एषां तत् सर्वं आगच्छति

14.3.85 कृष्णचतुर्दश्यां पुष्ययोगिन्यां शुनो लग्नकस्य योनौ कालायसीं मुद्रिकां प्रेषयेत्

14.3.85 तां स्वयं पतितां गृह्णीयात्

14.3.87 तया वृक्षफलान्याकारितान्यागच्छन्ति

14.3.88ab मन्त्रभैषज्यसम्युक्ता योगा मायाकृताश्च ये ।

14.3.88chd उपहन्याद् अमित्रांः तैः स्वजनं चाभिपालयेत् (इति)

Chapt । स्वबल उपघातप्रतीकारः

14.4.01 स्वपक्षे परप्रयुक्तानां दूषीविषगराणां प्रतीकारः

14.4.02 श्लेष्मातककपित्थदन्तिदन्तशठगोजिशिरीषपाटलीबलास्योनागपुनर्नवाश्वेतवारणक्वाथयुक्तम्(?) चन्दनसालावृकीलोहितयुक्तं नेजन उदकं राज उपभोग्यानां गुह्यप्रक्षालनं स्त्रीणां, सेनायाश्च विषप्रतीकारः

14.4.03 पृषतनकुलनीलकण्ठगोधापित्तयुक्तं महीराजीचूर्णं सिन्दुवारितवरणवारुणीतण्डुलीयकशतपर्वाग्रपिण्डीतकयोगो मदनदोषहरः

14.4.04 सृगालविन्नामदनसिन्दुवारितवरणवारणवलीमूलकषायाणां अन्यतमस्य समस्तानां वा क्षीरयुक्तं पानं मदनदोषहरम्

14.4.05 कैडर्यपूतितिलतैलं उन्मादहरं नस्तःकर्म

14.4.06 प्रियङ्गुनक्तमालयोगः कुष्ठहरः

14.4.07 कुष्ठलोध्रयोगः पाकशोषघ्नः

14.4.08 कटफलद्रवन्तीविलङ्गचूर्ण नस्तःकर्म शिरोरोगहरम्

14.4.09 प्रियङ्गुमञ्जिष्ठातगरलाक्षारसमधुकहरिद्राक्षौद्रयोगो रज्जु.उदकविषप्रहारपतननिहसंज्ञानां पुनःप्रत्यानयनाय

14.4.10 मनुष्याणां अक्षमात्रं, गवाश्वानां द्विगुणं, चतुर्गुणं हस्त्य्.उष्ट्राणाम्

14.4.11 रुक्मगर्भश्च एषां मणिः सर्वविषहरः

14.4.12 जीवन्तीश्वेतामुष्ककपुष्पवन्दाकानां अक्षीवे जातस्याश्वत्थस्य मणिः सर्वविषहरः

14.4.13ab तूर्याणां तैः प्रलिसानां शब्दो विषविनाशनः ।

14.4.13chd लिसध्वजं पताकां वा दृष्ट्वा भवति निर्विषः

14.4.14ab एतैः कृत्वा प्रतीकारं स्वसैन्यानां अथात्मनः ।

14.4.14chd अमित्रेषु प्रयुञ्जीत विषधूमाम्बुदूषणान् (इति)

Book |

Chapt | तन्त्रयुक्तयः

15.1.01 मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः

15.1.02 तस्याः पृथिव्या लाभपालन उपायः शास्त्रं अर्थशास्त्रं इति

15.1.03 तद्द्वात्रिंशद् युक्तियुक्तं - अधिकरणं, विधानं, योगः, पदार्थः, हेत्व्sर्थः, उद्देशः, निर्देशः, उपदेशः, अपदेशः, अतिदेशः, प्रदेशः, उपमानं, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यशेषः, अनुमतं, व्याख्यानं, निर्वचनं, निदर्शनं, अपवर्गः, स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणं, अतिक्रान्तावेक्षणं, नियोगः, विकल्पः, समुच्चयः ऊह्यं इति

15.1.04 यं अर्थं अधिकृत्य उच्यते तद् अधिकरणम्

15.1.05 पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशः तानि संहृत्य एकं इदं अर्थशास्त्रं कृतम् इति

15.1.06 शास्त्रस्य प्रकरणानुपूर्वी विधानम्

15.1.07 विद्यासमुद्देशः, वृद्धसम्योगः, इन्द्रियजयः, अमात्य उत्पत्तिः इत्येवंsअदिकं इति

15.1.08 वाक्ययोजना योगः

15.1.09 चतुर्वर्णाश्रमो लोकः इति

15.1.10 पदावधिकः पदार्थः

15.1.11 मूलहर इति पदम्

15.1.12 यः पितृपैतामहं अर्थं अन्यायेन भक्षयति स मूलहरः इत्यर्थः

15.1.13 हेतुरर्थसाधको हेत्व्ऽर्थः

15.1.14 अर्थमूलौ हि धर्मकामौ इति

15.1.15 समासवाक्यं उद्देशः

15.1.16 विद्याविनयहेतुरिन्द्रियजयः इति

15.1.17 व्यासवाक्यं निर्देशः

15.1.18 कर्णत्वग्ऽक्षिजिह्वाघ्राण इन्द्रियाणां
शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयःइति

15.1.19 एवं वर्तितव्यं इत्युपदेशः

15.1.20 धर्मार्थविरोधेन कामं सेवेत, न निहसुखः स्यात् इति

15.1.21 एवं असावाह इत्यपदेशः

15.1.22 मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीत इति मानवाः - षोडश इति
बार्हस्पत्याः - विंशतिं इत्यौशनसाः - यथासामर्थ्यं इति कौटिल्यः इति

15.1.23 उक्तेन साधनं अतिदेशः

15.1.24 दत्तस्याप्रदानं ऋणादानेन व्याख्यातम् इति

15.1.25 वक्तव्येन साधनं प्रदेशः

15.1.26 सामदानभेददण्डैर्वा, यथाऽऽपत्सु व्याख्यास्यामः इति

15.1.27 दृष्टेनादृष्टस्य साधनं उपमानम्

15.1.28 निवृत्तपरिहारान् पिता इवानुगृह्णीयात् इति

15.1.29 यद् अनुक्तं अर्थाद् आपद्यते साऽर्थापत्तिः

15.1.30 लोकयात्राविद् राजानं आत्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत

15.1.31 नाप्रियहितद्वारेणाश्रयेत इत्यर्थाद् आपन्नं भवति इति

15.1.32 उभयतोहेतुमान् अर्थः संशयः

15.1.33 क्षीणलुब्धप्रकृतिं अपचरितप्रकृतिं वा इति

15.1.34 प्रकरणान्तरेण समानोऽर्थः प्रसङ्गः

15.1.35 कृषिकर्मप्रदिष्टायां भूमौ - इति समानं पूर्वेण इति

15.1.36 प्रतिलोमेन साधनं विपर्ययः

15.1.37 विपरीतं अतुष्टस्य इति

15.1.38 येन वाक्यं समाप्यते स वाक्यशेषः

15.1.39 छिन्नपक्षस्य इव राज्ञश्चेष्टानाशश्च इति

15.1.40 तत्र शकुनेः इति वाक्यशेषः

15.1.41 परवाक्यं अप्रतिषिद्धं अनुमतम्

15.1.42 पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः इति

15.1.43 अतिशयवर्णना व्याख्यानम्

15.1.44 विशेषतश्च सङ्घानां सङ्घधर्मिणां च राजकुलानां द्यूतनिमित्तो भेदः तन्निमित्तो विनाश इत्यसत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्यात् इति

15.1.45 गुणतः शब्दनिष्पत्तिर्निर्वचनम्

15.1.46 व्यस्यत्येनं श्रेयस इति व्यसनम् इति

15.1.47 दृष्टान्तो दृष्टान्तयुक्तो निदर्शनम्

15.1.48 विगृहीतो हि ज्यायसा हस्तिना पादयुद्धं इवाभ्युपैति इति

15.1.49 अभिप्लुतव्यपकर्षणं अपवर्गः

15.1.50 नित्यं आसन्नं अरिबलं वासयेद् अन्यत्राभ्यन्तरकोपशङ्कायाः इति

15.1.51 परैरसमितः शब्दः स्वसंज्ञा

15.1.52 प्रथमा प्रकृतिः, तस्य भूम्ऽनन्तरा द्वितीया, भूम्य्.एकान्तरा तृतीया इति

15.1.53 प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः

15.1.54 स्वाम्यऽमात्यव्यसनयोरमात्यव्यसनं गरीयः इति

15.1.55 तस्य निर्णयनवाक्यं उत्तरपक्षः

15.1.56 तद्ऽअयत्तत्वात्, तत्कूटस्थानीयो हि स्वामी इति

15.1.57 सर्वत्रायत्तं एकान्तः

15.1.58 तस्माद् उत्थानं आत्मनः कुर्वीत इति

15.1.59 पश्चाद् एवं विहितं इत्यनागतावेक्षणम्

15.1.60 तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः इति

15.1.61 पुरस्ताद् एवं विहितं इत्यतिक्रान्तावेष्कणम्

15.1.62 अमात्यसम्पद् उक्ता पुरस्तात् इति

15.1.63 एवं नान्यथा इति नियोगः

15.1.64 तस्माद् धर्म्यं अर्थ्यं चास्य उपदिशेत्, नाधर्म्यं अनर्थयं् च इति

15.1.65 अनेन वाऽनेन वा इति विकल्पः

15.1.66 दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः इति

15.1.67 अनेन चानेन च इति समुच्चयः

15.1.68 स्वयञ्जातः पितुर्बन्धूनां च दायादः इति

15.1.69 अनुक्तकरणं ऊह्यम्

15.1.70 यथा च दाता प्रतिग्रहीता च न उपहतौ स्यातां तथाऽनुशयं कुशलाः कल्पयेयुः इति

15.1.71ab एवं शास्त्रं इदं युक्तं एताभिः तन्त्रयुक्तिभिः ।

15.1.71chd अवाप्तौ पालने च उक्तं लोकस्यास्य परस्य च

15.1.72ab धर्मं अर्थं च कामं च प्रवर्तयति पाति च ।

15.1.72chd अधर्मानर्थविद्वेषान् इदं शास्त्रं निहन्ति च

15.1.73ab येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः ।

15.1.73chd अमर्षेण उद्धृतान्याशु तेन शास्त्रं इदं कृतम् ।।

(इति) End of the Arthashaastra